सरस्वतीभवन-अध्ययनमाला

(१८)

श्रीदत्तोपाध्यायविरचितः

श्राद्धकल्पः

सम्पादकः

डॉ० अशोक चटर्जी शास्त्री

वाराणसेयसंस्कृतविश्वविद्यालयः

CC-0. Mumukshu Bhawan Varanasi Collection.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

SARASVATĪ BHAVANA STUDIES

Vol. XVIII

General Editor

Dr. Bhāgīratha Prasāda Tripāṭhī 'Vāgīśa Śāstrī'

Director, Research Institute,

Varanaseya Sanskrit Vishvavidyalaya,

Varanasi.

SHRADDHAKALPA

OF

Shridattopadhyaya

Edited By

Asoke Chatterjee Sastri

Pañcat rtha, Mahopādhyāya, M.A (Double), D.Phil., Vācaspati, D.Lit.,

Dip. Ger., Griffith Prizeman (Double),

Umesh Chandra Vidyāratna Prizeman.

Professor and Head of the Department of

Purāṇetihāsa

Varanaseya Sanskrit Vishvavidyalaya,

VARANASI

1971

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Published by :—
Director, Research Institute
Varanaseya Sanskrit Vishvavidyalaya
Varanasi (India).

Printed by :—
Ghanshyam Upadhyaya
Varanaseya Sanskrit Vishvavidyalaya Press,
Varanasi.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सरस्वतीभवन-अध्ययनमाला

(१८)

प्रधानसम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

अनुसन्धानसंस्थान-संचालकः

वाराणसेयसंस्कृतविश्वविद्यालयस्य

श्रीदत्तोपाध्यायविरचितः

श्राद्धकल्पः

सम्पादकः

डॉ० अशोक चटर्जी शास्त्री

पञ्चतीर्थः, एम० ए० (डबल), वाचस्पतिः, डी.फिल०, डी.लिट्, महोपाध्यायः, डिप. जर., ग्रिफिथ प्राइजमेन (डबल), उमेशचन्द्र विद्यारत्न प्राइजमेन

पुराणेतिहासविभागाध्यक्षः

वाराणसेयसंस्कृतविश्वविद्यालयस्य

वेद वेदांग विद्यालय
ग्रन्थालय
आगत क्रमांक........
दिनांक........

वाराणस्याम्

वै० सं० २०२७ — १८९२ तमे शकाब्दे — ई० १९७१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्राप्तिस्थानम्—
प्रकाशनविभागः
वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी-२

मूल्यम् १९) रूप्यकाणि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Rashtrapati Bhavan,
NEW DELHI-4
February 3, 1971

Dear Professor Asoke Sastri,

I am glad to know from your letter of the 28th January, 1971, that you have brought out a critical edition of Sraddhakalpa of Sridatta Upadhyaya.

I congratulate you on your scholastic endeavour and send you my best wishes for the future.

Yours Sincerely,
V. V. Giri

Professor Asoke Chatterjee Sastri,
Head of the Department of
Purana and Itihasa,
Sanskrit University,
Varanasi-2.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Raj Bhavan
LUCKNOW
February 8, 1971

My dear Prof. Asoke Chatterjee,

Thank you for your letter of the 23rd January. Our ancient texts are our great treasure and they have been inexhaustible source of inspiration for generations. They have been studied and admired by numerous scholars and they have stood the discriminatory eye of the time. They have continued to inspire the succeeding generations.

I am very happy to learn that you have completed a critical edition of the "SRADDHA-KALPA" of Sridatta Upadhyaya, who lived in the 13th century, can be held as a great thinker and writer of his times and later influenced many great writers. I am particularly happy that you have brought out a critical edition having examined most of the available manuscripts and original texts. I wish to congratulate you for the pains you have taken in bringing out this critical edition of a great writer and the Sanskrit University at Varanasi did great service to our Sanskritic knowledge and ancient texts in publishing this volume. I am sure this edition will become more popular with all the scholars all over the India.

With best regards,
Your Sincerely,
B. Gopala Reddi

Professor Asoke Chatterjee Sastri,
Head of the Department of
Purana and Itihasa,
Sanskrit University,
Varanasi-2

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शुभाशंसनम्

महामहोपाध्याय डा० गोपीनाथ कविराज

वाराणसेयसंस्कृतविश्वविद्यालयस्य पुराणेतिहासविभागाध्यक्षेण श्रीमता डा० अशोकशास्त्रिणा मैथिलस्मार्तस्य महामहोपाध्यायश्रीदत्तोपाध्यायस्यैतावदमुद्रितस्य 'श्राद्धकल्प' ग्रन्थस्य सुविस्तृतसमीक्षणेन सह विविधान् पाठानालोच्य बहु परिश्रम्य सम्पादनमकारि। ग्रन्थोऽयं कर्मकाण्डिनामत्यन्तमुपकारकः। अनेन सन्तुष्टोऽहं श्रीमते शास्त्रिणे भूयस आशीर्वादान् वितरामि। आशासे चायतौ श्रीदत्तस्यापरान् ग्रन्थान् सम्पाद्य प्रकाशयितुं श्रीमान् शास्त्रिपादः कृतयत्नः स्यादिति।

वाराणसी
वसन्तपंचमी
२१-१-७१

कविराजोपाध्यायः
डॉ० गोपीनाथ देवशर्मा।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अभिमतम्

महामहोपाध्याय डा० कालीपद तर्काचार्य

महामहोपाध्यायश्रीश्रीदत्तेन विनिर्मितः ।
प्रशस्तः श्राद्धकल्पाख्यो ग्रन्थः सूरिभिरादृतः ॥ १ ॥

श्रीदत्तेनात्र सम्प्रोक्ता विविधश्राद्धपद्धतिः ।
सोपक्रमोपसंहारा सुष्ठु श्राद्धक्रियाकृते ॥ २ ॥

सुगमैर्वचनस्तोमैर्वाच्यमत्रोपवर्णितम् ।
उपन्यस्य प्रमाणानि स्वमतं च समर्थितम् ॥ ३ ॥

कृत्योपयोगिनो मन्त्रा यथास्थानं च दर्शिताः ।
कर्मक्रमादिशुद्ध्यर्थं व्यवस्था चोपवर्णिता ॥ ४ ॥

तेनासौ श्राद्धसम्बन्धी ग्रन्थः श्राद्धकृतां नृणाम् ।
यथा हितस्तथा श्राद्धकृत्ये जिज्ञासुदेहिनाम् ॥ ५ ॥

अनेन श्राद्धकल्पेन समो नान्यो विभाव्यते ।
निबन्धः परमोत्कृष्टः श्राद्धतत्त्वनिवेदकः ॥ ६ ॥

तस्य श्रीमदशोकेन शास्त्रिणा सुविपश्चिता ।
कृतं संस्करणं रम्यं सूरीणामादरास्पदम् ॥ ७ ॥

श्रमेण महता तेन नानादर्शविमर्शनात् ।
पाठान्तराणि सर्वत्र योजितानि यथायथम् ॥ ८ ॥

विस्तृता भूमिका काचिदत्र तेन निवेशिता ।
यत्रासामान्यनैपुण्यं विचारेऽस्य प्रमीयते ॥
धर्मशास्त्रादितत्त्वेषु प्रज्ञा चाति विलक्षणा ॥ ९ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रम्ये संस्करणे ये ये गुणाः प्राज्ञैरपेक्षिताः ।
अत्र संस्करणे प्रायस्ते सर्वे वै समीक्षिताः ॥ १० ॥

शास्त्रिणः श्रीमतोऽस्माभिर्विदिता सुचिरात् पुरा ।
प्रतिभा महती वेदस्मृत्यादिषु च विज्ञता ॥ ११ ॥

संस्कृतः श्राद्धकल्पोऽसौ ततस्तेन मनीषिणा ।
भविता विदुषां प्रीत्यै दृढमेतद् विभाव्यते ॥ १२ ॥

श्रीमतः शास्त्रिणस्तस्य भगवान् भूतभावनः ।
विधेयात् कुशलं नित्यं कृत्यशक्त्या विशालया ॥ १३ ॥

अस्य भूरिप्रचारेण प्रचरन्तु समन्ततः ।
यशांसि शशिशुभ्राणि मुदं विन्दन्तु विद्गणाः ॥ १४ ॥

भद्रकालीनगरस्थ-
काश्यपाश्रमतः ।
२६।१०।७०

श्रीकालीपदतर्काचार्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्राद्धकल्पसमीक्षणम्

पण्डितराज राजेश्वरशास्त्री द्रविड पद्मभूषण,

श्रीगुरुः शरणम्

यस्य देवे परा भक्तिः यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ।।

इत्युक्त्या उपासकैः आत्मनि गुरुदेवभक्त्या कश्चन वास्तविकस्वातन्त्र्यापादकः आनन्दप्रचुरोऽर्थप्रकाश उपलभ्यते इति अवगम्यते । सोऽयमर्थप्रकाशः प्रत्यभिज्ञादर्शनानुसारेण निर्मले मनसि प्रमाणपरतन्त्रो उत्पद्यमानः परमेशितुः नातिरिच्यते इति तल्लाभाय अपेक्षिता सामग्री यत्र लभ्यते स सर्वोऽपि समाद्रियते शिष्टैः । तत्रैवान्तर्गतः पूर्वपरम्पराप्राप्तप्रमाणानुसारी श्रीमद्भिः वाराणसेयसंस्कृतविश्वविद्यालयान्तर्गतपुराणेतिहासविभागाध्यक्षमहोदयैः अशोकशास्त्रिभिः महता परिश्रमेण सम्पाद्य प्रकाशितोऽयं श्राद्धकल्पग्रन्थः पितॄणां विषये श्रद्धावतां पुरत उपस्थितो वर्तते । अस्मिन् पितॄणामुपासने अपेक्षितेतिकर्तव्यसामग्र्याः यथास्थानं निवेशितायाः संभूतम् अतीव सौष्ठवं न तिरोहितमित्यत्र नास्ति संशयलेशोऽपि इति सत्यम् । तथापि—वर्तमानसमये केचित् एवंविधस्यानुपयोगित्वं व्याचक्षते पितॄणामस्तित्वस्यैव सन्दिग्धत्वादिति । तत्रेदं वक्तव्यं भवति यत्—पुत्रैः क्रियमाणं श्राद्धं कर्म पितॄणामस्तित्वप्रयुक्तमेव अथवा अन्यप्रयुक्तमपीति । यदि तत्पितॄणामस्तित्वप्रयुक्तं भवेत् तर्हि तेषां शरीरास्तित्वस्य सन्दिग्धत्वादसत्त्वाद् वा, न तत् सोपपत्तिकं भवितुमर्हति । अपि तु तत्कर्म पितृभक्तिप्रयुक्तम् । तथाहि—अग्निष्वात्तादिपितृमन्त्रद्वारा पितृप्रसादकामुकैः पुत्रैः अवश्यं श्राद्धादिकर्म कर्तव्यं स्वस्य पुत्रत्वचारितार्थ्यार्थमिति वेदाः शास्त्राणि पुराणानि च अभिदधति ।

तदुक्तं—

जीवतोर्वाक्यकरणान्मृताहे भूरिभोजनात् ।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ।।इति

यदि च तन्नानुष्ठीयते तर्हि जीवतां भूलोके वर्तमानानाममङ्गलं भवेदित्यपि तत्रैव निरूपितमस्ति । अतः श्राद्धादिकर्म पितृभक्तिप्रयुक्तमिति स्फुटं भवति ।

यद्यपि आपाततो भक्तेर्वैयर्थ्यं भाति तथापि लोकस्य पुरतः येन सचेतस्केन स्वचरित्रद्वारा आत्मनः औचित्यं प्रकाशयितुमभिलष्यते, स यदि धृत्यात्मकमनोवृत्त्या सम्पन्नो न भवेत् तर्हि लोकमनोरञ्जनक्षमं रसास्वादकरमुचितं कर्म कर्तुं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रागद्वेषपराधीनत्वात् व्यसनित्वात् स्वार्थतात्पर्याद्वा न पारयेदित्ययं शनैः शनैः लोकतो दूरमपसरेत्। अतो धृतेरावश्यकतामनुभवन्ति सप्ताङ्गप्रकृतिसंघटनाय भारतीयराजनीतिविदः। सा च गुरुदेवपितृभक्त्या सम्भवतीति साहित्यशास्त्रं प्रशास्तीति भारतीयराजनीतिदृष्ट्या राज्यसंरक्षणं प्रति अभ्यर्हितत्वात् भक्तेरुपयुक्तता सिद्धैव। तदन्तर्गतत्वात् पितृभक्तिरपि पुत्रैरनुष्ठिता हितावहा, न व्यर्था, सा च वेदकालादारभ्यानुवृत्ता नित्यैव। अथ यत् भक्त्यनुवृत्तये अपेक्षितत्वात् पितॄणां शरीरम् उपास्यत्वेन पुत्रा मन्यन्ते तद् भ्रान्तमिति व्यपदिशन्ति––आस्तां तन्म- तेन तत्तथैव। परं पितॄणामुपासनेनानेन न विरोधो भवति मीमांसकैः तथाविधाया उपासनायाः कर्तव्यतया प्रतिपादितत्वात्। अतः देवतायाः विग्रहाभावेऽपि उपास्यत्वं यथा अनुमन्यते तथा पितॄणां विग्रहाभावेऽपि उपास्तिः धृत्युपयोगित्वात् महता आदरेण कर्तव्यैवेति सिद्ध्यति। अत एव पितॄणामग्निष्वात्तत्वं वेदमन्त्रोक्तं नासङ्गतम्। किं च राज्यस्य धर्माधीनस्थायिसंघटनायाम् उपयुक्ततया व्यवस्थितस्य महिम्ना पूर्वसमये पितॄणां पुरतः पुत्रस्य दीर्घयात्रा नाभूत् नत्रां पितरः पितामहाः परेवरे ततास्ततामहाः (तै. सं. ३. ४) इत्याद्याः मन्त्राः जीवतां पितॄणां पुत्रवियोग- प्रयुक्तामवस्थां द्रष्टुं वाञ्छन्ति। परं दैवमहिम्ना पितरः कदाचित् विपरीतां पुत्रवियोगदशां यदा पश्यन्ति तदापि पुत्राणां श्राद्धं जीवद्भिः पितृभिरपि कर्तव्यं भवत्येव, तथाविधानां श्राद्धकर्तव्यस्य वेदेनोक्तत्वात्। एवं सत्यपि तत्श्राद्धं कुर्वाणाः पितरः ग्लानिमनुभवन्ति तन्मन्त्रार्थं स्मृत्वा य इत्येवंविधोऽपीतिहासः अत्र वर्तत इत्येवं प्रदर्शनपरे महाभारते श्राद्धकर्तुः पश्चात्तापो वर्णितः स न पुत्रैः कृतायाः पितॄणामुपासनायाः विरुद्धो भवति।

एवमेव यदा किल दिवं गतानां महतीयानां स्मारकरूपेण मूर्तिपूजा, चित्र- स्थापनं, नामसंकीर्तनं वा तदुपासकैः क्रियमाणं दृश्यते उच्यते च शास्त्रेणापि तदा तन्न्यायेन पुत्रा यदि दिवं गतानां पितॄणां नाम कीर्तयन्ति श्राद्धादौ उपासते च पितृ- भक्ति तर्हि अपि तद्विधस्य कर्मणो नौचित्यं यन्मते उच्यते तदेव कियदुचितमिति सुधिय एव विभावयिष्यन्ति। अतः प्रमाणप्रसूतं कर्तव्यतया विहितं पितृभक्त्या उपासकैः क्रियमाणं पितृश्राद्धं नानुचितमिति हेतो तत्रापेक्षितसामग्रीप्रकाशकत्वात् अयं श्रीमतामशोकशास्त्रिणां स्थिरकीर्तिरूपतया प्रस्तुतः ग्रन्थः श्राद्धकर्तॄणां कृते उपादेयः सुचिरं विराजतां श्रीशास्त्रिवर्यैः सहेति भगवन्तं साञ्जलिबन्धं प्रार्थये इति।

वाराणसी
गणेशचतुर्थी
सं० २०२७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समालोचनम्

डा० गौरीनाथ शास्त्री

अत्रेदानीं महामहोपाध्यायश्रीदत्तविरचितः श्राद्धकल्पः डा० अशोक-शास्त्रिणा सम्पादितो विदुषां प्रत्यक्षमुपनीयते। भारतवर्षस्य चिरन्तनीषु संस्कृतिषु श्राद्धस्यापि विशिष्टमस्ति स्थानम्। चिरन्तना भारतीयाः सह पुरुषकारेण दैवस्य परलोकस्य चास्तित्वं प्रसाधयन्तोऽनितरसाधारणं गौरवं भारतस्य व्यवस्थापयांबभूवुः। दैवपरलोकयोरस्तित्वं निरस्य केवलं पुरुषकारमेकमेवावलम्बमाना भारतीया यदि वर्तेरन् तर्हि देशान्तरीयैस्सह तेषां किमिव वैलक्षण्यं प्रसिध्येदिति प्राचामत्र प्रयासः। न चायमन्धविश्वासप्रसूतः प्राचां प्रयासः, नापि गड्डलिकाप्रवाहपतितः, न चापि निर्मूलः। तिर्यग्भ्यः पशुभ्यश्च मानवानां विद्यमानं वैलक्षण्यं न च खलु तिरोहितम्। स्पष्टेऽपि वैलक्षण्ये तदविगणय्य तिर्यञ्च इव पशव इव च मानवा यदि वर्तेरन् कोऽयं भवेत् पुरुषार्थस्तेषाम्। परमार्थतया प्राणिमात्रस्य सत्यपि समत्वे व्यावहारिकस्तु भेदोऽनिवार्य एव। 'सर्वं ब्रह्म', 'ब्रह्मैवाहम्', 'नेह नानास्ति किञ्चन' इति सहस्रस्योपनिषद्वाक्यानां कथनमात्रेण न खलु प्राणिनां समता प्रसिद्ध्यति। अमीषां वाक्यानामर्थावबोधनाय, बोधानुसारेणानुष्ठानाय, चित्तवृत्तिस्थिरीकरणाय च साधनानि यानि तानि वेदेभ्यः स्मृतिपुराणेभ्यश्चान्विष्य दैवानि आतिथेयानि पित्र्याणि च कर्माण्युच्चावचानि चिरन्तना आविरकार्षुः। एतेष्वपि श्रौतस्मार्त-भेदेन विभागः पूर्वजैः कृतः। तत्रापि यथावेदं यथाधिकारञ्च कर्माणि नियतानि। तानीमानि यथाविधि यथायथं चानुष्ठितानि मानवाननुष्ठातॄन् निःश्रेयसेन संयुजन्तीति प्राचां दृढोऽभिनिवेशः। लौकिकं वैदिकं स्मार्तं श्रौतं वा यद्यदस्माकं संस्कृतेः परिचायकं तत्तत् सर्वं 'श्रद्धत्स्व सौम्येति हि शास्ति शास्त्रं', 'श्रद्दधानस्य श्रुतिरस्ति चान्या' इत्यादिप्रमाणतः श्राद्धाप्रयुक्तत्वेन श्राद्धं सदपि श्राद्धशब्दः पैतृकेषु कर्मसु योगरूढः। स्मार्तकर्मसु पूर्वप्रयोगोऽपरप्रयोगश्चेति द्वैविध्यम्। तत्र पूर्वप्रयोगो जात-कर्मनामकरणादीन् चतुश्चत्वारिंशत्संस्कारानाश्रित्य प्रवृत्तः। इमे सर्वेऽपि संस्कारा उपयोक्ष्यमाणत्वेन प्रवृत्ताः। अपरप्रयोगस्तु दिवं गते पितृमात्रादौ क्रियमाणान् संस्कारानाश्रित्य प्रवृत्तः। तत्र दाहास्थिसञ्चयनादयो ये संस्कारास्ते उपयुक्तार्थ-त्वेन क्रियन्ते। पूर्वप्रयोगे शुभं कर्मेति अपरप्रयोगे चाशुभं कर्मेति लोकानां व्यवहारः। एवं शुभाशुभत्वेन सत्यपि व्यवहारे नियतानुष्ठानविषयत्वमुभयात्मककर्म-जातस्य शाश्वतसिद्धम्। भारतेऽस्मिन् तत्तत्प्रान्तभेदेन ऋग्यजुःसामादिवेदभेदेन च श्राद्धप्रयोगा नैकविधाः। प्रयोगग्रन्थाश्च निबन्धग्रन्थमूलकाः। तत्तत्प्रान्तभेदेन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रवृत्ता निबन्धाश्च स्मृतिग्रन्थानुसारिणः। सर्वसाधारण्येन रचिताः स्मृतयश्च वेदान् मूलीकृत्य सम्प्रवृत्ताः। वेदाश्च सर्वसाधारणाः। साक्षात् परम्परया वा वेद एव मूलं स्मृतिनिबन्धप्रयोगग्रन्थानाम्। अत एव प्रयोगग्रन्थेषु निबन्धेषु च सत्स्वपि प्रकारभेदेषु होलाकाधिकरणन्यायेन सर्वप्रान्तीयानां प्रान्तभेदेन प्रवर्तितेषु निबन्धप्रयोगग्रन्थेषु प्रामाण्यबुद्धिरव्याहता। निबन्धारस्तैस्तैर्महर्षिभिः मनुयाज्ञवल्क्यकात्यायनगोभिलगोतमप्रभृतिभिर्विरचिताः स्मृतीः पर्यवेक्ष्य शिष्टैः तत्तत्प्रान्तनिवासिभिराचर्यमाणांश्चाचारान् संनिरीक्ष्य निबन्धग्रन्थान् मीमांसान्यायसंवलितान् कल्पतरुवीरमित्रोदयनिर्णयसिन्धुस्मृतिमुक्ताफलप्रभृतीन् प्रवर्तयांबभूवुः। तानिमान् परिशील्य प्रयोगग्रन्थानाविरकार्षुः। तेष्वन्यतमः श्राद्धकल्पो नाम श्रीदत्तविरचितः। क्लृप्यन्ते प्रयोगा अस्मिन्निति व्युत्पत्त्या कल्पशब्दः प्रयोगवाची। श्राद्धप्रयोग इत्यर्थः। श्राद्धशब्दस्तु पैतृके कर्मणि योगरूढः इत्यवोचम्। श्रीदत्तस्योपक्रमगतपद्येनायं कल्पः छन्दोगसम्बन्धीति स्पष्टमेव। वङ्गेषु मिथिलासु च छन्दोगानां भूयसा स्थितिरवलोक्यते। आसन् सन्ति चाधुनाऽपि भूयांसः शिष्टाः ये स्मार्तानि कर्माणि यथायथमाचरन्तः। तत्रापि श्राद्धं कर्म विपुलेन विभवेन श्रद्धया च समाचरन्त्यधुनापि। श्राद्धं चोपयुक्तसंस्कारकमिति पूर्वमवदम्। उपयुक्तोपयोक्ष्यमाणसंस्कारयोर्मध्ये मीमांसका उपयोक्ष्यमाणसंस्कारे अत्यादरं पश्यन्ति, परं तत्र बहुशो दृष्टार्थत्वलोभ एव निमित्तम्। 'ये च दृष्टार्थास्ते तत एव प्रमाणम्' इति कथयन् शबरस्वामी भाष्यकारो दृष्टार्थानां स्मृतीनां प्रामाण्यसिद्धये न वेदवाक्यानुमानमिच्छति। वार्तिककारस्तु तत्रापि नियमजन्यादृष्टमङ्गीकुर्वन् वेदवाक्यानुमानमिच्छति। अनेन सन्दर्भेणेदं निर्गलति यदुपयुक्तसंस्काररूपत्वेऽपि श्राद्धकर्मणो याज्ञिकसमाजेऽत्यादरत्वमस्तीति। क्वचन याज्ञिकानामाचाराः मीमांसान्यायविपरीता एव दृश्यन्ते। अत एव 'याज्ञिकास्तु' इति मीमांसाग्रन्थकाराः शास्त्रसिद्धन्यायवैलक्षण्यं याज्ञिकाचारेषु निर्दिशन्ति। अतो निबन्धारः प्रयोगकर्तारो वा मीमांसान्यायाननुसरन्तोऽपि क्वचित् शिष्टाचारान् मीमांसान्यायाननुगुणानपि तेषां पृथक् सत्तामनुमन्यन्ते। एवं सर्वतोभावेन विषयान् परिशील्य शास्त्रदृष्ट्या च निर्धार्य ग्रन्थरूपेण प्रवर्तितेषु श्राद्धकल्पोऽयं विशिष्टं स्थानमावहति।

ग्रन्थमिमं सम्पादयन् श्रीमान् अशोकशास्त्री समीक्षणात्मकतया कांश्चिदपूर्वान् विषयानत्र संयोजितवानिति तस्मै भूयसो धन्यवादान् वितीर्य भगवन्तं भवानीपतिं प्रार्थये यद् ग्रन्थोक्तप्रकारेणोपयुक्तसंस्कारात्मकमिदं कर्म यथावदाचरन्तस्सज्जनाः प्राचीनां भारतीयसंस्कृतिं सर्वात्मना परिपालयेयुरिति।

कलिकाता

मौनी अमावस्या

२६।१।१९७१

श्रीगौरीनाथशास्त्री

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आमुखम्

डॉ० वी० राघवन्

चिरसंस्तुतोऽयमस्माकमायुष्मान् वर्धिष्णुः डा० अशोकचार्टर्जिशास्त्री प्राचीनसम्प्रदायानुसारं तत्तच्छास्त्रेष्वधीती, आधुनिकरीत्या विमर्शकार्ये च कृतपरिश्रमोऽधुना वाराणसेयसंस्कृतविश्वविद्यालये इतिहासपुराण-विभागे अध्यक्षपदं समुचितमधितिष्ठतीति ज्ञात्वा वयं परं प्रीयामहे। तत्प्रार्थनानुसारं तत्सम्पादितस्यास्य श्राद्धकल्पग्रन्थस्य कानिचन प्रस्तावन-वचांसि सामोदं विलिखामश्च।

यथा नव्यन्यायः तथा स्मृतिनिबन्धप्रस्थानं च मैथिलानां मनीषिणां मेधाविलासेन समेधते स्मेति विदितमेव। मैथिलस्मार्ताचार्याणां मध्ये श्रीदत्तोपाध्यायानां किमपि प्रामुख्यं प्रथते। न केवलं ते तत्र कालतः प्रवराः अपि तु अर्वाचीनैः व्याख्यारचनार्हत्वेन प्रमाणतयोद्धारार्हत्वेन च उपात्तानां ग्रन्थानां प्रणयनेनापि। तेषां निबन्धा वाजसनेयिनां छन्दोगानां च कृते कृताः तेषां नैकवैदिकसम्प्रदायेषु प्रवणतां प्रवीणतां च प्रकाशयन्ति।

क्रि० त्रयोदशशतके मिथिलामलङ्कृतवद्भिः श्रीदत्तोपाध्यायैः षण्णिबन्धाः सन्नद्धाः। तेषु प्रथित एक एवेतः पूर्वं मुद्रितः। श्राद्ध-कल्पाख्यस्यास्य तद्ग्रन्थेष्वन्यतमस्य प्रकाशनेन सम्पादकोऽयं स्मृति-निबन्धबद्धादराणां विदुराणां स्मृतौ स्वनामनिबन्धनं स्थिरं सम्पा-दितवान्।

श्रद्धया कृतं श्राद्धमुच्यते। तच्च पितॄनुद्दिश्य यत् क्रियते तत्र रूढम्। श्राद्धतन्तुना हि अस्माकं परम्परा अविच्छिन्नं प्रवहन्ती दरी-दृश्यते। मनुयज्ञं हि महदिदमनुष्ठानमास्तिक्यबीजभूतम्। एतद्विषये

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ग्रन्थद्वयं श्रीदत्तोपाध्यायैर्व्यरचि, पितृभक्तिरिति याजुषकृत एकं, श्राद्धकल्प इति छन्दोगोपकृतयेऽन्यत् ययोः परस्तान्निर्दिष्टमद्य प्रकाशं नीयते ।

नानाविधानां श्राद्धानां तदङ्गानां च स्वरूपं क्रियाविधिश्चात्र सम्यक् प्रत्यपादि ग्रन्थकृद्भिः । बहुप्रमाणविचारपूर्वकं निबद्धेऽस्मिन् ग्रन्थे मुख्यतया भोजभूपालः, गोपालश्च उपजीविताविति प्रतिज्ञातं ग्रन्थ-कारेण। तादृशप्रामाण्यगुणविशिष्टौ द्वावपि भूपालगोपालयोर्निबन्धौ नाद्या-वध्युपलब्धौ, तद्वाक्योद्धरादिभ्य एव ज्ञातौ । पितृवल्लभा, पितृहितकरणी इति प्रायोऽबहुविदितौ द्वौ निबन्धावपि ग्रन्थेऽत्र समुल्लिखितौ ।

पुस्तकस्यास्य सम्यक्सम्पादनकार्यनिर्वर्तनाय तिस्रो हस्तलिखितमातृका उपयुक्ताः । ग्रन्थकारं, तद्देशकालादिकं, प्राचीनार्वाचीनानां निबन्धॄणां मध्ये तत्स्थानं, तत्कृतयः, तदीयश्राद्धग्रन्थद्वयस्य स्वरूपं, तदुद्धृताः प्रमाण-भूता ग्रन्था —इत्यादिविषयजातं च यथोचितं विचारितमत्रेति सम्पादक एष न केवलमस्माकं किन्तु सर्वेषामेव विमर्शकानामभिनन्दनार्हः, इत ऊर्ध्वमेतादृशानन्यानमुद्रितानन्नेकान् ग्रन्थान् मातृकामग्नान् स्वोद्यमेनो-द्धरिष्यतीति चाशंसामहे !

मद्रास,
१४-१-१९७१
मकरसंक्रमणपुण्यकालः

वे. राघवः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वक्तव्यम्

श्रीबलदेव उपाध्याय

वाराणसेयसंस्कृतविश्वविद्यालये पुराणविभागाध्यक्षेण डॉक्टर अशोकशास्त्रि-महाभागेन सम्पादितं श्रीदत्तोपाध्यायस्य श्राद्धकल्पमिमं निरीक्ष्य नितान्तं प्रमोदामहे। मैथिलधर्मशास्त्रनिबन्धकर्तृषु प्रख्यातस्य सदाचारबोधकग्रन्थस्य 'आचारादर्श' नाम्ना प्रसिद्धतमस्य प्रणेतृरूपेण श्रीदत्तोपाध्यायस्याभिधानं नैव विस्मृतिपदवीमश्नुते धर्मशास्त्रप्रवीणानां रमणीयाचरणानां विद्वद्धौरेयाणां मानसपटलीषु। तस्यैव विद्वन्मूर्धन्यस्य द्वितीयोऽयं ग्रन्थः प्राथम्येनात्र प्राकाश्यं नीयते। श्राद्धकल्पस्यास्य ग्रन्थस्य क्वाप्यप्रकाशितचरस्य मूलपाठसंशोधनाय नानास्थानेभ्यो हस्तलेखान् संगृह्य शास्त्रिवर्येण प्रभूतः परिश्रम उररीकृतः।

संस्करणस्य समीक्षणभागे मिथिलायां विद्यमानाया राजनीतिकस्थितेः ऐतिहासिकतथ्यबहुलं परिचयं दत्त्वा सम्पादकमहाभागो ग्रन्थकर्तुः समयनिरूपणं तद्विरचितानप्रकाशितचरांश्च ग्रन्थान् तद्विषयोपन्यासपुरस्सरं निपुणं विवृणोति। समीक्षणमिदं सम्पादकस्य विषयविवेचनचातुरीमितिहासवैदुषीं लेखनपाटवं च विशदमभिव्यनक्तीति नापरोक्षं प्रेक्षावताम्। अत एव प्रमेयबहुलेन समीक्षणेन सनाथीकृतं नानापरिशिष्टैश्च मण्डितं संस्करणमिदं प्रकाश्य शास्त्रिवर्येण धर्मशास्त्राध्ययनपराणां विदुषां महानुपकारो व्यधायीति ध्रुवं वक्तुं पारयामः।

ग्रन्थस्य समीक्षणावसरेऽन्येषां विषयाणां समीक्षणमपि आवश्यकमिव प्रतिभाति। आरम्भपद्ये श्रीदत्तोपाध्यायः स्वाधारीभूतग्रन्थकाराणां निर्देशप्रसङ्गे भूपगोपालसम्मतं ग्रन्थमालोचितवानिति स्फुटं प्रतिपादयति। अत्र भूपगोपालसम्मतस्य विरचनस्य नामादिनिर्देश आवश्यकः प्रतिभाति। श्राद्धविषयकग्रन्थेषु श्राद्धकल्पस्यास्य किं वैशिष्ट्यं परिस्फुरति? किञ्च प्रयोजनमुद्दिश्य ग्रन्थकारो निबन्धमिमं प्रणिनिनायेति प्रश्नानां समाधानं ज्ञातुं समुत्सुका इवावलोक्यन्ते विद्वज्जनाः। यद्येतस्य विषयस्यापि समीक्षणं क्वापि विहितं चेत् तर्हि नितान्तं परिष्कृतिर्भवेत् विवेचनस्य। अस्तु। यदत्र निबद्धं श्रीअशोकशास्त्रिणा तत्तस्य वैदुष्यं परिश्रमं विषयसंकलननैपुण्यं च नूनमाविष्करोति। आशासे श्रीदत्तोपाध्यायस्यान्येषामपि ग्रन्थानामेतादृशं समीक्षणमण्डितं विशदं संस्करणं प्रकाश्य सम्पादकमहाभागः स्वपरिश्रमं चरितार्थयिष्यतीति शम्।

वाराणस्याम्,
मकरसंक्रान्तौ
सं० २०२७

बलदेव उपाध्याय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भूमिका

यद्यपि नोपलभ्यते श्राद्धादिकर्मणां स्पष्ट उल्लेख ऋग्वेदादिसंहितासु, तथापि तत्र पितृयाणम् (ऋ० १०,२,७; मैसं० ४,२,१; शौसं० ५,१८,१३), पितृलोकम् (तैसं० २,६,२,१; मैसं० ३,४ ७,); पितृलोककामस्य (तैसं० ६,६,४,१,); पितृयज्ञ—(ऋ० १०, १६,१०; मैसं० १,१०,१७); पितृदेवत्यः (तैसं० १,६,७,३) इत्यादीनां संबद्धानां पदानां सत्त्वाद् ज्ञायते श्राद्धाद्यभ्युपगम-संकेतः । सर्वाण्येव पदान्येतानि श्रौतसूत्रेषु दृश्यन्ते बौधायनश्रौतसूत्रे (२,२:२१) पितृयजनम् इति पितृयज्ञस्थाने । तत्रैव (६ २०:१६) पितृकर्मार्थे श्राद्धशब्दप्रयोगः । द्रष्टव्यं बृहद्देवतायां श्राद्धदेवत्यसूक्तम् । गृह्यसूत्रग्रन्थेषु सुस्पष्टं श्राद्धभोजन-श्राद्धमन्त्रादयः शब्दाः, धर्मसूत्रग्रन्थेषु च श्राद्धशय्यासनादि-श्राद्धसूतक-श्राद्धसूतकभोजन-श्राद्धसूतगणान्न-प्रभृतयः शब्दाः सन्ति प्रयुक्ताः । अथर्वपरिशिष्टे (२३, १२,३) 'श्राद्धादिपितृकार्यैः' इत्यनेन सर्वतो वैशद्यम् ।

इतिहासोपनिषदि श्राद्धादिपितृकार्यस्यास्ति महती चर्चा । द्रष्टव्यास्तत्रेमे शब्दाः— श्राद्धकर्ता(१४:१०); श्राद्धकर्मणि (१७:११); श्राद्धकर्मबहिष्कृताः (१७:१४); श्राद्धभुक् (१४:६); पितृश्राद्धम् (१६:१३) इति । पैतृकेषु कर्मसु श्राद्धशब्दस्य रूढत्वेऽपि क्वचित् पितृपूर्वकः प्रयुक्तः श्राद्धशब्दः (द्र० सामरहस्योपनिषद् २३१:१६; नारदपरिव्राजकोपनिषद् ४,३८) ।

नारदपरिव्राजकोपनिषदि (४,३८) पिण्डोपनिषदि च पिण्डप्रदानस्य, योगशिखोपनिषदि तु पिण्डपातिनो वर्णनम् ।

छान्दोग्योपनिषदि (७,१;२,४;२,१ ;७,१) समागतानां विज्ञानानां सूच्यां पित्र्य-विज्ञानमप्यन्यतमम् । प्रत्यक्षत एतदभूत् पितृभिः संबद्धं किमपि विज्ञानम् । तत्र शाङ्कर-भाष्यमस्माकमनुकूलम् । 'संस्कृतवर्तरबूख' इत्याह्वये राथबाथलिङ्कसंपादिते सुविस्तृते कोशे तु 'पित्र्यराशि-' इत्यङ्गीकृतं रूपम्, तत्रोपनिषदि पित्र्यशब्दाव्यवहितोत्तरस्य राशिशब्दस्य दृष्टत्वात् । किन्तु न तदैदम्पर्यं स्पष्टीभवति नाम ।

वाल्मीकीये रामायणे (२,७७,१)—

ततो दशाहेऽतिगते कृतशौचो नृपात्मजः ।
द्वादशेऽहनि संप्राप्ते श्राद्धकर्माण्यकारयत् ।।

इति रामभद्रकर्तृकं श्राद्धं वर्णितम् । महाभारतस्यानुशासनपर्वणि पञ्चचत्वारिंशदुत्तरशत-(१४५)-तमेऽध्याये पितृश्राद्धवाच्यः पितृमेधशब्दः प्रयुक्तः—

पितृमेधः कथं देव ! तन्मे शंसितुमर्हसि ।
सर्वेषां पितरः पूज्याः सर्वसंपत्प्रदायिनः ।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथा वृष्टिं प्रतीक्षन्ते भूमिष्ठाः सर्वजन्तवः ।
पितरश्च तथा लोके पितृमेधं शुभेक्षणे ॥

इतोऽग्रे तु पितृयज्ञशब्द एव प्रयुक्तः—

एष प्रोक्तः समासेन पितृयज्ञः सनातनः ।
पितरस्तेन तुष्यन्ति कर्ता च फलमाप्नुयात् ॥ इति ।

एवं तावद् ऋग्वेदादिसंहितासूपलभ्यमानः पितृयज्ञशब्दो नूनमवगन्तव्यः पितृश्राद्धाभिधेयः । वेदाङ्गेषु श्राद्धसंबन्धिनामेषां शब्दानामवाप्तिः—

पिण्डकरण-, पिण्डकारिन्- पिण्डक्रिया-, पिण्डतोयप्रदायिन्-, पिण्डद-, पिण्डदान-, पिण्डदानमन्त्र-, पिण्डदायिन्-, पिण्डनायक-, पिण्डनिधान- पिण्डनिर्वपण-, पिण्डनिर्वाप-, पिण्डनिवृत्ति-, पिण्डपरिषेक-, पिण्डपात-, पिण्डपातिन्-, पिण्डपितृयज्ञ-, पिण्डपितृयज्ञकल्प-, पिण्डपितृयज्ञपात्र-, पिण्डपितृयज्ञमन्त्र-, पिण्डप्रदान-, पिण्डयज्ञ- पिण्डवर्धन-, पितृतर्पण-, पितृतर्पणवेदिका-, इत्यादीनाम् ।

यस्मिन् काले भुजिक्रियाऽऽहिततृप्तिलक्षणविशेषानुवृत्तिस्तस्मिन्नेव श्राद्धि-श्राद्धिकशब्दयोरुच्चारणं न तु कालान्तरे । पाणिनिनेदं दर्शयता 'श्राद्धमनेन भुक्तमिनिठनौ' (५,२,८५) इति संदब्धं सूत्रम् । शारदिकं श्राद्धं च निर्दिशता भगवता तेन प्राणायि— 'श्राद्धे शरदः (४,३,१२) इति ।

नव्यन्यायशास्त्रस्य जनीला मिथिला धर्मशास्त्रकाराणामपि प्रथिता खनिः । द्वादश्यां शताब्द्यां नव्यन्यायस्य प्रभवः, त्रयोदश्यां च श्रीदत्तस्य । एतस्य द्वितीयोऽयं ग्रन्थः प्रकाशमानीयते श्राद्धकल्पो नाम । स्मृत्यादिग्रन्थानां मिथो विरोधिवचनानां परिहारपूर्वकं संगमनं ग्रन्थस्यास्य वैशिष्ट्यम् । तत्रापि मिथिलाप्रदेशप्रचलितासु विविधासु श्राद्धपद्धतिषु मैथिलप्रवादेषु च शास्त्रार्थपूर्वकं निर्णयो द्रष्टव्यः पदे पदे । न्यायशास्त्रीयां शैलीमवलम्ब्य 'न च ········· इति वाच्यम्' 'केचित् तु' 'अन्ये तु' 'ननु ··· ··· इति चेन्न' 'तन्न' 'यत्तु' 'किं च' इत्यादिभिः पूर्ववर्तिनां विचारकाणां मतानि प्रत्यादिश्य स्वकीयं मतं प्रदर्शितम् । यथा—'यत्तु द्वादशाहश्राद्धे मूलं नास्तीति वदन्ति तत् पश्यतोहरत्वम् ।' एवमतिपाण्डित्यं प्रदर्शितं तेन खण्डनमण्डनपूर्वकम् । तदुक्तमिह ग्रन्थे—'इत्यलमतिपाण्डित्येन' (४४ पृ०) ।

श्रीदत्तेन स्मृतिगृह्यपुराणानां प्रामाण्यमङ्गीकृतम् । छन्दोगपरिशिष्टं प्राधान्येन समाश्रितम् । क्वचिदपि शास्त्रेष्वनुपलब्धानां बौधायनादिनाम्ना कैश्चिद् ग्रन्थकारैः समुद्धृतानां वचनानां प्रामाण्यं तेन नोरीक्रियते । एतानि भूपगोपालाभ्यामुद्धृतानि चेत्, प्रामाण्यम् । ग्रन्थारम्भे 'भूपगोपालसंमतम्' इत्यभिधाय, अग्रे चतुःकृत्वो भूपपर्याया दर्शिता :—

१. केचित् तु 'अन्यत्र पतिना सह' इति वाक्यात् सपत्नीकस्य देवतात्वमाहुः, तन्न, उक्तदोषात् । वाक्यस्याप्यस्य राजाद्यलिखितत्वात् । (११ पृ०) ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

२. यच्च बौधायननाम्ना लिखितं वचनं तद् राजाद्यलिखितत्वान्नास्मासु प्रत्ययमावहति (१४ पृ०)।

३. इति वाक्याच्च सपुत्रस्यानधिकार इति वाच्यम्, वाक्ययोरनयो राजादिभिरलिखनात् (४४ पृ०)।

४. 'द्वितीयेऽह्नि पुनस्तद्वदेकोद्दिष्टं समाचरेत्' इति मत्स्यपुराणवचनस्य राजादिभिर्लिखितत्वात् (६६ पृ०)। अयं भूपो भोजभूपाल एव निश्चेयो द्वादशशताब्दीकः।

यद्यपि श्रीदत्तेनेह ग्रन्थे दर्भपिञ्जलीम् (३०, ३१, ३४ पृ०), पिञ्जुल्यादि (३६ पृ०) इति द्विविधरूपः प्रयोगः कृतः, तथापि वैदिकग्रन्थेषु प्रथमरूपस्याप्राप्तिः। तत्र तु पिञ्जूल– (काठकसंहिता २३, १; ऐब्रा० १, ३, कौब्रा० १८, ८); पिञ्जुल–' मैसं० ४, ८, ७), पुञ्जील- (तैसं० ६, १, १, ७ ६, २, ४, ३) इत्येव।

विष्णुधर्मसूत्रे (३१ : १०) 'पितृभक्त्या' इति पदम्। तत एव स्वकीयस्य पितृभक्तिग्रन्थस्य नाम गृहीतं स्यात्। श्राद्धकल्पशब्दस्तु प्रथमतो मानवगृह्यसूत्रे (१, ५, ७) आपस्तम्बधर्मसूत्रे (२, १९, १६) च दृष्टः। नूनं तत एव गृहीतमभिधेयम्। कल्पशब्दः 'कल्पः शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने, इति मेदिनीशाश्वतत्रिकाण्डकोशानामनुसारेणेह विध्यपरपर्यायः। 'कल्पे विधिक्रमौ' इत्यमरोऽपि (२, ७, ३९) प्रतिपेदे। महाभारते (अनुशासन० ८७, १; ८८, २) स्पष्टं श्राद्धकल्पस्य पर्यायः श्राद्धविधिरिति दर्शितः। श्रीदत्तेनापि पितृभक्त्याख्ये ग्रन्थे 'यजुर्विदां श्राद्धविधिं विधास्ये' इत्यवोचि। कल्प्यते विधीयतेऽसाविति व्रतप्रयोगादिः।

गीर्वाणवाणीशेवधेः शेवधित्वं प्रसिद्ध्यति श्राद्धकल्पकल्पैर्हस्तलेखैः। डा० अशोकशास्त्रिणः सुतमामभिनन्दनीया ग्रन्थरत्नमिदं नूत्नपरिपाट्या संस्कुर्वाणाः। एवंविधान् अप्रकाशितचरान् अन्यानपि ग्रन्थान् संस्कृत्य वर्धनीयो देववाङ्निधिः, उपकरणीयश्च लोक इति।

भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'
अनुसन्धानसंस्थान-संचालकः,
वाराणसेयसंस्कृतविश्वविद्यालये

फाल्गुनशुक्लैकादश्यां
२०२७ वैक्रमाब्दे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विषयसूची

मुखबन्धः	...	...	क
कपुस्तिकायाः प्रतिलिपिः	...	...	च
श्राद्धकल्पः (मूलम्)	...	...	१—८५
प्रयोगः	...	...	२
श्राद्धप्राक्कालीनं श्राद्धदिनकृत्यम्	...	...	४
परिभाषा	...	...	७
प्रयोगात् पूर्वभूतानि श्राद्धदिनेऽपराह्णकृत्यानि		...	१८
प्रयोगः	...	...	२०
काम्यानि	...	...	२६
पितामहपिण्डम्	...		३७
अपरपक्षतिथिषु काम्यश्राद्धानि	...	...	४५
विहितनिषिद्धानि	...	...	५७
एकादशाहैकोद्दिष्टप्रयोगः	...	...	६१
प्रयोगः	...	...	७०
अधिकारिणः	...	...	८३
समीक्षणम्	...	...	८७—१६४
मिथिलायां राजनीतिकगतिः	...	...	८८
श्रीदत्तस्य कालः	...	...	९४
श्रीदत्तस्य ग्रन्थाः	...	...	१०७
खपुस्तिकायाः प्रतिलिपिः	...	...	११८क
श्राद्धकल्पसंपादनाय संगृहीतानामालोचितानां हस्तलिखितपुस्तकानां परिचयः			११९
परिशिष्टम्—क			
रघुनन्दनेन व्यवहृताः श्रीदत्तग्रन्थांशाः	...	...	१४१
परिशिष्टम्—ख			
श्राद्धकल्पश्राद्धतत्त्वयोः सामान्यश्लोकाः	...	...	१४५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परिशिष्टम्—ग
श्राद्धकल्पोद्धृतानि वेदपुराणधर्मशास्त्राणि ... १५२
परिशिष्टम्—घ
श्लोकानुक्रमणिका १५४
परिशिष्टम्—ङ
शब्दानुक्रमणिका १६३
गपुस्तिकायाः प्रतिलिपिः १९४क
ग्रन्थपञ्जी १९५
शुद्धिपत्रम् २०३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुखबन्धः

याज्ञवल्क्यजनकयोर्लीलाभूमिर्मिथिला यथैकदा न्यायानुशीलनस्य प्राणभूतासीत् तथा स्मृतिशास्त्रस्याप्यनुशीलनेन तस्याः प्रसिद्धिः समग्रं भारतं व्याप्य विस्तृताऽभूत्। द्वादशावधिचतुर्दशशतकेषु अस्मिन् मिथिला-प्रदेशे बहवः स्मृतिनिबन्धा निरमायिषत। तेषु च स्मृतिनिबन्धकारेषु 'ग्रहेश्वरमिश्रो' 'गणेश्वरमिश्रः', 'श्रीदत्तोपाध्यायो' 'गणेश्वरठक्कुरः', 'चण्डे-श्वरठक्कुरः', 'रामदत्तठक्कुरो', 'हरिनाथोपाध्यायः', पद्मनाभदत्तः', 'श्रीदत्तमिश्रः', विद्यापत्युपाध्यायः', 'इन्द्रपतिठक्कुरः', 'प्रेमनिधिठक्कुरो', 'लक्ष्मीपतिरुपाध्यायः', 'शंकरमिश्रो', 'वाचस्पतिमिश्रो' 'वर्धमानो-पाध्यायः', 'मिसरूमिश्रो', 'रुद्रधरोपाध्यायोऽन्ये च मनीषिणो विशेषेणो-ल्लेख्यनामानो भवन्ति। एषु चैकाधिका विबुधास्तत्कालीनामर्वाचीनां वा गौडीयस्मृति प्रभावान्वितामकुर्वन् नास्त्यत्र सन्देहकणोऽपि। एषां च स्मार्तपण्डितानां मध्ये बहूनामेव ग्रन्थादिकं नाद्याप्याविष्कृतम्। अनेकेषां च केषांचिद् ग्रन्थानामुपलब्धावपि अल्पानेव ग्रन्थान् विना प्रायेण बहुश एव नाद्यापि मुद्रार्पिताः सन्ति। परन्तु सौभाग्येन वाचस्पतिमिश्रस्य चण्डेश्वरठक्कुरस्य च केचिद् ग्रन्थाः प्रकाशिता वर्तन्ते।

प्रसङ्गेनैतदुल्लेख्यं यदुपेक्षितानां निबन्धकाराणां त्रयोदशशतकान्तर्वर्ती श्रीदत्तोपाध्यायोऽन्यतम इति। स्मार्तो रघुनन्दनस्तु स्वरचिताष्टाविंशति-तत्त्वेषु बहुत्र श्रीदत्तोपाध्यायस्य नाम मतं ग्रन्थनामानि च समुल्लिलेख। न केवलमिदमेव, परन्तु केषुचित् स्थानेषु तत्रभवान् श्रीदत्तोपाध्यायस्य युक्तिं सश्रद्धं गृहीतवान्। कामं प्रयोजनमनुसृत्य तेन कुत्रचित् श्रीदत्त-मतं न समर्थितम्।

पृथग्विधेषु ग्रन्थागारेषु संचितानां पुस्तकानां पुस्तिकानां च परिचयसूचीतः श्रीदत्तोपाध्यायस्य स्थूलतः षण्णां पुस्तकानामवगतिरस्ति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वयमस्मिन् पुस्तके श्रीदत्तीयग्रन्थमुपजीव्य तावत्कालपर्यन्तं यत् तत्त्वं संग्रहीतुमशक्नुम तेषां समुल्लेखे यत्नमपि व्यतन्म। केवलमाचारादर्शं विना तदीयाः सर्वे ग्रन्था एव पुस्तिकासु हस्तलिप्यां निबद्धाः, अद्यापि न प्राकाश्यमवापिताः।

अद्यत्वे तु वयं श्राद्धकल्पाख्यं ग्रन्थं लेशतोऽनुशीलयितुं प्रयासमाश्रिता इति। श्राद्धस्य वैशद्येनालोचनमत्र वर्तते। प्रयोगः, श्राद्धप्राक्कालीनं श्राद्धदिनकृत्यम्, परिभाषा, प्रयोगात् पूर्वकृत्यानि, श्राद्धदिनेऽपराह्ण-कृत्यानि, प्रयोगः, काम्यानि, पार्वणश्राद्धविधिः, अपरपक्षतिथिषु काम्य-श्राद्धानि, एकादशाहैकोद्दिष्टप्रयोगः, आभ्युदयिकश्राद्धं, प्रयोगः, त्रिविधा क्रिया, अधिकारिण इत्यादीनि श्राद्धस्य सर्वाण्येवाङ्गान्यवलम्ब्य बहुधा विचार्य श्रीदत्तोपाध्यायोऽस्मिन् ग्रन्थे स्वमतं परिष्कृतवान्। केषुचन विषयेष्वपि लक्षणनिरूपणप्रसङ्गेन व्याख्याया विप्रतिपत्तिनिचयां निरस्य स्वमतमतिष्ठिपत्। अनया रीत्या च प्राचीनकालीनां मैथिलानां श्राद्धतत्त्वस्य यानि यानि वैशिष्ट्यानि तानि सर्वाण्येव परिस्फुटानि भवन्ति। अथ च ईसवीयत्रयोदशशतकान्तर्गताया मिथिलायाः सामाजिकी राजनैतिकी चावस्थे उद्घाटिते विद्येते।

श्राद्धकल्पस्य प्रामाणिकत्वं श्रीदत्तपरवर्तिकालीना वाचस्पतिमिश्र-प्रभृतयः सर्वे एव प्रामाणिकाः मैथिलधर्मशास्त्ररचयितारः अभ्युपगतवन्तः। श्रीदत्तोपाध्यायस्य न केवलं श्राद्धकल्पात् परन्तु अन्यान्यग्रन्थेभ्यश्च बहुत्र बहुश एव वचनानि तत्परवर्तिकालेष्टग्रन्थेषु समुल्लिखितानि वर्तन्ते। श्रीदत्तोऽपि प्रमाणपुरस्सरप्रसङ्गेन मत्स्यवायुविष्णुब्रह्मब्रह्माण्डवराह-भविष्यमार्कण्डेयप्रभृतिपुराणेभ्यः, देवीत्याद्युपपुराणेभ्यः, तथा मन्वत्रि-मरीचिविष्णुदक्षहारीतयाज्ञवल्क्यशातातपपैठीनस्यापस्तम्बेत्यादिधर्मसंहिता-भ्यश्च वचनान्युद्धृत्य स्वमतं दृढं प्रतिपादयितुं प्रयासमापेदे।

काममन्येऽपि एकाधिकाः स्मार्ताः निजग्रन्थेषु श्राद्धमालोचितवन्तः, किन्तु तेषु न कोऽपि श्रीदत्तवदेतावन्नैपुण्येन स्वानुशीलनं व्यतनोत्। यद्यपि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नात्र श्रीदत्तोपाध्यायः श्राद्धस्य लक्षणमवलम्ब्य बहूनालोचितवान् किन्त्वस्य पितृभक्त्याख्यापरग्रन्थे कृत्यकल्पतरुकारस्य लक्ष्मीधरस्य तथान्येषामपि बहूनां श्राद्धलक्षणं दोषावहमिति स्पष्टतया प्रमाणीकृत्य स्वलक्षणं प्रतिष्ठापयामास । अतोऽस्मिन् ग्रन्थे पिष्टपेषणभयात् श्राद्धलक्षणस्य पुनरालोचनं न समुत्थापितम् ।

ग्रन्थसम्पादनकार्ये पुस्तकसंग्रहश्रम एव प्रथमोऽन्तरायः । श्राद्धकल्पस्य एकाधिकाः हस्तलिखिताः पुस्तिकाः भिन्नभिन्नस्थानेषु वरीवर्तन्ते । वाराणसेयसंस्कृतविश्वविद्यालयेऽस्य श्राद्धकल्पस्य द्वे हस्तलिखितपुस्तिके वर्तेते, तथा बम्बईनगर्यामस्य एकपुस्तिकाया उपलब्धिर्भवति । एताः सर्वाः अवलम्ब्य ग्रन्थोऽयं प्रस्तूयते ।

वङ्गेषु श्रेष्ठस्मार्तो रघुनन्दनो मैथिलस्मार्तश्रीदत्तोपाध्यायस्य श्राद्धकल्पग्रन्थालोचनया यत् प्रभावितात्मा प्रहितात्मा चाभवत् तत् सप्रमाणं कर्तुं श्रीदत्तस्य यास्तावल्लेख्यपङ्क्तयः रघुनन्दनीयग्रन्थेषु प्रयुक्ताः तासामपि परिचयं रघुनन्दनस्य अष्टाविंशतितत्त्वेभ्यः उच्चित्य प्रदर्शयितुं प्रयास्यम् । रघुनन्दनो विशेषतया अस्य श्राद्धतत्त्वस्य ग्रन्थे श्रीदत्तस्य श्राद्धकल्पात् यान् यानंशान् परिगृहीतवान् ते सर्वे स्वातन्त्र्येण प्रकटीकृताः ।

पादटीकायां च + चिह्नम् अतिरिक्तपाठबोधकं तथा × चिह्नं तत्तत् पुस्तके अंशोऽयं नास्तीति सूचयति ।

ग्रन्थोऽयं न कदापि प्राकाश्यं नीतः स्यात् यदि वाराणसेयसंस्कृतविश्वविद्यालयस्य प्राक्तनोपकुलपतयः श्रीमन्तः गौरीनाथशास्त्रिणस्तथा अस्य विश्वविद्यालयस्य वर्तमानोपकुलपतयः डा० सत्यव्रतसिंहमहाभागाः एवं च भूतपूर्वानुसन्धानसंचालकाः श्रीबदरीनाथशुक्लास्तथा वर्तमानानुसन्धानसंचालकाः डा० भागीरथप्रसादत्रिपाठिनो विषयेऽस्मिन् कृतयत्ना न स्युः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हस्तलिखितपुस्तिकासंग्रहविषये वाराणसेयसंस्कृतविश्वविद्यालयस्य भूतपूर्वग्रन्थाध्यक्षाः श्रीविभूतिभूषणभट्टाचार्याः तथा वर्तमानग्रन्थाध्यक्षाः श्रीलक्ष्मीनारायणतिवारीमहोदयाः, एवं च उपग्रन्थाध्यक्षाः श्रीबलरामशास्त्रिभारद्वाजाश्च बहुप्रयासं समाश्रितवन्तः। कुत्रचित् पाठनिर्णयप्रसङ्गे श्रीपट्टाभिरामशास्त्रिपादाः तथा श्रीहरिरामशुक्लमहाभागा अमूल्यमुपदेशं दत्तवन्तः इति तेभ्यः कृतज्ञतामाविष्करोमि।

महामहोपाध्यायाः श्रीगोपीनाथकविराजाः, महामहोपाध्यायाः श्रीकालीपदतर्काचार्याश्च ग्रन्थस्य प्रारम्भिकाशीर्वचोभिर्गौरवं समेधितवन्तः। तेभ्यः प्रणामान् समर्पयामि।

पण्डितराजराजेश्वरशास्त्रिद्रविडाः, डा० गौरीनाथशास्त्रिणः, तथा श्रीबलदेवोपाध्याया अपि ग्रन्थमिमं विश्लिष्य स्वमतं प्रकाशयामासुः। एतदर्थं गुरुवर्यान् सादरं प्रणमामि।

डा० पी० एल० वैद्यः, महामहिमपण्डितः श्रीनारायणचन्द्रस्मृतितीर्थदेवशर्मा च स्वाभिमतप्रदर्शनद्वारा ग्रन्थमिमं पुरस्कृतवन्ताविति सादरं तौ संभाजयामः।

डा० वी० राघवन् महोदयो बहुधा परिश्रम्य महत्त्वमुद्घाटयितुमस्य ग्रन्थस्यामुखं लिखितवान् इति तस्याहं सर्वथाधमर्णः।

ममान्तेवासी श्रीरामाभिलाषत्रिपाठी तथा च विद्यार्थिनी श्रीमती रत्ना सेन टिप्पणीसंशोधनप्रसङ्गे यथायथं साहाय्यं कृतवन्तौ।

विश्वविद्यालयमुद्रणालयाध्यक्षस्य श्रीघनश्यामोपाध्यायस्य एवं च मुद्रणालयस्यावरकर्मचारिणः श्रीसत्यचरणभट्टाचार्यस्य तत्त्वावधानं विना एतादृशः स्वल्पेनैव कालेन ग्रन्थोऽयं मुद्रापितो न स्यात्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सावधानं ग्रन्थस्य संशोधने कृतेऽपि मद्दृष्टिदोषेण, अक्षरसंयोजकानामनवधानेन वा नूनं काश्चन त्रुटयस्सञ्जाता भवेयुः, तथापि ता विनिर्दिश्य मामनुगृह्णीयुर्विद्वदपश्चिमाः, येनाहं द्वितीयसंस्करणे ता दूरीकर्तुं प्रभवेयम् ।

अन्ते च वक्तव्यं—

श्वासा विनिर्यान्ति मनः प्रयासि
कार्याणि मूल्यं न समादिशन्ति ।
वाणीविलासाय ममास्ति यत्न-
स्तत् क्षम्यतां स्नेहवशात् सुधीभिः ॥

वाराणसी
फाल्गुनी पूर्णिमा
११-३-१९७१

अशोक शास्त्री
पुराणेतिहासविभागाध्यक्षः
वाराणसेयसंस्कृतविश्वविद्यालयस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



'क' पुस्तिकायाः प्रतिलिपिः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्राद्धकल्पः

ओं नमस्तस्मै

स्मृतिगृह्यपुराणानि[1] भूपगोपालसम्मतम्[2] ।
सतां वाक्यानि[3] चालोच्य[4] छान्दोग[5]श्राद्धमुच्यते ॥

श्वः श्राद्धं करिष्यमाणो रजकद्वारा[6] वासः प्रक्षालयेत्[7] । दन्तगात्रशिरोमलान्यपकृष्य स्नात्वा निरामिषमेकवारं भुञ्जीत । गयादितीर्थे जलतीरे प्रकृष्टगृहे वा श्राद्धार्थं भूमिं दक्षिणप्लवां सुसमां[8] वा कृत्वा गोमये[9]नोपलेपयेत्[10] । केशास्थिशर्करे[illegible]कादियुतां पङ्किलां स्रवज्जलां कृमियुतां संकटां दुर्गन्धिमनिष्टशब्दां परकीयां च भूमिं म्लेच्छदेशं महानद्युत्तरकीकटदक्षिण[11]द्वादशयोजनावच्छिन्नत्रिशङ्कुदेशं च वर्जयेत् । ततो रात्रिप्रथमयामान्ते कुलशीलशौचश्रुतवृत्तसम्पन्नानाश्रमिणः [12]पूयकुष्ठ्यव्यङ्गत्वपातित्यादिदोषरहितान् स्वगोत्रान्, असमानप्रवरान्, कृतभोजनादिकृत्यान्, निरूप्य द्वौ पित्रादिदेवार्थम्, मातामहादिदेवार्थं च द्वौ, अथवा पित्रादिमातामहादिदेवार्थं द्वावेव, पित्रादौ त्रीन्, मातामहादौ च त्रीन् विप्रान् निमन्त्रयेत् । एतदशक्तौ च[13] पित्रादिदेव[14] एकम्[15] मातामहादिदेवे[16] चैकम्[17], [18]अथवा

१. पुराणादि ख
२. सम्मता ख
३. मतानि ख
४. चालोक्य ख
५. छन्दोगं ख
६. रजकादि° ख
७. क्षालयेत् क
८. खसमां क
९. गोमयेन क ×
१०. प्रलेपयेत् ख
११. दक्षिणा ख
१२. न च क
१३. च क ×
१४. °दैव ख
१५. चैकं ख
१६. °दैवे ख
१७. च एकं ख
१८. निमन्त्रयेत ख +

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उभयसम्बन्धिदेव एकमेव, पित्रादित्रय एकं मातामहादित्रिके[1] चैकं निमन्त्रयेत्। यदि त्वेक एव ब्राह्मणस्तदा पित्राद्यर्थं तं निमन्त्रयेत्। देवोद्देश्येन त्वन्नं संकल्प्य ब्रह्मचारिणे [2]दद्यात्, अग्नौ वा दहेत्।

अथ[3] प्रयोगः

प्राङ्मुखान् देवब्राह्मणान्, उदङ्मुखो[4] दक्षिणहस्तेन विप्रदक्षिणजानुं स्पृष्ट्वा उपवीती "ओं[5] श्वः श्राद्धमाचरिष्ये त्वं मयात्र निमन्त्रितः" इति निमन्त्रयेत् प्रत्येकम्। ततः प्राचीनावीती दक्षिणामुखः पित्रादिब्राह्मणानुदङ्मुखान्[6] तत्रैव[7] निमन्त्रयेत्। पूर्वेद्युः निमन्त्रणासंभवे तस्यां रात्रावनभिगतस्त्रीकां श्राद्धदिने प्रातर्निमन्त्रयेत्। तदसंभवे तु श्राद्धारम्भसमये[8] त्रिदण्डान् संयमशालिनो यतीन् तदभावे अन्यानपि ब्राह्मणान् निमन्त्रयेत्। निमन्त्रणवाक्ये श्वः स्थाने अद्येति[9] विशेषः। एवं निमन्त्र्य—

"ओं अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः।
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा[10]॥"

इति[11] नियमान् श्रावयित्वा ब्राह्मणानभ्यर्थयेत्।

"ओं सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः।
भवितव्यं भवद्भिर्नः श्वोभूते श्राद्धकर्मणि॥"

तद्दिननिमन्त्रणयज्ञे श्वोभूते इत्यस्य स्थाने अद्यतन इति पदं

---

१. °त्रये ख
२. वा क+
३. तत्र ख
४. °मुखः क
५. ओं क×
६. मातामहादि ब्राह्मणान् ख+
७. च ख +
८. श्राद्धसमये ख
९. कर्तव्यो ख+
१०. सततं···श्राद्धकारिणा ख×
११. इत्यादि° ख

---

13 Cf. मनु ३.१९२
13–14 Cf. मत्स्यपुराण १६.२०
16–17 Cf. पितृदयिता of अनिरुद्ध भट्ट पृ. २६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रयोक्तव्यम्[1]। पूर्वरात्रिनिमन्त्रणपक्षे[2] निमन्त्रितब्राह्मणैः "श्व आचरिष्यामि यद्यविघ्नेन रजनी यास्यति। सर्वमेतत् करिष्यामि" इति प्रत्येकं वाच्यम्। ततो निमन्त्रितः श्राद्धकर्ता च द्विर्भोजनं वेदाध्ययनं श्रमं हिंसां क्रोधं त्वरां प्रमादं भारोद्वहनं दूरगमनं कलहं[3] शस्त्रग्रहणं च वर्जयेत्। शुचिः सत्यवादी क्षमी[4] ब्रह्मचारी च स्यात्। ब्रह्मचर्यं चाष्टविधमैथुननिवृत्तिः। तथा च दक्षः—

"श्रवणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्।
सङ्कल्पो व्यवसायश्च क्रियानिवृत्तिरेव च॥"

इति। स्मरणं चिन्तासन्ततिजं वाक्पूर्वकम्[5]। प्रेक्षणकीर्तने[6] चाभिलाषपूर्वके[7]। श्राद्धकर्ता च[8] निमन्त्रितमनुष्यं न प्रत्याचक्षीत। यदि च विस्मरणवशादतिक्रामति तदा पश्चात् प्रसादयेत् तर्पयेच्च। दन्तकाष्ठं च वर्जयेत्। स्वीकृतानिन्द्यनिमन्त्रिणस्तु पश्चाद् विमतिं न कुर्यात्। नान्यदन्नं प्रतिगृह्णीयात्। नान्यत्र गमनादिना श्राद्धवेलामतिक्रामेत्। न चास्नातः श्राद्धे भुञ्जीत। स्वयं निमन्त्रणासम्भवे तु सजातीयसन्मनुष्यद्वारापि[9] निमन्त्रयेत्।

"साधुभिः सन्निमन्त्रयेत्" इति यमवचनात्। न च साधुभिः साधुवचनै[10]रित्यर्थः। "ब्राह्मणान् उपामन्त्रयेत् श्वोऽद्येति वा[11] श्राद्धमाचरिष्ये" इति शंखलिखितवचनात्। "त्वं मयात्र निमन्त्रित" इति मत्स्यपुराणसहिता[12]सर्ववाक्यप्रदर्शितनिमन्त्रणवाक्ये असाधु-

१. तद्दिन ·····प्रयोक्तव्यम् क ×
२. इति ततो क
३. कलहं च ख
४. क्षमी च ख
५. स्मरणं ·····पूर्वकम् ख ×
६. कीर्त्तनं ख
७. पूर्वकम् ख
८. च क ×
९. ,अपि ख ×
१०. शब्दै ख
११. वा क ×
१२. सहितात् प्राप्ते क

7–8 Cf. दक्ष ७.३१–३२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शब्दप्रसक्त्यभावेन व्यावर्त्याभावात्। न च "दाता विप्रान् निमन्त्रयेत्" इति देवलवचन[१]विरोधः। "मया च श्राद्धकारिणा" इति मन्त्रलिङ्गविरोधो वा। अभावे विधानात्। एवं च णिजन्तत्वमपि युक्तम्। अत्र केचित्-एकभक्तादिकं पूर्वदिननिमन्त्रणाङ्गं श्वः कर्तास्मीति निश्चित्य दाता विप्रान् निमन्त्रयेत्।

"निरामिषं सकृद् भुक्त्वा सर्वभुक्तजने गृहे।
असम्भवे परेद्युर्वा ब्राह्मणांस्तान् निमन्त्रयेत्॥"

इति देवलवचने तत्समभिव्याहारात्। तेनैव[२] समं समानकर्तृकत्वाच्च। न च मध्ये श्रवणादुभयान्वय इति वाच्यम्, अनन्वयिसर्व[३]भुक्तजनपदेन व्यवधानादिति मन्यन्ते। वस्तुतस्तु ब्राह्मणस्वीकारार्थं निमन्त्रणमेकमेव। पूर्वेषु परेषु[४] रूपवैकल्पिककालद्वयविशिष्टं विधीयते[५]। तत्र चैकभुक्तादिकं विहितमुभयकालीनेऽप्यन्वेति।

अथ श्राद्धप्राक्कालीनं श्राद्धदिनकृत्यम्

तत्र श्राद्धकर्ता श्वेतवस्त्रयुगेन प्रातः स्नानमाचरेत्[६] स्ववासस्थानात् दक्षिणां दिशं गत्वा दक्षिणाग्रगतान्[७] साग्रान् समूलान् हरितान् पित्रर्थं, विश्वेदेवार्थं तु चित्रान्, पिण्डभूस्तरणार्थं च बद्धमुष्टिहस्तमितानितरकार्यार्थं विस्तृताङ्गुष्ठानामिकाप्रमाणान् स्नुतक्षीरान् कुशानाहरेत्। कुशाभावे तु दूर्वाश्यामाकमुञ्जपङ्कोद्भवहरिततीक्ष्णरोमशवल्वजाना[८]मन्यतममाहरेत्। श्राद्धार्थमपरकीयमनुच्छिष्टमपर्युषितमदुर्गन्धमफेनिलमशुच्यसंस्पृष्टं जलमा[९]हरेत्[१०]। अत्यल्पजलाशय-

---

१. वचन ख ×
२. एव क ×
३. अनन्यपूर्वदिननिमन्त्रणेऽपि ख
४. पूर्वेद्युरपरेद्यु ख
५. विधीयते क ×
६. स्नायात् क
७. दक्षिणाग्रान् ख
८. वल्वज ख ×
९. जलम् ख ×
१०. परिहरेत ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थमभोज्यनिपानजलं च वर्जयेत्। गृहवर्गान् गृहोपलेपनादि सुरभिस्नानं सितवस्त्रधारणं च कारयेत्। नूतनपात्रेषु यथाशक्त्युत्कृष्टं नानाप्रकारमन्नं सपिण्डस्त्रीद्वारा पाचयेत्, स्वयं वा पचेत्। त्रुटितकर्णीममातृपितृवंशजां रजस्वलां चतुर्थदिनस्नातामपि न पाचयेत्। पाकस्थानं वेष्टयित्वा[1] छागान् बन्धयेत्, तिलांश्च विकिरेत्। तदुक्तम्—

"तिलांश्च विकिरेत्तत्र परितो बन्धयेदजान्।
असुरोपहृत[2] श्राद्धं[3] तिलैः शुद्ध्यत्यजेन च॥"

न चाजेनेत्येकवचनबलादेकस्यैवाजस्य बन्धनमिति वाच्यम्। यतोऽर्थवादस्यैकवचनस्य पृथक्कृत्यानुवादेनाप्युपपत्तेर्न प्रथमश्रुतविध्युद्देशस्थाजानिति बहुवचनस्यान्यथाकरणम्। परित इत्यन्वयापत्तेश्च[4]। न च तद्विकिरेदित्यनेनैवान्वितमविशेषश्रवणात्। ततोऽनिवृत्त एवं मध्याह्ने श्राद्धिब्राह्मणेभ्यो दन्तधावनपूर्वकं[5] तैलमुद्वर्तनं स्नानोपकरणं नानाविधं ताम्रपात्रस्थं कृत्वा स्वयमुपगम्य[6] वैश्वदेविकब्राह्मणपूर्वकं दद्यात्। श्राद्धगृहागतो गोमयोपलिप्तायां भूमौ गोमूत्रेण मण्डलं कृत्वा भूमिं[7] यवैः सपुष्पैरर्चयेत्। श्राद्धभूमिं पञ्चगव्येनोपलिप्य ज्वलदङ्गारैः संशोध्य गौरमृत्तिकया वेष्टयित्वा[9] तिलैः सर्षपैश्च विकिरेत्। वाराणस्यामयं भूसंस्कारो[10] नास्ति। "मेदसा विप्लुता भूमिरविमुक्ते तु वर्जिता" इति[11] मत्स्यपुराण[12]वचनात्[13]। गोमयोपलेपस्तु[14] तत्रापि "शुचिं देशं

१. परितः ख +
२. °हृता ख
३. भूमिः ख
४. अनन्वयां ख
५. पूर्वकं क ×
६. उपन्यस्य क
७. भूमिं ख ×
८. पुष्पसहितै क
९. आच्छाद्य क
१०. भूमि ख
११. इति ख ×
१२. पुराणात् क
१३. वचनात् क ×
१४. लेपनं तु ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विविक्तं च गोमयेनोपलेपयेत्"इति[1] तस्य शुचिदेशेऽपि मनुना[2] विहितत्वात्। यदि च परकीयभूमौ श्राद्धं चिकीर्षति[3] तदा भूमिस्वामिपितृभ्यः श्राद्धीयद्रव्याग्रभागं दद्यात्। जीवद्भ्यश्च भूस्वामिभ्यः किञ्चिद्दानातिकरं दद्यात्। [4]वैश्वदेविकब्राह्मणोपवेशनार्थं प्रत्येकं प्राङ्मुखदर्भद्वययुक्तानि यवजलप्रोक्षितान्यासना[5]नि कल्पयेत्। पित्रादिब्राह्मणोपवेशनार्थं च[6] दक्षिणाग्रैककुशयुक्तानि दक्षिणाभिमुखानि तिलोदकप्रोक्षितानि षडा[7]सनानि कल्पयेत्। आसने च नेपालकम्बलं वृषीं वा दद्यात्[8]। तदभावे अन्यदप्यासनोपरि वस्त्रं दद्यात्। प्राङ्मुखदक्षिणामुखत्वं चासनस्याग्रभागापेक्षया वृषीलाङ्गूलापेक्षयेत्यन्ये। एतच्चासनं ब्राह्मणोपवेशनार्थमेव। न तु विश्वदेवार्थं पित्राद्यर्थं चोत्स्रष्टव्यमिति भ्रमः कार्यः।

"ततः सिद्धमिति प्रोच्य कल्पितेष्वासनेषु च।
[9]आस्यद्ध्वमिति तान् ब्रूयादासनं संस्पृशन्नपि॥"

इति यमेन कल्पितासनस्य ब्राह्मणोपवेशन एवोपयोगवचनात्। न च "**दक्षिणामुखयुक्तानि पितॄणामासनानि चेति**" देवलवचनायोग्यता[10]। पितॄणामिति षष्ठ्या "वाजपेयस्य यूप इतिवत्[11]" परस्परासंबन्धेनाप्युपपत्तेः। "**ये चात्र विश्वेदेवार्थं विप्राः पूर्वं निमन्त्रिताः प्राङ्मुखान्यासनान्येषां**" इति ब्राह्मणार्थत्वस्यैव देवलेनोपक्रान्तत्वात्। अवश्यवाच्यत्वाच्च। आसनं तु विश्वेदेवार्थं पित्राद्यर्थं च कुशत्रयात्मकमेवोत्सर्जनीयम्

१. मनुना क +
२. मनुना क ×
३. चिकीर्षेत् क
४. आनन्दिकरं तत्परितोषार्थं भाविकमित्यर्थः ख +
५. प्राङ्मुखान्येव ख
६. च क ×
७. षड् क ×
८. वृषी ऋषीणामासनं वृषीत्यमरः ख +
९. अत्रास्यद्ध्वम् क
१०. आप्तता ख
११. वाज॰......वत् ख ×

1 Cf. मनु ३.२०६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"पादप्रक्षालनं दत्त्वा विष्टरार्थं कुशानपि ।
आवाहयेत्यनुज्ञातो विश्वेदेवास इत्यृचा ॥
द्विगुणांस्तु कुशान् दत्त्वा उशन्तस्त्वेत्यृचा पितॄन् ।" इति याज्ञवल्क्यवचनात्[1] । विष्टरार्थमासनार्थमित्यर्थः । दर्भान् द्विगुणभुग्नान् [2]प्रादाये[3]त्याश्वलायनो गृह्यमपि दर्भाणामेवासनत्वेन देयत्वमाह । न त्वासनमिति द्वितीयासप्तम्यर्थं इति कस्यचिद् व्याख्यानमादरणीयम् ।

अथ परिभाषा

तत्र सर्वत्रावाहनादिप्रश्ने पितृश्राद्धार्थं निमन्त्रितो[4] ब्राह्मणः प्रष्टव्यः; अधिकफलार्थिना तु सर्व एव प्रष्टव्याः । आरम्भात् समाप्तिपर्यन्तं दर्भपाणिना भवितव्यम् । श्राद्धार्थं च यत् किंचिद् वेद्यां प्रवेश्यं तदुत्तरदिशा । यत्किञ्चिन्नि[5]स्सार्यं तद् दक्षिणदिशा । आवाहनादिब्राह्मणोत्तराचमन[6]पर्यन्तं श्राद्धकर्ता ब्राह्मणैश्च विहितेतरशब्दोच्चारणं न कर्तव्यम् । दैवं कर्मोदङ्मुखेन भूमिगतदक्षिणजानुनोपवीतिना प्रदक्षिणं कार्यम् । प्रदक्षिणं दक्षिणावर्तेन । दक्षिणस्यां दिश्यारभ्योत्तरस्यां समापनीयमिति यावत्[7] । उत्सर्गस्तु सजलयवजुंकुशत्रयेण । दक्षिणहस्ताङ्गुल्यात्मकदेवतीर्थेन "नमो विश्वेभ्यो देवेभ्यः" इति कर्तव्यम् । "विश्वे देवा इदं वो नमः" इति वा । ननु—

"इष्टिश्राद्धे क्रतुर्दक्षः सत्यो नान्दीमुखे वसुः ।
नैमित्तिके कालकामौ काम्ये च धूरिलोचनौ ॥
पुरूरवा माद्रवश्च पार्वणे समुदाहृतौ ॥"

१, इति क +
२. आसनं ख
३. प्रदाय ख
४. निमन्त्रित° ख
५. किंचित् क ×
६. भोजन ख
७. प्रदक्षिणं ···यावत् क ×

1–3 Cf. याज्ञवल्क्य १. २२९, २३२
19–21 Cf. लिखितस्मृति ४९.५१,५२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति बृहस्पतिवाक्यादिष्टिश्राद्धादौ क्रतुदक्षादि[1]निर्देश्यत्वमवगम्यत[2] इति चेन् मैवम्। नेदं[3] वाक्यं क्रतुदक्षादिनिर्देशपरं तथाऽश्रवणात्। किन्तु योऽसौ गणः विश्वदेवपदनिर्देश्यस्तत्र क्रतुदक्षादियुग्मस्येष्टिश्राद्धादौ मुख्यत्वं चिन्तनीयमित्येवं परम्। मुख्यत्वेन चिन्तनीयत्वमप्यश्रुतमिति चेन्न; मुख्यत्वं तावदिष्टिश्राद्धे क्रतुर्दक्ष इत्यादिव्यपदेशादेव लभ्यते. प्राधान्येन व्यपदेशा भवन्तीति न्यायात्। चिन्तनीयत्वमप्यनुष्ठानान्तरोपयोगित्वेनावश्यकत्वादेव कल्प्यते। अतएव "नमो विश्वेभ्यो देवेभ्य इत्यन्नमादौ प्राङ्मुखयोर्निवेदयेदि"ति विष्णुः।

"विश्वान् देवान् यवैः पुष्पैरभ्यर्च्यासनपूर्वकम्।"

इति मत्स्यपुराणम्। "विश्वान् देवानावाहयिष्ये" इति कात्यायनः। "विश्वेदेवास आगत" इत्यावाहनमन्त्रश्चोपपद्यतेऽन्यथा क्रतुदक्षादियुग्मस्य देवतात्वे येषु[4] वाक्येष्वेतेषु बहुवचनं विश्वेदेवपदेन देवतात्वं गम्यमानं[5] व्याहन्येत। अन्यानि चोपष्टम्भवाक्यानि[6] विस्तारभयान्न लिखितानि। न च क्रतुदक्षादिनामाज्ञानपक्षे विश्वेदेवपदेन निर्देशः। ज्ञानं तु क्रतुदक्षादिपदेनेत्युक्तम् विशेषश्रवणात्। न च विश्वदेवपदेन क्रतुदक्षादिपदेन च समुच्चयान्निर्देशः, नैरपेक्ष्यश्रवणात्। किं च समुच्चये कीदृशं वाक्यम्[7]? किं विश्वाभ्यां देवाभ्यां

१. दक्षादीनां क
२. अवगम्यत क ×
३. नैतद् क
४. एषु ख
५. चावगम्यमानं ख
६. वाक्यानि क ×
७. वाच्यम् क

8–9 Cf. विष्णु ७३
10 Cf. मत्स्यपुराण १७.१८
11 Cf. मानव श्रौ. सू. ११।६।१
12 Cf. ऋग्वेद २।८।९,४।८।१२, शुक्ल यजुर्वेद ७.३४, शाङ्खायन श्रौ. सू. ११।६।१, आश्वलायन श्रौ. सू. २।९।१४ गोमिल २.२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्रतुदक्षाभ्यामिति वा ? विश्वेभ्यो देवेभ्यः क्रतुदक्षेभ्य इति वा ? विश्वेभ्यो देवेभ्यः क्रतुदक्षसंज्ञोऽथ इति वा ? नाद्यः, विश्वदेवपदस्य बहुवचनान्तपदस्यैव दर्शनात्[१]। तत्र तत्र बहुवचनेन निर्देश्यत्वावगतेः। न द्वितीयोऽनन्वयात्। प्रयोगसाधुत्वेनान्वय इति चेन्न। उक्तगत्यार्थसाधुत्वसंभवे प्रयोगसाधुत्वकल्पनायोगात्[२]। न तृतीयः। क्रतुदक्षयोर्बहुत्वाभावात्। अतएव न चतुर्थः। संज्ञाशब्दान्तर्भावेण देवतात्वाभावाच्च। इष्टिश्राद्धं कर्माङ्गश्राद्धम्[३]। "**नानिष्ट्वा तु पितॄन् श्राद्धे कर्म वैदिकमाचरेत्**" इत्यनेनोक्तम्। "कर्माङ्गं नवमं प्रोक्तं" इत्युक्तं च। केचित्तु श्राद्धं प्रति रुचिश्चेत्[४]यनेन विहितमिष्टश्राद्धमिष्टिश्राद्धमित्याहुः। नैमित्तिकमेकोद्दिष्टम्। "**एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते**" इत्यभिधानात्। यद्यपि तत्र कात्यायनादिभिर्देवश्राद्धं निषिद्धं तथापि—

"**यस्मिन्नेव पुराणे च विश्वेदेवा न लेभिरे।**
आसुरं तद् भवेच्छ्राद्धं वृषलं मन्त्रवर्जितम्[५]॥"

इति वाक्यात् कस्यांचिच्छाखायां विश्वे[६]देवश्राद्धमस्तीति कालकामौ बोद्धव्यौ। निबन्धारस्तु नैमित्तिकपदं क्षयाहकालीनश्राद्ध[७]परम्। तत्र सपिण्डीकरणे साग्निकर्तृके अमावास्या प्रेतपक्षमतस्य क्षयाहश्राद्धे च[८] "अमावास्यायां क्षयो यस्य" इत्यादिवाक्याच्च पार्वणश्राद्ध[९]विधिरस्तीति। तत्र कालकामावित्याहुः। पितृहितकरण्यां तु नैमित्तिकपदं चन्द्रोपरागादि[१०]श्राद्धपरमित्युक्तम्। अत्र चाकारादिवकारान्तश्राद्धवशब्दः स्मृतिमहार्णवे, तत्त्वप्रकाशे,

---

१. श्रवणात् क
२. कल्पनाया अयोगात् ख
३. कर्मादिश्राद्धम् क
४. श्चैवे° ख
५. वृषलं······वर्जितम् क ×
६. विश्वे क ×
७. श्राद्ध क ×
८. अमावास्या······श्राद्धे च क ×
९. श्राद्ध क ×
१०. चन्द्रग्रहादि ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कल्पतरौ च लिखितः। युक्तं चैतत्। "पुरूरवसमाद्रवम्" इति शंख-तर्पणविधौ पाठाविवादात्। कामधेनौ तु[1] मकारादिः सकारान्तो माद्रवशब्द इति। पित्र्यं तु प्राचीनावीतिना भूमिनिहितवामजानुना दक्षिणामुखेन देवपूर्वकं कर्म कर्तव्यम्। विसर्जनं तु विपरीतम्। त्यागस्तु दक्षिणहस्ततर्जन्यङ्गुष्ठमध्यात्मकपितृतीर्थेन तिलजलसमेत-द्विगुणभुग्नकुशत्रयेण। अमुकगोत्रपितरमुकशर्मन्निति नामगोत्राभ्यां संबोधनेन च पितरमुद्दिश्य कर्तव्यः। एवं पितामहादावपि बोद्धव्यम्। न तु सपत्नीकस्य मिलितस्य वोद्देश्यत्वम्। "पित्रे पितामहाय प्रपितामहायेति" विष्णुवाक्यात् प्रत्येकमेव देवतात्वावगमात्। न च "पितृभ्यो दद्यादि"ति गौतमवचनात् मिलितानामेव विकल्पितं वास्त्विति वाच्यम्। "पितरिदं तेऽर्घ्यं पितामहेदं तेऽर्घ्यं प्रपितामहेदं तेऽर्घ्यम्[2]" इति वैजवापाद्यः[3]। "अमुकामुकगोत्रैतत् तुभ्यमन्नं स्वधा नमः" इति ब्रह्मपुराणयोर्नित्यवच्छ्रुतत्यागवाक्यविरोधात्। पितृभ्य इति बहुवचनस्य ज्ञानक्रियापेक्षयापि गर्गा भोज्यन्तामिति बहूपपत्तेर्नमूलान्तरैः[4]-कल्पनाविकल्पना च युक्ता। यदाहुश्चतुर्थी न देवतात्वमाह। किंतु कल्पनीयं तत्। तथा च[5] पितृभ्य इति स्वरसान्मिलितानामेव तत्कल्पनमिति[6]। तदपि[7] न। तथापि निरपेक्षोद्देश्यत्वावगमादुक्तैव विधा "यदग्नये च प्रजापतये[8]" चेत्यादौ नित्यवद् ग्राहकान्वयबलाच्चकारादिबलाच्चतुर्थीद्वयनिर्देश्यत्वरूपमेकमेव[9] देवता-

---

१. च क

२. प्रपितामह ·····अर्घ्यं ख ×

३. वैजवापगृह्यम् क

४. त्वनन्तेव क

५. तदापि क

६. तत् क ×

७. अपि ख ×

८. च······ये क ×

९. चकारद्वय° क

---

9 Cf. विष्णु ७३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वमिति दिक्[1]। यच्चैकब्राह्मणपक्षे मिलित[2]देवतात्वं बहुब्राह्मणपक्षे प्रत्येकमिति कैश्चिदुक्तं[3] तदपि प्रमाणाभावाद्धेयम्। किंच "असावेतत्ते यजमानस्य पित्रे," "असावेतत्ते यजमानस्य पितामहाय," "असावेतत्ते यजमानस्य प्रपितामहायेति" श्रुतिरेव बलवती प्रत्येकं देवतात्वं बोधयन्ती सर्वाः प्रत्यर्थिस्मृतीर्दूरमुत्सारयति। अतएव सपत्नीकस्यापि देवतात्वं निरस्तम्। विष्णवादौ केवलस्य पित्रादेर्देवतात्वावगमात्। श्रुतिविरोधाच्च। केचित्तु "अन्यत्र पतिना सह" इति वाक्यात् सपत्नीकस्य देवतात्वमाहुः। तन्न, उक्तदोषात्[4]। वाक्यस्याप्यस्य[5] राजाद्यलिखितत्वात्[6]। किं चैवं पत्युरेव सहत्वं स्यात् तथा श्रवणात् न पत्न्याः। अन्ये तु "**स्वेन भर्त्रा सह श्राद्धं माता भुङ्क्ते स्वधा-मयम्**" इति बृहस्पतिवचनात् सपत्नीकस्य देवतात्वं कल्पयन्ति। तन्मन्दम्, अर्थवादत्वात्। भुजे[7]श्चाविधेयत्वात्। सकलत्रत्वबोधाय विधिं परिकल्प्य लक्षणया विधिवाक्यभेदश्च स्वीकार्य इति चेन्न। सकल-त्रत्वस्यानावश्यकत्वात्। अर्थवादच्छेदप्रसंगाच्च। किं चार्थवाद-बलाद् द्रव्यं सपत्नीकपितृतृप्तिकामस्याधिकार इति प्रयोजनमप्यस्ति। यत्तु—

"सपिण्डीकरणादूर्ध्वं यत्पितृभ्यः प्रदीयते।
सर्वत्रांशहरा माता इति धर्मो व्यवस्थितः॥[8]"

इति शातातपवचनात् सपत्नीत्वस्य देवतात्वविधानम्, तदति-तुच्छम्, विपरीतसाधकत्वात्। तथाहि "पित्र्युद्देशेन त्यक्त एव द्रव्ये मातुरंशहरत्वमाह। न च—

१. दिक् क ×
२. मिलितानामेक ख
३. कल्पितं ख
४. उत्तरत्वात् ख
५. अप्यस्य ख ×
६. भूपालाद्यलिखनाच्च ख
७. भुक्ते ख
८. इति······व्यवस्थितः क ×

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"न[1] योषिद्भ्यः पृथग् दद्यादवसानदिनादृते ।
स्वभर्तृपिण्डमासाद्य तृप्तिरासां यतः स्मृता ॥"

इति छन्दोगपरिशिष्टवाक्ये पृथग्दाननिषेधादपृथग्दानमस्तीति मतं युक्तम् । यतोऽपृथग्दानं वाक्यान्तरादस्मादेव वाक्याद्वा । नाद्यस्तदभावात् । अन्यथा तदेवोपन्यसनीयं स्यादा[2]वश्यकत्वात् । नापरस्तद्बोधकपृथक्[3]पदाभावात् । पृथक्पदवैयर्थ्याय कल्प्यत इति चेन्न । परस्परानुकूलार्थद्वयपरत्वे वाक्यभेदापत्तेः । तात्पर्यगौरवादर्थवादत्वेनाप्युपपत्तेः । अव्ययानां हि[4] क्वचिदर्थत्यागोऽपि यावदुक्तः[5] । किञ्च सपत्नीकस्य देवतात्वे स्वभर्तृपिण्डमात्रेभ्य इति न स्यात्, सापेक्षत्वेन समासाभावात् । तत्सिद्धं पित्रादीनां पत्नीरहितानां च[6] प्रत्येकमेव[7] देवतात्वमिति[8] ।

ननु क एते पितरो नाम येभ्यो दत्तमिहाक्षयं भवति । वसवः पितरो रुद्राः पितामहा आदित्याः प्रपितामहास्तेभ्यो दत्त[9]मक्षयं [10]भवति । "**य एवं विद्वान् यजते पितॄन्**[11] **वसवो रुद्रा आदित्यास्तस्य प्रीता भवन्ति**" इति पैठीनसिवचनात्[12] वस्वादीनां देवतात्वम् । मैवं पूर्वोक्तश्रुत्यादिप्रमाणविरोधात् । तस्मात् पित्रादयो वस्वादिवन्मान्याः । मनागप्यनादरो न कार्य[13] इत्येवं परमिदं वाक्यम् । यद्वा य एवं विद्वान् इत्यादि[14]वाक्यस्वरसात् श्राद्धकाले पित्रादयो वस्वादिरूपेण ध्येयाः । तथा सति वस्वादयोऽपि प्रीयन्त इति वाक्यार्थः । अत एव सपिण्डीकरणान्तरं मत्स्यपुराणम्—"**ततः**

---

१. न ख×
२ स्याद् ख×
३. पृथक् ख×
४. हि क×
५. वक्तव्यः क
६. च क×
७. एव ख×
८. इति क×
९. इह ख+
१०. न ख+
११. पितॄन् क×
१२. वाक्यात् ख
१३. कर्त्तव्य ख
१४. इति ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पितृत्वमापन्नः सर्वत्र श्राद्धभाग्भवेत् ।" एवं च[१]—

"सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः ।
वैश्यानामाज्यपा नाम शूद्राणां तु[२] सुकालिनः ॥"

इति मनुरपि न सोमपादीनां ब्राह्मणादिपक्षे देवतात्वमाह । किन्तु पित्रादीनां सोमपादिवदादरणीयत्वं [३]स्तुतिमात्रत्वं वा । इह केचित् श्राद्धवाक्येऽमुकस[४]गोत्रास्मत्पितरिति सकारप्रयोग[५]मस्मत्प्रयोगं च कुर्वन्ति[६] । तदुभयमनुपपन्नं[७] प्रमाणाभावात् । वैपरीत्यस्यावगमात्[८] । तथाह्य[९]मुकामुकगोत्रेत्यादि ब्रह्मपुराणवाक्ये सकारं विनैव गोत्रनिर्देशः[१०] । पितरिदं तेऽर्घ्यमित्यादि[११]वैजवापवाक्येऽस्मतपदं विहायैव[१२] निर्देशः । न चैवं पितृत्वेनोद्देश्यत्वमन्यपितुरपि देवतात्वमापद्येत । सम्बन्धिशब्दत्वेन प्रतीतयजमानापेक्षत्वात् । तस्मादमुकगोत्रपितरित्यादिरूपमेव वाक्यं सर्वत्र कार्यम् । इह च[१३] यद्यपि मन्वादिभिर्मातामहादिश्राद्धं नोक्तं तथापि "त्रींस्त्रीनपि पिण्डानवनिज्य दद्यात्" इति कात्यायनवाक्यात्[१४]

"प्राङ्मुखान्भोजयेद् विप्रान् देवानामुभयात्मकान् ।
पितृमातामहादीनां भोजयेच्चाप्युदङ्मुखान् ॥"

---

१. च ख×
२. तु क×
३. ध्येयत्वं ख+
४. अमुकामुक क
५. प्रयोगं क×
६. पदं च प्रयुञ्जन्ति क
७. अयुक्तम् ख
८. च ख+
९. तथाहि ख×
१०. प्रयोगः क
११. इति ख
१२. पितृपदेनैवोद्देश्यत्वे ख
१३. च क×
१४. वचनात् क

2–3 Cf. मनु ३.१९७
16–17 Cf. विष्णुपुराण ३।१५।१५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति विष्णुपुराणवचनाच्च[1] मातामहादीनामपि[2] श्राद्धमावश्यकम्। केचित्तु गृहीतमातामहस्य पुत्रिकापुत्रस्य च मातामहादिश्राद्धमावश्यकमन्यस्य त्वनियमः। यदि च नैवं तदा—

"दौहित्रोऽप्यखिलं रिक्थमपुत्रस्य हरेद्यदि।
स एव दद्याद् द्वौ पिण्डौ पित्रे मातामहाय च॥"

इति मनुवाक्यं विशेषबोधकमनुपपन्नं स्यात्। पुत्रिकाकरणं च विफलमापद्येत। अत एव बौधायनः—

"पुत्रिकायां न यो जातो यो वा रिक्थं न विन्दति।
न कुर्यादथवा कुर्यान्मातामहपुरस्सरम्॥"

इत्याहुः। नन्वन्वष्टकायां[3] पिण्डपितृयज्ञे च यत्र पिण्डत्रयमात्रमेव[4] विधीयते[5] तद्विषयं मनुवचनम्। पुत्रिकाकरणमपि तत्रैव सफलम्। अत एव छन्दोगपरिशिष्टे कात्यायनः।

"मातुः प्रथमतः पिण्डं निर्वपेत् पुत्रिकासुतः[6]।
द्वितीयं तु पितुस्तस्यास्तृतीयं तु पितुः पितुः॥"

अन्ये तु मातामहैकोद्दिष्टे पुत्रिकाकरणसाफल्यमित्याहुः। यच्च बौधायननाम्ना लिखितं वचनं तद् राजाद्यलिखितत्वान्[7] नास्मासु प्रत्ययमावहति। तच्च मातामहादिश्राद्धं पित्रादिश्राद्धेन सममेकप्रयोगतापन्नम्। यदाह[8] याज्ञवल्क्यः—

"द्वौ दैवे पितृकृत्ये त्रीण्येकैकमुभयत्र यवा।
मातामहानामप्येवं तन्त्रं वा वैश्वदेविकम्॥"

---

१. वाक्याच्च ख
२. तेषामपि क
३. तन्न ख
४. मात्रं क ×
५. दीयते क
६. यतः क
७. राजादिभिरलिखनत्वात् ख
८. यत् ख

4–5 Cf. मनु ९.१३२
19–20 Cf. याज्ञवल्क्य १. २२८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तन्त्रता[1] हि नैकप्रयोगं विनेत्येकप्रयोगतावगम्यते। इयं च तन्त्रता निमन्त्रणमात्रवाक्यगोचरा[2] निमन्त्रणमुपक्रम्यैव कथनात्[3]। ततः पित्रादिश्राद्धाङ्गभूतविश्वदेवश्राद्धार्थं मातामहादिश्राद्धाङ्गभूतविश्वदेवश्राद्धार्थं च न भिन्नभिन्नब्राह्मणनिमन्त्रणं, किन्तूभयोद्देशेनैकमेव निमन्त्रयेदिति[4] वाक्यार्थः। न तु वैश्वदेविकं श्राद्धमेवैकं[5] न तु[6] पृथगिति वचनार्थः[7] प्रमाणाभावात्।

"पूरयेत् पात्रयुग्मं तु स्थाप्य दर्भपवित्रकम्[8]"

इति मत्स्यपुराणविरोधात्। न च तन्त्रताया वैकल्पिकत्वादस्य दानतन्त्रता तदा पात्रयुग्मपूरणमिति वाच्यम्। नित्यवच्छ्रुतत्वात्। अत एव न्यायादपि वैश्वदेविकश्राद्धस्य तन्त्रता। याज्ञवल्क्यसूचितामेकप्रयोगतां विष्णुपुराणं व्यञ्जयति—

"पृथक्तयोः केचिदाहुः श्राद्धस्य करणं नृप।
एकत्रैकेन पाकेन वदन्त्यन्ये महर्षयः॥"

इति। यद्यप्यत्र पक्षद्वयमुपन्यस्तं[9] तथापि प्रथमः पक्षः पूर्वपक्षतया द्वितीयस्तु[10] सिद्धान्ततया, महर्षय इति सपुरस्कारमभिधानात्। तत्र चैकस्मिन् प्रयोगे जपावाहनतिलविकिरणाग्नौकरणानधिकरणक्रतुनमस्कारादिमङ्गजातं तन्त्रेणैवानुष्ठेयम्। नन्वावाहनं देवतास्मरणरूपं दृष्टार्थमेव, अतः पृथगेव मन्त्रो हि नानुष्ठेयः। मैवमावाहनस्य तिलविकरणादिपदार्थव्यवधानेनानुष्ठेयत्वात्। नैतज्जनिता स्मृतिस्त्यागकालपर्यन्तमनुवर्तते। अतो न दृष्टार्थता। अथवा भवतु

१. इति ख+
२. °विषया ख
३. अश्रुतेः क
४. निमन्त्रयेत् ख×
५. श्राद्धम् क×
६. तु क×
७. वाक्यार्थः क
८. °पवित्रके ख
९. °मपि क
१०. अन्तिमस्तु ख

12–13 Cf. विष्णुपुराण ३।१५।१६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[1]दृष्टार्थता। तथापि न पृथगनुष्ठानम्। तथाह्यावाहनमन्त्रवर्ति-बहुवचनान्तपितृपदं लक्षणया वा बहुवचनस्य सार्थकतया वा पित्रादीन् मातामहादीन् त्रीनपि वक्तुं शक्नोति। अत एव

“षड्भ्यः पितृभ्यस्तदनुश्राद्धदानमुपक्रमेत्[2]”

इति कात्यायनवचनेन[3] षट्सु पितृपदं प्रयुक्तम्। वस्तुतस्तु पितृपदं जनकत्वेन रूपेण षट्पुरुषान् मुख्यतयैव वदति षण्णामपि जनकत्वात्। सम्बन्धिशब्दाद् यजमानापेक्षयैव जनकता प्रतीयत इति चेन्न। सर्वेषामेकस्य वा। आद्येऽयोगत्वं, द्वितीये त्वनुमतिरेव। नन्वेवं सर्वत्रैव[4] पितृपदेन[5] मातामहादीनामपि प्रकाशनसंभवात्[6]—

“मातामहानामप्येवं श्राद्धं कुर्याद् विचक्षणः।
मन्त्रोहेन यथान्यायमन्येषां मन्त्रवर्जितम्॥”

इति विष्णुवचनं निरवकाशमापद्येत। न। “शुन्धन्तां पितरः शुन्धन्तां पितामहाः शुन्धन्तां प्रपितामहाः” इति मन्त्रे सावकाशत्वादत एवान्येषां मन्त्रवर्जितमिति निषेधोऽप्यस्यैव मन्त्रस्य पितृव्यमातुलादिश्राद्धे न तु मन्त्रान्तरस्य प्रसङ्गः। ननु विशेषितविष्णुवचनादेव सर्वत्रैव मन्त्रोहोऽस्तु। मैवम्, यथान्यायमित्यभिधानादुक्तन्यायाच्च, शुन्धन्तामित्यादिमन्त्र एव पितरीत्याद्यूह इति। नन्वेवं वचनमनर्थकं स्यात् न्यायादेव प्राप्तत्वात्। न, न्यायमूलानामपि स्मृतीनां दर्शनादूहन्यायस्यातिदुरूहत्वात् शीघ्रबोधकतया न्यायाभिज्ञान् प्रति, न्यायानभिज्ञान् प्रति तु बोधकतयैव वचनसाफल्यात्। ननु यथान्यायमूहं कथं न्यायानभिज्ञः प्रत्येति।

---

१. वा क+ २. अप॰ क
३. वचनेन ख× ४. सर्वत्र ख×
५. ॰पदेनैव ख ६. संभवेन क

10–11 Cf. विष्णुस्मृति ७५
12–13 Cf. पितृभक्ति of श्रीदत्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उच्यते। अत्र न्यायाधीन ऊहोऽस्तीति ज्ञाने जिज्ञासाया: प्राप्तावितः प्रत्येति। महार्णवप्रकाशे तु न्यायप्राप्तेऽप्यूहे एकप्रयोगतयानुशंकानिरासार्थं वचनमित्युक्तम्। शुन्धन्तामित्यादिमन्त्रश्चायमवनेजनप्रत्यवनेजनयोराश्वलायनेन[१] दर्शितः। अत ऋग्वेदिनामेवैष बोद्धव्यः। पितृवल्लभायां तु उक्तविष्णुवाक्याद्दूहेन मातामहादावावाहनादिमन्त्रपाठोऽपि पृथगुक्तः। अत्र केचित् पित्रादिश्राद्धाङ्गतया सनकादिसप्तमनुष्यश्राद्धमिच्छन्ति। तन्न, प्रमाणाभावात्। ननु "अतिथिर्यत्र नाश्नाति तच्छ्राद्धं न प्रशस्यते" इति यमवचनं प्रमाणमस्ति, मैवम्। अतिथिपदस्य लोके स्मृतिषु चागन्तुकविशेष एव[२] प्रयोगात्। "एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः" इत्यादिस्मृतिभिस्तस्यैव लक्षितत्वाच्च[३]। सनकादिपरत्वे हेत्वभावाच्च। किं चैवं मुख्यार्थता स्यात्। तस्माद् यः कश्चिदतिथिलक्षणोपेतो भोजनार्थी श्राद्धवेलायामायाति स भोजयितव्य[४] इति वाक्यार्थः। अत एव मनुः—

"ब्राह्मणं भिक्षुकं चापि भोजनार्थ[५]मुपस्थितम्।
ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत्॥"

न च—

दर्भांश्चैवासने दद्यात् न तु पानौ कदाचन।
पितृदेवमनुष्याणामेवं तृप्तिर्हि शाश्वती॥"

इति कात्यायनवचनात् सनकादिश्राद्धमिति वाच्यम्, अर्थवादमात्रत्वादन्यथा वाक्यभेदप्रसङ्गात्। तस्मात् न केवलं देवानां

१. आश्वलायने क
२. एव ख ×
३. लिखितत्वात् क
४. भोजनीय क
५. श्राद्धकालम् क

10 Cf. मनु ३.१०२
15–16 Cf. मनु ३.२४३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पितॄणां च[१] शाश्वती तृप्तिरपि तु मनुष्याणामपि श्राद्धिकब्राह्मणानां, यद्वा मनुष्याणां श्राद्धकर्तॄणां लोकान्तरे शाश्वती तृप्तिरिति स्तुतिः। यच्च मत्स्यपुराणे आख्यायते—

"द्वौ देवौ ब्राह्मणौ कृत्वा पित्रे त्रींस्तु द्विजोत्तमान्।
तत्रैकमतिथिं कृत्वा श्राद्धदः स्वयमेव च॥"

इति तदपि[२] सनकादिश्राद्धे न[३] प्रमाणम्। अतिथिपदं ह्यगौणं श्राद्धशेषभोक्तरीष्टे वर्तते। अन्यथा इष्टैः सह भुङ्क्ष्वेति नियोगो न कृतः स्यात्। प्रयुक्तं चातिथिपदं श्राद्धशेषभोक्तरि मत्स्यपुराणे।

"भुञ्जीतातिथिसंयुक्तः सर्वं पितृनिषेवितम्"

इति। न चातिथिपदमत्र मुख्यार्थपरमेव तस्यानित्यतया[४] नित्यवच्छ्रुतिविरोधात्। तस्माद्यथातिथिरादरातिशयेन भोज्यते, तथेष्टोऽपि श्राद्धशेषं भोजयितव्य इत्यभिप्रेत्यातिथिपदं गौणं[५] प्रयुक्तम्। ततश्चातिथिं कृत्वा श्राद्धशेषभोक्तारं परि[६]कल्प्येत्यर्थः[७]। भवदीयपक्षेऽप्यतिथिं कृत्वातिथिं श्राद्धभोक्तारं परिकल्प्येत्यन्वयस्ततश्चामुख्यार्थतैवेत्यलमतिप्रसंगेन[८]।

सम्प्रति प्रयोगात् पूर्वभूतानि[९] श्राद्धदिने[१०]ऽपराह्णकृत्यानि लिख्यन्ते।

श्राद्धिब्राह्मणान् तान् द्विजेनाहूतान् प्राङ्गणे शुचितः शुक्लद्विवासाः प्राञ्जलिः दर्भे तिष्ठन् स्वागतमिति पृच्छेत्। सुस्वागतमिति

१. दर्भाश्चैवासने (पृ: १७)···च क×
२. न ख+
३. न ख×
४. तस्य नित्यतया क
५ गौणमतिथिपदं ख
६. कृत्वा क
७. त्यन्वयः ख
८. विस्तरेण ख
९. °कृतानि क
१०. श्राद्धदिने ख×

4–5 Cf. मत्स्यपुराण २०.८-९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रतिवचनम्। ततः[१] प्रागुपलिप्तायां भूमौ पीठाद्यासने च देवब्राह्मणान् प्राङ्मुखान् पितृब्राह्मणानुदङ्मुखानुपवेश्य सविनयं वारं वारमभिनन्द्य तेषां पादौ प्रक्षालयेत्। ततः स्वयमाचम्य तांश्चाचामय्य विश्वेदेवा इदं पादार्घ्यं वो नम इति पुष्पोदकाभ्यां देवद्वये[२] पादार्घ्यं दत्वा, अमुकगोत्रपितरमुकशर्मन्निदं पादार्घ्यं तुभ्यं[३] स्वधेति पितृब्राह्मणपादयोरर्घ्यं दद्यात्। एवमेव पितामहादिभ्यस्तदीयब्राह्मणपादेषु दद्यात्। ब्राह्मणेभ्य एव पाद्यदानं न तु पित्राद्युद्देश्येनेति केचित्। यदि च पूर्वनिमन्त्रणं न कृतं[४] स्यात् तदा पूर्वोक्तविधिना निमन्त्रणं कृत्वोक्तविधिना पादप्रक्षालनादिकं दद्यात्[५]। ततः श्राद्धदेशं गत्वात्राभिप्रायेण सिद्धमित्युक्त्वा पूर्वस्थापितान्यासनानि[६] स्पृष्ट्वा अत्रास्यध्वमिति वदन् [७]दक्षिणहस्ते धृत्वा [८]तानुपवेशयेत्। देवब्राह्मणान् प्राङ्मुखान् पितृब्राह्मणानुदङ्मुखान्। देवब्राह्मणेषु यः[९] स्यादुत्कृष्टस्तं पूर्वमुपवेशयेत्। एवं पितृब्राह्मणेषु तेषां पादयोरधस्ताद् दक्षिणाग्रकुशत्रयं दद्यात्। प्रत्यासनसमीपं[१०] च तिलतैलेन श्राद्धसमाप्तिपर्यन्तं स्थायिनो[११] दीपान् दद्यात्। श्राद्धसमाप्तिपर्यन्तं[१२] तेषां चोत्तेजनादि[१३] श्राद्धिब्राह्मणैरेव कर्तव्यम्। गौरसर्षपाक्षतनेपालकम्बलकृष्णाजिनत्रिदण्डत्रिराजतपात्रखड्गिललाटजातशृङ्ग[१४]गौरकृष्णारण्यत्रिविधकृष्णछागान् यथाशक्ति श्राद्धदेशे संनिधापयेत्। काककुक्कुरविडालविटवराहवृषलवृषलीपतिषण्डखञ्जरजस्वलात्रुटितकर्णगणिका वा विकलकुष्ठि[१५]-

---

१. ततः क ×
२. प्राङ्मुखान्…देवद्वये ख ×
३. ते ख
४. कृतं क ×
५. कुर्यात् ख
६. 'तृप्तान्या' ख
७. तेषु ख +
८. तान् क ×
९. यः स्यात् क ×
१०. °समीपे ख
११. श्राद्ध…स्थायिनो क ×
१२. श्राद्ध…पर्यन्तं ख ×
१३. उत्तेजनानि क
१४. शृङ्ग क ×
१५. विकलकुष्ठि क ×

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

काणश्वित्रिदात्रप्रैष्ययूनाङ्गातिरिक्ताङ्गं पतितान्त्यजाति[१] श्राद्धदेशादपसारयेत्। यथा चैते[२] श्राद्धं न[३] पश्येयुस्तथा कुर्यात्। श्राद्धदेशावरणं च कुर्यात्। श्राद्धद्रव्याणि सिञ्चेदाचारात्पुण्डरीकाक्षस्मरणेन।

अथ प्रयोगः

तत्र[४] प्राङ्मुख उपविष्टः कुशत्रयतिलजलान्यादाय[५] दक्षिणहस्तेन "ओं[६] अद्य पार्वणश्राद्धमहं करिष्ये" इति शिष्टाचार[७]परिप्राप्तं[८] वाक्यं कृत्वा "ओं[९] कुरुष्व" इति ब्राह्मणेनैवानुज्ञातो गायत्रीं जपित्वा—

"ओं देवताभ्यः पितृभ्यश्च महायोगिभ्य एव वा।
नमः स्वधायै स्वाहायै नित्यमेव भवन्त्विति॥"

इति त्रिर्जपेत्। ततो देवब्राह्मणासनो[१०]परिगतं प्रागग्रकुशत्रयात्मकमासनमेकं पित्रादिदेवेभ्योऽन्यो मातामहादिदेवेभ्यो दत्वा द्विगुणभुग्नकुशत्रयात्मकान्यासनानि पित्रादिब्राह्मणासनपरिगतानि दक्षिणायां दिशि पित्रादिभ्यः[११] प्रत्येकमुत्सृजेत्। ततो विश्वान् देवानहमावाहयिष्य इति पृष्टे आवाहयेत्यनुज्ञातो विप्राङ्गुष्ठं गृहीत्वा—

"ओं विश्वेदेवास आगत

---

१. अभिशप्त ख+ | २. न ख+
३. न ख× | ४. तत्र क×
५. आदाय ख× | ६. ओं ख×
७. शिष्ट° ख× | ८. °परिप्राप्तं ख×
९. ओं ख× | १०. °ब्राह्मणशासनो° ख
११. पित्रादि देवेभ्यो··· पित्रादिभ्यः ख×

10–11 Cf. ब्रह्मपुराण २२०.१४३

18–2 (p.21) Cf. ऋग्वेद ४।८।१५, शुक्लयजुर्वेद ७.२४, आश्वालायन श्रौ. सूः २।९।१४, शाङ्खायन श्रौ. सूः १०।११।८, गोभिल २.२, कात्यायन २

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शृणुतामेमं हवम्
एदं बर्हिः निषीदत"

इत्यावाह्य यवान् विकीर्य

"ओं विश्वेदेवाः शृणुतेमं हवं मे
ये अन्तरिक्षे य उपद्यविष्ठ
ये अग्निजिह्वा उत वा यजत्रा
आसद्यास्मिन् बर्हिषि मादयध्वम् ।"

"ओं ओषधयः समवदन्ते सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्तं वाजश्रावयामास ॥"

इति पठेत् । यस्तु पिशाचादिभ्यः श्राद्धं रक्षितुं विश्वेदेवाः स्वयंभुवा सृष्टा इत्युत्पत्तिं पुरूरवप्रभृतीनां[1] च नाम[2] न जानाति स—

"ओं आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ।
ये यत्र योजिता श्राद्धे सावधाना भवन्तु ते ॥"

इति पठेत्[3] । ततः "ओं पितॄनावाहयिष्ये" इति पृष्टे "आवाहय" इत्यनुज्ञातः—

"ओं उशन्तस्त्वा निधीम-
ह्युशन्तः समिधीमहि
उशन्नुशत आ वह
पितॄन् हविषे अत्तवे ।"

---

१. प्रभृति क
२. नाम च क
३. अपि पठित्वा

4–7 Cf. ऋग्वेद ४।८।१६, शुक्लयजुर्वेद ३३.५३, आश्वलायन श्रौ. सू: ३।७।१०, शाङ्खायन श्रौः सूः ८।२।१९, गोभिल २.३, कात्यायन २

8–9 Cf. ऋग्वेद ८।५।११, शुक्लयजुर्वेद १२.९६

14 Cf. गोभिल २।४

16–19 Cf. ऋग्वेद ७।६।२२, शुक्लयजुर्वेद १९.७०, आपस्तम्ब श्रौः सूः ८।१४।१८, गोभिल २.५, कात्यायन २

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"ओं एत पितरः सोम्यासो
गम्भीरेभिः पथिभिः पूर्विणेभिः
दत्तास्मभ्यं द्रविणेह भद्रं
रयिं च नः सर्ववीरं नियच्छत ।"
"ओं आ यन्तु नः पितरः सोम्यासो-
ऽग्निष्वात्ताः पथिभिर्देवयानैः
अस्मिन् यज्ञे स्वधया मदन्तो-
ऽधि ब्रुवन्तु तेऽवन्त्वस्मान् ।"

इत्यावाह्य "ओं अपहता असुरा रक्षांसि वेदिषदः" इति तिलान् विकीर्य यज्ञीयवृक्षचमसेषु सौवर्णेषु देववर्जं[1] राजतेषु ताम्रेषु[2] गण्डकशृंगनिर्मितेषु मणिमयेषु पात्रेषु पत्रपुटेषु वा अग्रस्वनखच्छिन्न[3]मनन्तगर्भिणं साग्रं प्रादेशमात्रमिति कुशपत्रद्वयात्मकं पवित्रमेकैकमुपरि धृत्वा,

"ओं शन्नो देवीरभिष्टये
शन्नो भवन्तु पीतये
शं योरभि स्रवन्तु नः ।"

इति प्रत्येकं[4] जलं प्रक्षिप्य "ओं यवोऽसि यवयास्मद्द्वेषो यवयारातीः" इति देवपात्रद्वये[5] यवान् प्रक्षिप्य,

---

१. दैव° ख
२. ताम्रं ख
३. छिन्ना ख
४. प्रत्येकं क ×
५. प्रत्येकं ख +

5–8 Cf. शुक्लयजुर्वेद १९.५८, गोभिल २.५
9 Cf. मन्त्रब्राह्मण २।३।२३, शुक्लयजुर्वेद २.२९, खादिर ३।५।१३, गोभिल २.६, कात्यायन २
14–16 Cf. ऋग्वेद ७।६।५, शुक्लयजुर्वेद ३६।१२, आश्वलायन गृः सूः ४।७।८, गोभिल २.८, कात्यायन २
17–18 Cf. गोभिल २.९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'ओं तिलोऽसि पितृदेवत्यो
गोसवो देवनिर्मितः ।
प्रत्नमद्भिः पृक्तं स्वधया
पितॄन् लोकान् प्रीणाहि नः स्वाहा[१] ॥"

इति पित्रादिषट्पात्रेषु[२] तिलान् प्रक्षिप्याष्टपात्रस्था आपो गन्धैः पुष्पैश्च संयोज्य वामहस्तेन पित्रादिदेवार्घपात्रमादाय तत्र सुपवित्रमुदकान्तरं च तदेव ब्राह्मणकरे[३] दत्त्वा[४]—

"ओं या दिव्या आपः पयसा संबभूवु-
र्या अन्तरिक्षा उत पार्थिवीर्याः ।
हिरण्यवर्णा यज्ञियास्ता न ह्यापः
शिवाः संश्योनाः सुहवा भवन्तु ॥"

इति पठित्वा "ओं विश्वे देवा इदमर्घ्यं वो नमः" इति अर्घ्यं[६] दद्यात् । एवमेव मातामहादिदेवविप्रकरे तदीयपात्रेण[७] दद्यात् । ततः "ओं[८] अद्यामुकगोत्र पितरमुकशर्मन्निदं तेऽर्घ्यम्" । **"ये चात्र त्वामनु यांश्च त्वमत्र[९] तस्मै ते स्वधा"** इति पितृविप्रकरे पूर्ववदर्घ्यं दद्यात् । एवमेव पितामहादिपञ्चकविप्रकरेषु[१०] तदीयनामगोत्रपात्रैर्दद्यात् । ततः पितामहप्रपितामहपात्र[११]द्वयस्थजलतिल[१२]गन्धपुष्पपवित्राणि पितृपात्रे स्थापयित्वा पुत्रकामः पितृपात्रस्थाभिरद्भिर्मुखं[१३] स्पृशेत् । "ओं पितृभ्यः स्थानमसि" इति पितृब्राह्मण[१४]वामपार्श्वे पितृपात्रमधोमुखं स्थापयित्वा तदुपरि पितामहपात्रं तदुपरि

---

१. स्वधा ख
२. °षट्के क
३. °हस्ते क
४. धृत्वा क
५. आन्त° ख
६. अर्घ्यं क ×
७. तदीयपात्रेण ख ×
८. ओं ख ×
९. °नु ख
१०. °करे क
११. पितामहप्रपितामाह क ×
१२. तिलजल° ख
१३. द्वयं क
१४. विप्र क

1–4 Cf. आश्वालायन गृः सूः ४।१।८, गोभिल २.१०, कात्यायन २
8–11 Cf. आश्वलायन गृः सूः ४।७।१३, गोभिल २.१५, कात्यायन २

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रपितामहपात्रं स्थापयेत् । एवमेव मातामहादिपात्राणि तद्[१]ब्राह्मण-वामतः स्थापयेत्[२] । एवं स्थितानि पात्राणि दक्षिणादानपर्यन्तं[३] न चालयेन्नोद्धरेत् । अत्र च[४] प्रथमे पात्रे संस्रवान् समवनीयेति कात्यायनीयं संस्रवपदं विप्रहस्तस्रुतजलपरं इति निबन्धारः । कर्कभाष्ये तु संस्रवपदमर्घपात्रस्थशेषीभूतजलपरमित्युक्तम् । युक्तं चैतत् शेषप्रतिपत्तेरपेक्षितत्वात् । इमं चार्थं शुक्रमन्थिग्रहप्रचारे "संस्रवमवनयति स्रुतशेषं निक्षिपती"ति व्याचक्षाणः कात्यायन एव स्फुटमुक्तवान् । "हुत्वा हुत्वैतासामाहुतीनां संस्रवमादायैनां मूर्धन्यभिषिञ्चती"ति पारस्करे संस्रवपदशेषवाचित्वं सर्वसिद्धमिति । एवं "शेषं दर्भेष्ववनेजयतीति" वैजवापोक्तं शाखान्तरविषयमिति । ततः "ओं विश्वेदेवा एतानि गन्धपुष्पधूपदीपताम्बूलयज्ञोपवीताच्छादनानि वो नमः" इत्युभयत्र गन्धादि दत्त्वा "ओं अद्यामुकगोत्र पितरमुकशर्मन्नेतानि गन्धपुष्पधूपदीपताम्बूलयज्ञोपवीता[५]च्छादनानि" "ये चात्र त्वामनु यांश्च त्वामनु[६] तस्मै स्वधा" इत्यादिना[७] पित्रे[८] गन्धादिकं[९] दत्त्वा एवमेव प्रपितामहादिभ्यः[१०] पञ्चभ्यो दत्त्वा "अयं वो गन्धः, इदं वो माल्यम्" इति क्रमेण प्रत्येकं विप्रेभ्यः प्रतिपादयेत् । तैश्च शिखावर्जमन्यत्र माल्यं न धार्यम् । गन्धे अगुरु[११]श्वेतचन्दनकुंकुमकर्पूरपद्मकेशराणि विहितानि, तदभावे अन्यदपि निषिद्धवर्ज्यं[१२] देयम् । पुष्पाणि च श्वेतानि पद्मोत्पलानि प्रकृष्टगन्धवर्णान्यन्यान्यपि प्रशस्तानि[१३] । अर्कभाण्डीरपीतम्लानकृमिकीटकेशादिदुष्टोग्रगन्धनिर्गन्धि[१४]चैत्यवृक्ष[१५]जातर-

१. तद् क ×
२. स्थापयेत् ख ×
३. दक्षिणा…पर्यन्तं ख ×
४. च क ×
५. ताम्बुल…वीतं ख ×
६. त्वामनु ख ×
७. इति क
८. पित्रे ख ×
९. गन्धादि ख
१०. पितामहादिभ्यः क
११. गुग्गुल° क
१२. निषिद्धवर्ज्यं क ×
१३. शस्तानि क
१४. °निर्गन्ध° क
१५. °वृक्ष° क ×

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्तवर्णकण्टकिजानि न देयानि। जलजं रक्तमपि सितं सुगन्धि-कण्टकिजमपि देयम्। धूपं तु[1] घृतयुक्तं[2] मधुयुक्तं वा गुग्गुलं सिल्हकं घृताभिघारितं चावाहयेत्[3]। तदभावेऽन्यदपि। न केवलं दुष्टतृण[4]-धूप[5]गुग्गुलं, जीवजं वर्ज्यम्[6]। दीपे तु[7] घृतं तिलतैलं वा देयम्। असम्भवेऽन्यदपि। न तु प्राणिभवः स्नेहः। वस्त्रमनङ्गलग्नं देयम्। संपत्तौ युग्मम्। उपवीतं तु फलार्थमिति[8] नावश्यकम्। अन्यान्यपि फलार्थानि ताम्बूलादीनि।

"लोके श्रेष्ठतमं यच्च[9] आत्मनश्चापि यत् प्रियम्।
सर्वं पितॄणां दातव्यं तदेवाक्षयमिच्छता[10]॥"

इत्यादिवायुपुराणविहितान्यन्यस्मिन्नेवावसरे देयानि। दत्त्वा नीवार-चूर्णैर्गौरमृत्तिकया वा प्रणीताग्निभस्मना, असम्भवे वारिणा वा[11] ब्राह्मणान् वेष्टयित्वा मण्डलानि कार्याणि। व्यञ्जनादिपात्रधारणार्थं तु मण्डला-नीति केचित्। अथ व्यञ्जनं क्षारवर्जं घृताक्तमन्नमुद्धृत्य पृच्छति "अग्नौ करिष्य" इति। "कुरुष्वे"त्यनुज्ञातः[12] साग्निस्तृट्क्रोधत्वरा-रहितः सधूमत्वादिदोषरहिते "यथोक्तमि"त्युक्ते दक्षिणाग्नौ तदभावे आवसथ्याग्नौ कांस्यपात्रस्थमवदाय मेक्षणेनाहुतिद्वयं दद्यात्[13]।

"ओं स्वाहा अग्नये कव्यवाहनाय[14]।
ओं सोमाय पितृमते स्वाहा॥"

---

१. तु क ×
२. °प्रचुरं ख
३. दद्यात् क
४. घृतं वस्त्रं क
५. धूप क ×
६. जीवकं च सर्वम् क
७. तु क ×
८. इति क ×
९. प्रोक्तम् ख
१०. सिद्धता ख
११. वा क ×
१२. °त्युक्तः ख
१३. दध्यात् क
१४. ओं···°वाहनाय ख ×

8–9 Cf. वायुपुराण ८०.२
17–18 Cf. शुक्लयजुर्वेद २.२९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति[१] स्वाहान्तो होमः, पश्चान्मन्त्रसमापनम्। निरग्निस्त्वाभ्यामेव मन्त्राभ्यां पितृब्राह्मणहस्ते जले वा आहुतिद्वयं दद्यात्। ततोऽग्नौकरणशेषं देवपूर्वं पितृपात्रेषु दद्यात्। तदुक्तं[२]—

"अग्नौ करणशेषं तु पित्र्येऽपि प्रतिपादयेत्।
प्रतिपाद्य पितॄणां च न कुर्याद् वैश्वदेविके॥"

केचित्तु पित्रे त्विति पठन्ति। प्रतिपाद्येत्यादेश्चायमर्थः पितृभ्यो दत्त्वा देवेभ्यो न दीयते। अग्नौकरणहोमः सोमादिद्वारा पितृतृप्त्यर्थं एव। "अग्नौ हुतेन सोमस्था" इत्यभिधानात्। ततोऽग्नौकरणशेषं देवेभ्यो न[३] देयमिति चाहुरिति। अग्नौकरणशेषं तु पिण्डार्थं चावशेषयेत्[४]। तत उष्णस्निग्धमन्त्र[५]सुसंस्कृतमिष्टान्नेन[६] पूर्णं[७]ताम्रपात्रादि पात्रेणादाय[८] कराभ्यां गृहीत्वा पितॄन् ध्यायन् विप्रान्तिके शनकैः स्वयं[९] निक्षिपेत्। तत्समीपे भूमावेव व्यञ्जनादिपात्राणीदं मधु इदं लवणमिदमम्लमिति माधुर्यादीन्[१०] व्यञ्जनगुणान् कीर्तयन् स्थापयेत्। अनवस्रावितं घृतं मांसं च यत्नतो दद्यात्[११]। असंभवे तैलं शाकं चान्नं घृताक्तं कर्तव्यम्। अन्नोपरि तिलाः प्रक्षेप्तव्याः। यद् यद् विप्रेभ्यो रोचते तत्तद् दद्यात्।

अथ काम्यानि

"घृतेन पूरयेत् पात्रं घृतं भूमौ समुत्सृजेत्।
पात्राहुतिं[१२] चतुर्दिक्षु हस्तेन[१३]न्मार्जयेत्ततः॥"

१. इति ख ×
२. यदुक्तं ख
३. नो ख
४. चावनेजयेत् क
५. °मन्त्रसु° क ×
६. °मिष्टं ख
७. पूर्ण° ख ×
८. पात्रेणादाय क ×
९. स्वयं क ×
१०. माधुर्यादि° ख
११. देयम् ख
१२. पात्रोद्गलितं क
१३. हस्तेन क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यद्यज्जीवतः[१] पित्रादेः प्रियमासीद् यदात्मनः[२] प्रियं यच्च लोके श्रेष्ठतमं[३] तद् दद्यात्। गन्धान्नादिकं न पंक्त्यां विषमं दद्यात् न दापयेद् वा। न विप्रा याचेरन्। स्वयं परिवेषणासंभवे पत्नीपुत्रादिभिः परिवेषयेत्[४]। न दरिद्रो दीनश्च न शूद्रो ब्राह्मणान्नस्य न ब्राह्मणः शूद्रस्यान्नस्य। नान्यमासनमारोपयेत्। न पदा स्पृशेत्। नावक्षुतं कुर्यात्। नाश्रु पातयेत्[५]। नानृतां सूक्तां वाचमीरयेत्[६]। न भुञ्जानमनीक्षमाणः, न मत्सरीन् जल्पन्, न मिथो हसन्, न विभ्रमन्[७], न क्रुध्यन्, नोद्विजन्, न कृतापाश्रयः, न खिन्नगात्रः, न श्येनादि[८]-पक्षिणो वारयन् परिवेषयेत्। सौवर्णेन राजतेन ताम्रेण खड्गपात्रेण वा दानमनन्तफलम्। सीसकायसपात्राणि हीनपात्राणि भग्नपात्राणि[९] च हविर्दाने विप्रभोजने चाप्रशस्तानि। मृन्मयपात्रं च ब्राह्मणभोजने निषिद्धम्। रजतपात्रं सूक्ष्ममपि पितृकार्ये प्रशस्तं, दैवे निषिद्धम्। सुवर्णताम्ररौप्यस्फटिकशंखशुक्तिपात्राणि भिन्नान्यपि दैवे पितृकार्ये च शस्तानि। अशक्त्या पात्रं तु भिन्नमपि अर्घ्ये विहितं, हविर्दानादौ च निषिद्धम्[१०]। कांस्यपात्रं तु न क्वापि निषिद्धम्। तेनापि दैवे पित्र्ये च हविर्दानादिकं कर्तव्यम्। परिवेषणपात्रासंपत्तौ दर्भादिभिरपि अन्तर्हितं कृत्वा परिवेषणीयम्। न श्राद्धहस्तेन[११] नैकेन[१२] हस्तेन एवं यथाशक्ति भक्ष्यभोज्यमूलफलभूरिमांसं सुरभिपानकादिशीतोदकमुष्णमन्नं विप्रतृप्तिक्षमं परिविष्य मधुमयं कृत्वा "मधुवाते"-त्यादिनाभिमन्त्रयेत्। फलमूलपानकेषु नोष्णत्वविधिः, अन्नमात्र एवो-

---

१. °जीवत्° ख
२. यदात्म° क
३. श्रेष्ठं क
४. परिवेषकः ख
५. पातयन् क
६. °मीरयन् क
७. विश्रमन् क
८. श्येनादि° ख ×
९. हीन···पात्राणि क ×
१०. रजतपात्रं(12)···निषिद्धम् क ×
११. साक्षात् क
१२. नैक° क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षणत्वविधिः। अन्यत्तु यद् यथा भद्रं भवति[1] तत्तथा देयमिति केचित्।

अथ पित्रादिदेवपात्रमालभ्य

"ओं पृथ्वी ते पात्रं द्यौः पिधानं[2]
ब्राह्मणस्य मुखेऽमृतेऽमृतं जुहोमि स्वाहा।"

इति जपित्वा[3]

"ओं इदं विष्णुर्विचक्रमे
त्रेधा निदधे पदम्
समूढमस्य पांसुरे।"

"ओं विष्णो हव्यं रक्षस्व" इति पठित्वा ब्राह्मणाङ्गुष्ठं गृहीत्वा इदमन्नमित्यन्ने इमा आप इत्यप्सु इदं हविरिति हविषि निवेश्य "ओं विश्वेदेवा एतद् गोत्रं सोपकरणं नमः" इत्युत्सृज्य एवमेव मातामहादिदेवेभ्यस्तत्पात्रमालभ्य[4] "पृथ्वी ते" इत्यादि जपित्वा तद् ब्राह्मणाङ्गुष्ठमन्नादौ निवेश्योत्सृजेत्। ततः पितृपात्रमालभ्य "ओं पृथ्वी ते" इत्यादि जपित्वा[5] इदं विष्णुरित्यादिना हव्यपद-स्थानकृतकव्यपदेन[6] पितृब्राह्मणाङ्गुष्ठमन्नादौ निवेश्य "ओं अद्यामुक-गोत्र पितरमुकशर्मन्निदमन्नं सोपकरणं तुभ्यं स्वधे"त्युत्सृजेत्[7]। एवं[8] पितामहादिभ्यस्तदीयं पात्रमालभ्य तद्ब्राह्मणाङ्गुष्ठमन्नादौ निवेश्योत्सृजेत्[9]। ततः "अन्नहीनं क्रियाहीनं विधिहीनं च यद् भवेत्

---

१. भवति ख ×
२. रपिधानं ख
३. जप्त्वा ख
४. ओं विश्वेदेवा मालभ्य क ×
५. जप्त्वा ख
६. हव्य पदेन क ×
७. °सृज्य ख
८. एवमेव ख
९. °सृज्य ख

4–5 Cf. गोभिल २.२३
7–9 Cf. ऋग्वेद १।२।७, शुक्लयजुर्वेद ५.१५
19 Cf. पितृभक्ति of श्रीदत्तोपाध्याय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्सर्वमच्छिद्रमस्त्व"ति वदेत्[1]। "जुषध्वमिच्छत[2]" इत्युक्त्वा भवन्तः कामयन्तः[3] प्राशयन्त्वित्यापोशनं ब्राह्मणेभ्यो दद्यात्। ते च वाग्यता हविर्गुणान् दोषा[4]नकीर्तयन्तोऽन्नादिग्रहणार्थं यजमानावलोकितहस्तसंज्ञयोत्तरं कुर्वन्तोऽन्योन्यं यजमानाग्रे चाप्रशंसन्तः हस्तसंज्ञान् विनान्नपानं प्रभूतमित्यवदन्तस्स्वरहा[5]सक्रोधविगर्हाविस्मयफूत्कारवायुमुखशब्दरहिता लवणादिगुणानपृच्छन्तो जान्वन्तकृतपाणय आसनानारोपितपादा दातारमयाचन्तो द्विवाससः[6] प्रसन्नमनस उपानच्छिरोवेष्टनवर्जिता दक्षिणपाणिना दैवे प्राङ्मुखाः पित्र्ये उदङ्मुखा[7] ओंकारपूर्वकं[8] भुञ्जीरन्। न साक्षान्मुखेन न पाणितलेन न रजस्वलादृष्टं न तैला[9]भिघारितं न श्राद्धदत्तं किञ्चित् सर्वं त्यजेयुः। विशेषतो मांसम्। भोजन[10]पात्रेण न जलं पिबेयुः। नान्नविकिरण[11]पर्यन्तं वामपाणिना पात्रं त्यजेयुः। न च वामपादेन स्पृशेयुः। न च प्रक्षाल्य हस्तं भोजनान्तचुलुकं गृह्णीयुः। श्राद्धकर्ता च तेष्वश्नत्सु सप्रणवां व्याहृतिपूर्वां गायत्रीं त्रिः सकृज्जपेत्। तथा स[12]पवित्रपाणिः कृताञ्जलि[13]र्दर्भेष्वासीनः "ओं[14] मधुवाता" इति ऋचं[15] "मधुमधु मध्वि"ति गायत्रं साम पित्र्यां संहितां मधुच्छन्दसीं च जपेत्। "स्वर्गलोके महीयते दत्तं चास्याक्षयं भवेत्[16]" इति रक्षोघ्नान्

१. इति वदेत् क ×
२. °मिच्छति ख
३. कामयन्तः क ×
४. दोषान् क ×
५. °हास्य° क
६. द्विवासः क
७. उदङ्मुखाः पित्र्ये क
८. °पूर्वं क
९. तिला° क
१०. मांसभोजन° क
११. °विकरण° क
१२. स क ×
१३. पाणि ख +
१४. ओं क ×
१५. सप्त क
१६. भवति

1 Cf. विष्णुपुराण ३।१५।२७

15 Cf. ऋग्वेद १.६।१८, शुक्लयजुर्वेद १३.२७, आपस्तम्ब गृ. सू. १।२४।१४, गोभिल २.२५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मन्त्रान् पठित्वा भूमिं तिलैनैवास्तीर्य[1] पित्रादिब्राह्मणान् तद्रूपेण ध्यायेत् । वेदेतिहासस्मृतिपुराणादि यथारुचि यथाशक्ति[2] ब्राह्मणान् श्रावयेत् । विष्णवादिस्तोत्राणि च वीणावेणुमृदंगवाद्यादिभि[3] र्ब्राह्मणान् हर्षयन् व्यञ्जनादि[4]गुणान् कीर्तयन् यस्य यत्रेच्छोपलभ्यते तस्य तदुपनयन् मन्दं मन्दं भोजयेत् । अथ तृप्तान् ज्ञात्वोच्छिष्टसन्निधावास्तृतदक्षिणाग्रकु[5]शत्रयां भूमिं प्रोक्ष्य सर्वप्रकारकमनुद्धृत्य सतिलमेकीकृत्य वारिणाप्लाव्य—

"ओं अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥"

इति मन्त्रेण मन्त्रस्थफलमुद्दिश्य तस्यामेव भूमौ पित्र्यविधिना विकिरेत् । तत आचम्य हरिं स्मृत्वा ब्राह्मणेभ्यः प्रत्येकमेकैकं[6] जलगण्डूषं दत्त्वा पूर्ववद् गायत्रीं "**मधुवाता**" इत्यादि ऋचं च "**मधु मधु मध्वि**"ति च जपित्वा तृप्ता स्थ इति पृष्ट्वा तृप्ता स्म इति तैरुक्ते शेषमन्नं[7] क्व देयमिति पृष्ट्वा इष्टेभ्यो दीयतामिति तैरुक्ते पिण्डमहं करिष्य इति पृष्टे कुरुष्वेति तैरभिहिते[8] पित्रादिब्राह्मणोच्छिष्टसंनिधौ चतुरस्रं मण्डलाकारं वाससैकतं[9] दक्षिणावनतं स्थानमेकं कृत्वा[10] मातामहादिब्राह्मणोच्छिष्टसंनिधौ[11] तथैवापरस्थानं निर्माय[12] वामेन[13] पाणिना दर्भपिञ्जलीं गृहीत्वा दक्षिणहस्ते कृत्वा तन्मूलेन[14] वामान्वारब्धदक्षिण-

१. तिलैरास्तीर्य क
२. यथाशक्ति क ×
३. °वाद्यादि क
४. °आदि° क ×
५. °दर्भ° ख
६. एकैकम् क ×
७. अन्नं क ×
८. पिण्डमहं ‥तैरभिहिते क ×
९. °ससैक्तं क
१०. एकं कृत्वा क ×
११. °सविधौ क
१२. स्थानमपरं कृत्वा क
१३. वाम° ख
१४. °मूले

8–9 Cf. मानव श्रौ. सू. ११।९।२, गोभिल २.२८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पाणिना[1] दक्षिणाग्रां रेखा[2]मुभयत्र मध्यस्थाने "ओं[3] **अपहता असुरा रक्षांसि वेदिषद**" इति मन्त्रेण दर्भपिञ्जलीमुत्तरस्यां दिशि प्रक्षिपेत् । तदुपर्युपमूले सकृल्लूनान् दक्षिणानग्नीन् वहन् कुशानास्तीर्य पवित्रपाणिः सव्यं कृत्वा—

"ओं देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।"

इति मन्त्रं त्रिर्जपेत् । ततोऽपसव्यं कृत्वा "**ओं एत पितर**[4]" इत्यादीनावाह्य तिलपुष्पगन्धसहितं पात्रं वामहस्तोद्धृतदक्षिणेनादाय वामान्वारब्धदक्षिणकरेण[5] "ओं अमुकगोत्र पितरमुकशर्मन्नत्रावनेनिक्ष्व **ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा**" इत्यनेन प्रथमास्तृतदर्भमूले पित्रेऽवनेजनं दत्त्वा अप उपस्पृश्यैवमेव पितामहप्रपितामहाभ्यामवनेजनं दर्भमध्याग्रयो[6]र्यथाक्रमं[7] दद्यात् । ततः अप उपस्पृशेत्[8] । ततस्तथैव पश्चादास्तृतदर्भमूलमध्याग्रेषु मातामहादिभ्यो यथाक्रमं दद्यात् । ततः सर्वस्मादेव श्राद्धशेषादुष्णं किञ्चिदन्नमुत्सृज्यैकत्र[9] चमसादिपात्रे कृत्वा मध्वाज्यतिलजल[10]व्यञ्जनाग्नौकरणशेषसहितमादाय बिल्वोपमांस्त्रीन्[11] पिण्डान् पित्रादिभ्यः[12] कृत्वा तथैव मातामहादिभ्यः साङ्गुष्ठमुष्टिबद्धांस्त्रीन् पिण्डान् कुर्यात् । ततः[13] षट्पिण्डान् घृतमध्व[14]भिघारितान् सतिलान् वामान्वारब्धदक्षिणकरेण पित्रादिभ्यः प्रत्येकं स्वस्यावनेजनस्थाने दद्यात् । "ओं अद्यामुकगोत्र पितरमुकशर्मन्नेष ते पिण्डो **ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा**[15]" इत्यनेन[16] पित्रे दत्त्वा अप उपस्पृश्यैवमेव पितामहप्रपितामहाभ्यां

१. °हस्तेन क
२. दक्षिणाम् क
३. ओं क×
४. अप° (1)···पितर क×
५. °हस्तेन क
६. ग्रयो ख
७. यथाक्रमं क×
८. तत···स्पृशेत् क×
९. °उद्धृत्य° ख
१०. °जल° क×
११. °स्त्रीन् ख×
१२. पितृभ्यः क
१३. ततः क×
१४. मधुघृत° ख
१५. तस्मै ते स्वधा ख×
१६. इत्यादिना ख

1–2 Cf. साममन्त्रब्राह्मण २।१।३, शुक्लयजुर्वेद २.२९, गोभिल २.६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दत्त्वा तथैव मातामहादिभ्यस्त्रीन् पिण्डान्[१] दद्यात्। ततः प्रपितामहादूर्ध्वं[२] त्रयाणां लेपभागभुजां[३] तृप्तिमुद्दिश्य प्रथमास्तृतदर्भमूले करं संमृज्य त्रिराचम्य हरिं स्मृत्वा पिण्डपात्रप्रक्षालनजलेन सतिलगन्धपुष्पेण पूर्वविधिना षट्पिण्डान् प्रत्यवनेज्य प्रत्येकं जलमुपस्पृश्य[४]—

"ओं अत्र पितरो मादयध्वं यथाभागमावृषायध्वम्।"

इत्युक्त्वा[५] वामावर्तेनोदङ्मुखीभूय[६] मनाक् श्वासं नियम्य तेनैव पथा परावर्तमानः सर्वान् पितॄंस्तुष्टान् भास्वरमूर्तिकान्[७] ध्यायन् **"ओं अमीमदन्त पितरो यथा भागमावृषायिषत"** इति जपेत्। ततः श्वासं त्यक्त्वा नीवीं विस्रस्य वामेन पाणिनोद्धृत्य सूत्रं दक्षिणेनादाय "ओं एतद् वः पितरो वासः" इति पठित्वा "ओं अद्य अमुकगोत्र पितरमुकशर्मन्नेतत्ते वासो **ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा"** इति मन्त्रेण वामान्वारब्धदक्षिणकरेण[८] पित्रे दत्त्वा[९] अप उपस्पृश्य एवमेव पितामहप्रपितामहाभ्यां दद्यात्। ततस्तथैव मातामहादिभ्यः। सूत्रं च नवं क्षौमशाणकार्पासानामन्यतमं देयम्। पत्रोर्णवृद्धयजमानरोमाण्यपि[१०] केषांचिद् विहितानि। पत्रोर्णं पट्टसूत्रम्। कौशेयाः शुक्लवस्त्रदशाः कृष्णोर्णनीलरक्तानि न देयानि। ततस्तूष्णीमेव पित्रादीनुद्दिश्य-तदीयपिण्डेषु गन्धपुष्पधूपदीपताम्बूल[११]वस्त्राणि दद्यात्। ततः षड्ऋतून् नमस्कुर्यात्—

---

१. पिण्डान् क ×
२. पितामहादूर्ध्वं क
३. °भाग° क ×
४. प्रत्येक···स्पृश्य क ×
५. पठित्वा क
६. भूत्वा ख
७. मूर्त्तीन् क
८. हस्तेन क
९. दद्यात् क
१०. °लोमान्य° ख
११. °ताम्बूल क ×

---

5 Cf. सामममन्त्रब्राह्मण २।३।६, शुक्लयजुर्वेद २.३१, खादिर ३।५।१७, गोभिल ४।३।११

7–8 Cf. सामममन्त्रब्राह्मण २।३।७, खादिर ३।५।१६, गोभिल ४।३।१२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"ओं[1] वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः ।
वर्षाभ्यश्च शरत्संज्ञकऋतवे च नमः सदा ॥
हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च ।
माससंवत्सरेभ्यश्च दिवसेभ्यो नमः सदा[2] ॥"

इति मन्त्रेण । ततः पितृब्राह्मणानाचामयेत्, देवब्राह्मणांश्चाचामयेत् । ततः

"ओं अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम् ।
ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवन्तु मे ॥"

इति जलम् ।

"ओं लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ।
लक्ष्मीर्वसेत् सदा गोष्ठे सौमनस्यं सदास्तु मे ॥"

इति पुष्पाणि ।

"ओं अक्षतं चास्तु मे पुष्पं शान्तिः पुष्टिर्धृतिश्च मे ।
यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥"

इत्यक्षतान् ।

"ओं यवोऽसि" इति यवान् सर्वेषां ब्राह्मणानां दक्षिणकरे दद्यात् । अथवा ओं शिवा आपः सन्तु इति जलम्, ओं सौमनस्यमस्तु इति पुष्पाणि, ओं अक्षतं चारिष्टमस्तु इति यवान् दद्यात् । ततः ओं अमुकगोत्रस्य पितुरमुकशर्मणो दत्तमेतदन्नपानादिकमक्षय्यमस्तु इति तिलाज्यमधुसंयुतमक्षय्योदकं पितृविप्रकरे दत्त्वा एवमेव पितामहादिब्राह्मण[3]करेषु तन्नामगोत्राभ्यां दद्यात् । अक्षय्योदकदानं चार्घ्यदानवदिष्यते ।

---

१. ओं क ×   २. नमः क
३. °विप्र° क

7–8 Cf. संस्कारदीपक, पृः १३३
10–11 Cf. संस्कारदीपक, पृः १३३
13–14 Cf. संस्कारदीपक, पृः १३३
16 Cf. आपस्तम्ब श्रौः सूः ७।६।१०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"षष्ठ्यैव कुर्यात् तन्नित्यं न चतुर्थ्या कदाचन ।"

ततः सव्येन[1] **"ओं अघोराः पितरः सन्तु । ओं[2] गोत्रन्नो वर्धताम्"** इति वदेत् । सर्वास्वेव प्रार्थनासु तैर्यथार्हमुक्ते सत्यपसव्येन सपवित्रान् दर्भान् षट्पिण्डोपर्यास्तीर्यं स्वधां वाचयिष्य इति पित्रादिब्राह्मणान् पृष्ट्वा वाच्यतामिति तैरुक्ते[3] "ओं[4] पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यः स्वधा उच्यतामि"त्युक्त्वा "अस्तु स्वधे"ति तैरुक्ते सपवित्रदर्भोपरि वारिधारां ददत्[5] पिण्डान् परिषिञ्चेत् ।

"ओं ऊर्जं वहन्तीरमृतं घृतं
पयः कीलालं परिस्रुतम्
स्वधा स्थ तर्पयत मे पितृन् ।"

इति मन्त्रेण । अयमेव पिण्डार्घः । स च वामहस्तोद्धृतमुदकपात्रं दक्षिण[6]हस्तेनादाय वामान्वारब्धदक्षिणकरेण देवमन्त्रलिङ्गात् पिण्डादितृप्तिमुद्दिश्य, न तु पित्रादीनुद्दिश्य त्याग एवायम् । पिण्डान् परिषिञ्चेदिति गृह्योक्तेर्धारां दद्यात् इति च[7] ददातेर्बहुशः प्रक्षेपेऽपि[8] प्रयोग[9]दर्शनात् पित्रादिस्वीकारविरहादित्थमप्यमुख्यत्वाच्च नानुपपन्नम् । अत्र च

"गृहीत्वा दर्भपिञ्जलीन् ततो वामेन पाणिना ।"

इत्यादिब्रह्मपुराणवचनात् ।

---

१. सव्येन ख ×
२. ओं ख ×
३. प्रत्युक्ते क
४. ओं क ×
५. दधत् क
६. दक्षिणेन क
७. तु क
८. अपि क ×
९. प्रयोग ख ×

---

2 Cf. गोभिल २।३३ कात्यायन ३

9–11 Cf. मन्त्रब्राह्मण २।३।१५, शुक्लयजुर्वेद २.३४, गोभिल ४।३।२६, खादिर ३।५।२९, विष्णु ७३.२३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"सव्येतराभ्यां पाणिभ्यां कुर्यादुल्लेखनं द्विजः"

तथा

"सव्येतराभ्यां पाणिभ्यां प्रथमं पिण्डमावपेत् ।"

इति वायुपुराणवचनात् ।

"पिण्डान्निदध्यात् सव्येन पाणिना दक्षिणामुखः" (दक्षिणमुपधाय ?) इति शङ्खलिखितवचनात् । सव्येनैव पाणिना इति पिञ्जुल्यादिग्रहणे गृह्योक्तेः—

"पिञ्जुल्याद्य[1]भिसंगृह्य दक्षिणेनेतरात् करात् ।
अन्वारभ्य च[2] सव्येन कुर्यादुल्लेखनादिकम् ॥"

इति तद्व्याकारपरिशिष्टवचनाच्च[3] वामपाणिगृहीतस्य पिञ्जुल्यादेर्दक्षिणपाणिना[4] ग्रहणम् । ततश्च वामान्वारब्धदक्षिणकरेण रेखाकरणादिकं युक्तमिति । उदकोपस्पर्शनादिकमपि गृह्यवचनादुक्तम् । तथा च बृहस्पतिः—

"सर्वस्मात् प्रकृतादन्नात् पिण्डान् मधुतिलान्वितान् ।
पितृमातामहादीनां दद्याद् गृह्यविधानतः ॥"

इति । पिण्डदानं तु देवलेनापि मन्त्रान्तरेणोक्तम् । उल्मुकनिधानादिकं तु न लिखितम् । नात्रोल्मुकनिधानं न प्रस्तरो नाञ्जनाभ्यञ्जनेन सुरभि न निह्नवनमुदपात्रान्तो वासस्तु निदध्यादिति पिण्डपितृयज्ञेऽभिधानात् पिण्डपितृयज्ञवदुपचार इति च पार्वणश्राद्धपिण्डे[5]ऽभिधानात् । ब्रह्मपुराणादावुपदेशादतिदेशबाध इति चेन्न, बाधवैषम्यभयेन सर्वशाखाप्रत्ययमेकं कर्मेति न्यायमपोद्योपदेशस्य शाखान्तरविषयत्वात् । "नार्षेयं वृणीत" इतिवत् नात्रोल्मुकनिधानमित्यतिदेश[6]कपर्युदासोऽभिमतो निषेधस्यानङ्गतयानतिदेशान्न विरोध

१. पिञ्जल्यान्य° क
२. तु क
३. च क ×
४. °करेण क
५. °पिण्डे ख ×
६. °त्यतिदेश° क

3 Cf. वायुपुराण ७५. २६
5 Cf. वायुपुराण ७५.२८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति चेन्न, तथापि पिण्डपितृयज्ञवदिति विशेषाभिधानानुपपत्तेः। तस्माद् यथाछन्दोगाचारमेवोल्मुकनिधानव्यतिरेकेणैवानुष्ठानं युक्तमित्यलमतिपाण्डित्येन। अथ देवविप्रकरे जलं ददत् विश्वे देवाः प्रीयन्तामिति तान् वदेत्। तथैव प्रयुक्तः पिण्डानुत्थाप्याघ्यंपात्रमुत्तानीकृत्य यथाशक्ति दक्षिणां दद्यात्। दैवे रूप्यवर्जं पित्र्ये तु रूप्यकथादर्शनदानान्यतिप्रशस्तानि[२]। ततः प्राङ्मुखः कृताञ्जलि[३]स्तन्मनाः सुमना भूत्वा[४]शिषो [५]याचेत तद्द्विजान्[६] "गोत्रं नो वर्धताम्[७]"।

"ओं दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च।
श्रद्धा च[८] नो मा व्यगमद् बहुदेयं च नोऽस्त्विति।
अन्नं च नो बहुभवेदतिथींश्च लभेमहि।
याचितारश्च नः सन्तु मा च याचिष्म कञ्चन[९]।
एताः सत्या आशिषः सन्तु॥"

ततः[१०] सन्तु इति तैरुक्ते तान् स्वस्ति वाचयेत्। ततः पित्रादिब्राह्मणानुत्थाप्य पङ्क्तिमूर्धन्यमङ्गुष्ठे गृहीत्वा तानग्रतः कृत्वा गृहीतोदपात्रो विसर्जयेत्।

"ओं वाजे वाजेऽवत वाजिनो नो
धनेषु विप्रा अमृता ऋतज्ञाः।
अस्य मध्वःपिबत मादयध्वं

१. रौप्य° ख
२. शस्तानि क
३. प्राञ्जलि क
४. भूत्वा क ×
५. ब्राह्मणान् ख +
६. तद्द्विजान् ख ×
७. गोत्र···वर्धताम् क ×
८. च क ×
९. कथञ्चन क
१०. ततः क ×

8–12 Cf. ब्रह्मपुराण २१६.८८, विष्णुस्मृति ७३.२८–३०, याज्ञवल्क्य १.२४५–२४६, गोभिल २.३७

16–1 (३७) Cf. ऋग्वेद ५।४।५, शुक्लयजुर्वेद ९.१८, २१.११, आश्वलायन श्रौः सूः २।६।१४, शाङ्खायन श्रौः सूः ३।८।२३, गोभिल २.३९, कात्यायन २

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तृप्ता यात पथिभिर्देवयानैः ।”

इति तथैव देवब्राह्मणान् विसृज्योभयान् बहिःस्थितान् प्रदक्षिणीकुर्वन्नुदकधारया त्रिर्वेष्टयेत् ।

“ओं आ मा वाजस्य प्रसवो जगम्या-
देमे द्यावापृथिवी विश्वरूपे ।
आ मा गन्तां पितरा मातरा
चा[1] मा सोम्यासोऽमृतत्वेन गम्यात्[2] ॥”

इति तान् प्रणम्य पुत्रदारसहित आसीमान्तमष्टौ पदान्य[3]नुव्रज्याभिवाद्य प्रदक्षिणीकृत्य देवताभ्य इत्यस्य त्रिर्जपं कृत्वा[4] वामदेव्यं गीत्वा[5] गृहं प्रविशेत् । पाणिभ्यां दीपनिर्वापणम्[6] । उच्छिष्टं तु न स्त्रीशूद्रानुपनीतब्राह्मणेभ्यो[7] दातव्यम्[8] । न चा[9]पात्रेभ्यः । मधुसर्पिषी तु[10] पुत्रशिष्याभ्यामेव देये । ब्राह्मणविसर्जनानन्तरमेवो[11]च्छिष्टापनयनम् । दिनान्तपर्यन्तधारणं तु काम्यम् । अथास्तं गते सवितरि पात्राणामधोमुखानामम्भसि प्रक्षेपः । दिनान्तरेऽपि मार्जनमित्यकाम्यम्[12] ।

अथ पितामहपिण्डम्–

“ओं आधत्त पितरो गर्भं
कुमारं पुष्करस्रजम्
यथेह पुरुषोऽसत्”

---

१. आ क
२. गम्यते क
३. °पादान° क
४. देवताभ्य…कृत्वा क ×
५. गायन् ख
६. पाणिभ्यां · निर्वापणम् क ×
७. ब्राह्मण क ×
८. देयं क
९. वा क
१०. तु क ×
११. एव क ×
१२. अथास्तं…°काम्यम् ख ×

4–7 Cf. शुक्लयजुर्वेद ९.१९, आपस्तम्ब श्रौ. सू. १८।५।१, गोभिल २.४०
16–18 Cf. शुक्लयजुर्वेद २.३३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति मन्त्रेण ऋतुस्नातायै साध्व्यै धर्मपत्न्यै दद्यात्। सा च[1] तं प्राश्नीयात्। न यदा ददाति तदा जीर्णं वृषभं[2] छागं वा भोजयेत्। इतरपिण्डवद् वा प्रतिपादयेत्। इतरांस्तु पिण्डान् जले प्रदीप्ते वाग्नौ[3] प्रतिपादयेत्। गां ब्राह्मणान् वा भोजयेत्। **गां विप्रमजमग्निं वा प्राशयेदिति** मनुवचनात्[4]। प्रकारान्तरं तु गृह्यानानुमतमिति न लिखितम्। अथ हस्तौ पादौ प्रक्षाल्याचम्य वैश्वदेवं बलिं[5] च कुर्यात्। नित्यश्राद्धे तु विकल्पः। ततः[6] सादरं ज्ञातिमतिथिं भगिनीं बालानन्यांश्च ब्राह्मणान् शेषान्नेन भोजयित्वा भृत्यान् भोजयेत्[7]। ततः सर्वस्माच्छेषाद् व्यञ्जनादित[8] आदायेष्टैः सार्धं[9] ग्रासावरार्धं यथाविध्यश्नीयात् प्राङ्मुख उदङ्मुखो वा। पिण्डशेषं च सह पत्नीभिः, श्राद्धशेषं चेष्टैः सह यथेष्टम्। पिण्डमूलानिवेदितं नाश्नीयात्। तथा च शंखः।

"यत्किंचित् पच्यते गेहे भक्ष्यभोज्यमथापि वा।
अनिवेद्य न भुञ्जीत पिण्डमूले कथंचन[10]॥"

बन्दिमागधसूततौर्यत्रिकविदग्धांश्च भोजयेत्। दानप्रतिग्रहहोमभारवहनादि श्राद्धे भुक्त्वा विवर्जयेत्। कर्तृभोक्तारौ दूराध्वगमनमैथुनायासस्वाध्यायकलहपुनर्भोजनानि न कुर्याताम् इति पार्वणश्राद्धविधिः।

अनेन विधिनामावास्याष्टकान्वष्टकाव्रीहियवपाकनवोदकगृहप्रच्छादनश्रावण्याग्रहायणीचन्द्रसूर्यग्रहेषु श्राद्धमावश्यकम्। आग्रहायण्यूर्ध्वं कृष्णाष्टम्यामपूपश्च। ततः परमपरस्यां मांसम्। ततः परम-

---

१. च ख ×
२. वृषं क
३. अग्नौ वा क
४. गां···°वचनात् क ×
५. वलिकर्मणि ख
६. ततः क ×
७. इत्यापस्तम्बः ख +
८. इत क ×
९. इष्टैः सार्धं ख ×
१०. 12–14 क ×

4–5 Cf. मनु ३.२६०
13–14 Cf. शंख १५.१४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

परस्यां शाकम्। तथा प्रौष्ठपद्यूर्ध्वं[1] कृष्णाष्टम्यां शाकमवश्यमुपादेय-मित्यष्टकाचतुष्टये[2] द्रव्यविशेषः। एवमेवान्वष्टकास्वपि। परं तत्र मातृ-पितामहीश्राद्धपूर्वकं षट्पुरुषश्राद्धमिति विशेषः। अष्टकापरदिनत्वं[3] चात्र विवक्षितम्, न नवमीत्वम्। "श्वोऽन्वष्टका" इति गृह्योक्तेः साग्नेश्चात्राधिकारः। अन्वष्टकास्वष्टकावद् वह्नौ हुत्वेति विष्णुनाग्नौ-करणहोमस्याग्नौ विधानात्। तत्र च[4] लौकिकस्याग्नेर्मनुना—

"न पैतृयज्ञियो होमो लौकिकेऽग्नौ विधीयते"

इति निषेधात्। अनग्निपक्षे विप्रपाण्यादेर्विहितत्वादत्रानधिकार[5] इति चेन्न, वैकृतविशेष[6]विधिना प्राकृताधारान्तरबाधात्। अमावास्या-श्राद्धं तु[7]

"पितृयज्ञं तु निर्वर्त्य[8] विप्रश्चन्द्रक्षयेऽग्निमान्।
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम्॥"

इति मनुवाक्यात् साग्नेरेवाधिकार इति केचित्[8]। तन्न; साधारण-श्राद्धप्रकरणे मत्स्यपुराणे—

"अमावास्याष्टकाकृष्णशुक्लपञ्चदशीषु[9] च।"

इत्यभिधानात्। गौतमादिभिश्च विशेषानुक्तेः। मनुवाक्यस्य[10] च साग्नि-पक्षे पिण्डपितृयज्ञानन्तर्यविधानेनाप्युपपत्तेः। अतः पिण्डान्वाहार्यकं नाम श्राद्धं साग्नेः पिण्डपितृयज्ञानन्तरम्। अत्र च चन्द्रक्षयो निमित्तं नामावास्यात्वं विवक्षितं[11] लिखितमनुवचनात्।

---

१. प्रौष्टपदि क
२. उपादेयम् ख
३. °दिनद्वयं क
४. च क ×
५. नानाधार क
६. °विशेषोपदेश° क
७. अपि क
८. कश्चित् क
९. कृष्णचतुर्दशीपु ख
१०. °वाक्यस्यास्य ख
११. विवक्षितं क ×

---

7 Cf. मनु ३.२८२
11–12 Cf. मनु ३.१२२
15 Cf. मत्स्यपुराण १७.२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"पिण्डान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते ।"

इति परिशिष्टवचनात्[1] ।

"दर्शस्तत्र निमित्तं वै कालश्चन्द्रक्षयात्मकः ।"

इति मार्कण्डेयपुराणवचनाच्च । एवं च

"न निर्वपति यः श्राद्धं प्रमीतपितृको[2] द्विजः ।
इन्दुक्षये मासि मासि प्रायश्चित्तीयते हि सः ॥"

इति पिण्डान्वाहार्यकश्राद्धपरमेकमूलानुरोधात्[3] । चन्द्रक्षयश्चतुर्दश्यष्टमभागे अमावास्यां चाष्टमभागं विहाय प्रभवति[4] । तत्र च दिनतृतीयभागे श्राद्धं कर्तव्यम्[5] । दिनपंचमभागात्मकं सायाह्नकालं[6] विहाय तत्र तिथिद्वैधे व्यवस्थामाह कात्यायनः ।

"यदा चतुर्दशीयामं तुरीयमनुपूरयेत् ।
अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते ॥"

तथा

"अमावास्यां प्रतीक्षेत तदन्ते वापि निर्वपेत् ।"

इति । अयमर्थः—यदामावास्या पूर्वदिनं समाप्यापरदिने क्षीयमाणा भवति तदा पूर्वदिनेऽमावास्यावेलायां यथोक्तकाललाभे तदैव श्राद्धम् । नो चेत् चतुर्दश्यन्ते । एवं च यदि चतुर्दश्येव दिनं समाप्यते तदा क्षीयमाणायामप्यमावास्यायां परदिन एव श्राद्धमनुपूरयेदित्यभिधानात् । यथोक्तकालासम्भवे तु पूर्वदिन एव श्राद्धम्[7] । नन्व-"मावास्यायामपराह्णे पिण्डपितृयज्ञैश्चरन्ती"ति श्रुत्या पिण्डपितृ-

---

१. विष्णु° क
२. °पितृके क
३. °मूलकत्वानुरोधात् ख
४. प्रभवति ख ×
५. श्राद्धं कर्त्तव्यम् ख ×
६. °कालं क ×
७. श्राद्धम् क ×

---

3 Cf. मार्कण्डेयपुराण ३०.२५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यज्ञममावास्यायां विहितत्वात् तदुत्तरत्वाच्च पिण्डान्वाहार्यकश्राद्धस्य[1] चतुर्दश्यां करणं कथम्[2] ? मैवम्। तत्रापि वाक्यशेषादिबलेन चन्द्रक्षयस्य विवक्षितत्वात्[3]। नैमित्तिकं च तत्र[4] कालान्तरमिदम्[5]। अतो न प्रत्यक्षश्रुतिविरोधेन स्मृतेरप्रामाण्यमाशंकनीयम्[6][7]। यदा तु पूर्वंदिनं समाप्यामावास्या वर्धते, तदा परदिने यथोक्तकाललाभे[8] तत्रैव श्राद्धम्। नो चेत् पूर्वंदिने। एवमापस्तम्बेऽपि। ज्येष्ठमार्गशीर्षामावास्ययोस्तु प्रथमप्रहरादूर्ध्वं चन्द्रक्षय इति। तदनुसारेण श्राद्धं कर्तव्यम्। तदेष संक्षेपः। चन्द्रक्षयानुसारेण श्राद्धं कर्तव्यम्। तत्र यदैकस्मिन् दिने चन्द्रक्षयस्तदा तत्रैव श्राद्धमाकांक्षाया अभावादविरोधाच्च व्यवस्थावबोधकवाक्याप्रवृत्तेः। यदा च[9] दिनद्वये चन्द्रक्षयः श्राद्धकाले व्यवस्थाबोधकवाक्यानुसारात्। अमावास्याक्षीयमाणत्वादि[10]निमित्ते सति पूर्वंदिने, वृद्धौ तूभयोः परदिन इति। तस्माच्चन्द्रक्षयनिमित्तकं श्राद्धं पिण्डान्वाहार्यं साग्नेरेव। मत्स्यपुराणीयसाधारणश्राद्धमध्यपठितं[11] त्वमावास्यानिमित्तकं श्राद्धमनग्नेरपीति। तथा च मत्स्यपुराणम्[12]।

"एतच्चानुपनीतोऽपि कुर्यात् सर्वेषु पर्वसु।
श्राद्धं साधारणं नाम सर्वकामफलप्रदम्॥
भार्याविरहितोऽप्येतत् प्रवासस्थोऽपि नित्यशः।
शूद्रोऽप्यमन्त्रवत् कुर्यादनेन विधिना नृप[13]॥"

---

१. कथं ख+
२. कथं ख×
३. विहितत्वात् क
४. स्मार्तं क
५. स्मार्तमर्थात् ख
६. स्मृत्य° ख
७. इति ख
८. काले ख
९. तु ख
१०. °आदि° क×
११. °पतितं ख
१२. °पुराणे क
१३. बुधः क

16–19 Cf. मत्स्यपुराण १७.६३-६४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति। यस्य यदा यदा अमावास्यायामसम्पत्तिसंभावना, तदा तदा पञ्चमीप्रभृति चतुर्दशीं विहाय यस्मिन् दिने सम्पत्तिस्तस्मिन्नेव[1] दिने निरग्निना श्राद्धं कर्तव्यम्। तत्राप्ययुग्मास्तिथयः प्रशस्ताः, तथा दशम्यादयोऽत्यन्तप्रशस्ता इति।

"उत्तराश्रवणातिष्योर्मृगशीर्षं प्रजापतिः।
हस्ता[2] शतभिषा स्वाती चित्रा पित्र्यमथाश्विनी[3]॥
नक्षत्राणि प्रशस्तानि सदैवतानि पैतृके।
अपराणि तु रिक्तानि उच्यन्ते कारणैः क्वचित्॥"

इति देवलवचनादुक्तेतरनक्षत्रे कामनाव्यतिरेकेण[4] श्राद्धं न[5] कर्तव्य-मिति[6]। साग्निना त्वमावास्यायामेतच्छ्राद्धं कर्तव्यमिति।

"न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः।"

इति मनुवचनस्य साग्निपक्षे पञ्चमीप्रभृति वापरपक्षस्येति गौतमीय-विकल्पवारणपरत्वात्, न तु दर्शादन्यश्राद्धनिषेधः। अष्टकादिश्राद्धा-करणप्रसक्तेः। यद् व्याख्यातं दर्शेन विनेति दर्शेतिकर्तव्यतां विना न कार्यमित्यर्थः[7]।

"पार्वणेन विधानेन देयमग्निमता सदा।"

इति मत्स्यपुराणानुसारात्। तन्न, लक्षितलक्षणापत्तेः[8]। एवं यत्र तु कृष्णपक्षस्य निमित्तत्वमुक्तं तत्तु[9] साग्निपक्षेऽमावास्याभिप्रायमेव। अनग्निपक्षे त्वमावास्यायामसम्पत्तौ तिथ्यन्तराभिप्रायमिति—

"अमावास्याष्टकावृद्धिः कृष्णपक्षोऽयनद्वयम्।"

---

१. एव क ×
२. हस्तः ख
३. °थाश्विनम् क
४. न ख +
५. न ख ×
६. कर्तव्यम् क ×
७. अर्थः क ×
८. तदितिकर्तव्यतालक्षणप्रसंगात् ख
९. तत क

---

11 Cf. मनु ३.२८२
Cf. याज्ञवल्क्य १.२१७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति याज्ञवल्क्यीयमप्यमावास्या[1] प्रथमे[2] कृष्णपक्षोपादानं तत्परमेव। अथवा अश्वयुक्कृष्णपक्षाभिप्रायेण पृथगुपादानम्। तथाहि ब्रह्मपुराणम्—

"अश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्[3] दिने दिने।
त्रिभागहीनं पक्षं वा त्रिभागं त्वर्धमेव वा॥"

इति पक्षस्य निमित्ततां स्फुटं प्रदर्शयति[4]। त्रिभागस्तृतीयो भागः। अर्धं तु[5] त्रिभागस्येति[6] केचित्। तन्न। पक्षस्यैव भागित्वेन प्रक्रान्तत्वात्। दिने दिने इति सर्वस्मिन् दिने त्रिभागहीनं पक्षमिदं पञ्चमीतः प्रभृति त्रिभागमिति दशमीप्रभृत्यर्धमित्यष्टमीप्रभृतिपक्षचतुष्टयेऽपि चतुर्दशीत्यागः, स्मृत्यन्तरेषु निन्दितत्वात्[8]। एवं च सकृदेव श्राद्धकरणमशास्त्रार्थः पक्षचतुष्टयबहिर्भावात्। न चापरपक्षे श्राद्धं कुर्वीतो'र्ध्वं वा चतुर्थ्या यदहः सम्पद्यते तदहः" इति कात्यायनवचनात् सकृदपि श्राद्धमस्तीति वाच्यम्। सामान्यविषयस्यास्य पक्षचतुष्टयावरुद्धाश्विनापरपक्षेतरापरपक्षेषु[9] च चरितार्थत्वात्। तस्मिन्नेव पक्षे त्रयोदश्यां मघायां च मध्वाज्यतिलमिश्रपायसशीतलजलदुग्धशाकसर्वलोहितच्छागादिमांसैः परमप्रयत्नेन श्राद्धमवश्यं कार्यम्। तदकरणे बहुशः प्रत्यवायश्रवणात्। ज्येष्ठपुत्रिणां तु तत्र पिण्डदानवर्जं[10] श्राद्धं कर्तव्यमिति विशेषः। केचित्तु—

"तत्रापि महती पूजा कर्तव्या पितृदैवते।
कृष्णे पिण्डप्रदानं तु ज्येष्ठपुत्रो विवर्जयेत्[11]॥"

१. याज्ञवल्क्येन° ख
२. पृथक्त्वेन ख
३. देयं ख
४. उपपादयति क
५. तु ख ×
६. त्रिभागस्यैवेति ख
७. त्रिभागमिति…प्रभृति ख ×
८. निन्दत्वात् क ×
९. °परपक्षाभिन्ना° क
१०. °रहितं क
११. विसर्जयेत् क

4–5 Cf. तिथितत्त्व पृ. १६५, मलमासतत्त्व पृ. ८४३
19–20 देवीपुराण ५६.१७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति देवीपुराणे पिण्डदाननिषेधमुखेन श्राद्धमेव निषिध्यते, अङ्गहीनस्य फलाजनकत्वात्[1]। तन्न; ज्येष्ठपुत्रिपक्षे एतद्वचनादेव पिण्डदानस्यानङ्गतया अङ्गहीनत्वासिद्धेः। अन्यथा पूर्वावगतप्रधानकर्तव्यताबाधापत्तेः। यदपि पिण्डदानपदं साङ्गप्रधानप्रयोग[2]परं तत्र हि प्रवृत्तिः प्रवृत्तस्य निषेध इत्याहुस्तदप्ययुक्तम्, लक्षणा[3]प्रसंगात्। साङ्गप्रवृत्तस्य चाङ्गावच्छेदेन निषेधोपपत्तेः। न षोडशिनं गृह्णातीतिवत् पक्षद्वयेऽपि च पिण्डदानपदवैयर्थ्यम्। विवर्जयेदित्यनेनैव पूर्वोक्तश्राद्धनिषेधप्राप्तेः। तदेवं मघायास्त्रयोदश्याश्च प्रत्येकमेव निमित्तत्वम्। समुच्चये तु ततः[4] प्रशस्तत्वम्। त्रयोदशीमघाहस्तगतादित्यलाभे च[5] कुञ्जरच्छायाया [6]अतिप्रशस्तत्वमिति। त्रयोदशीश्राद्धे चास्मिन् सपुत्रापुत्रयोर्द्वयोरप्यधिकारो विशेषाश्राद्धकरणात्[7]। न च

"नेच्छेत्त्रयोदशीश्राद्धं पुत्रवान् यः सुतायुषः।"

इति वचनात्[8], तथा

"श्राद्धं नैकस्य वर्गस्य त्रयोदश्यामुपक्रमेत्।
न तु तृप्तास्त्रयो यस्य प्रजां हिंसन्ति तस्य ते॥"

इति वाक्याच्च सपुत्रस्यानधिकार इति वाच्यम्। वाक्ययोरनयोः राजादिभिरलिखनात्। किंच एतद्वाक्यपर्यालोचनेनै[9]कवर्गश्राद्धं[10]निषेधः। न तु षट्पुरुषश्राद्धनिषेध[11] इति निःशङ्कम्। अथवा काम्यविषयो[12]ऽयं निषेधस्तत्र सपुत्रानधिकारस्य वक्ष्यमाणत्वात्।

---

१. फलासाधकत्वात् ख
२. °प्रयोग° क ×
३. अलक्षणा° ख
४. तु ततः क ×
५. च क ×
६. अत्यन्त° ख
७. विशेषाश्रवणात् ख
८. वाक्यात् ख
९. °पर्यालोचनया° क
१०. एकवर्गस्य श्राद्धे ख
११. °निषेध ख ×
१२ अथ वाक्यस्य शुद्धविषयो° क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अत्रापरपक्षतिथिषु काम्यश्राद्धानि

प्रतिपदि स्वरूपस्त्रीप्राजापत्यपशुकामः धनप्राप्तिसर्व[1]धनानाशकामो वा अभिरूप[2]सुतकामो वा श्राद्धं कुर्यात्। द्वितीयायां च[3] व[4]रस्त्रीजन्मकामः श्रेष्ठसुतकामो द्विपदाधिपत्यकामो वा। तृतीयायां सर्वकामोऽश्वकामो वरकामो ब्रह्मवर्चस्विसुतकामो वन्दिस्तुत्यत्वकामो वा श्राद्धं कुर्यात्[5]। चतुर्थ्यां क्षुद्रपशुकामो यशस्कामः सन्मित्रदर्शनकामः शत्रुच्छिद्रदर्शनकामः[6] शत्रुनाशकामो वा। पञ्चम्यां शोभनबहुपुत्रकामो वा महालक्ष्मीकामो वा। षष्ट्यां द्यूतविजयकामो वा धनकामो वा द्विजपूज्यत्वका[7]मो वा नररक्षाकामः पशुकामो वा। सप्तम्यां कृषिऋद्धिकामो [8]वा महासत्रफलगणाधिपत्यका[9]मो वा[10] बन्धुतृप्तिवृद्धिकामो वा[11]। अष्टम्यां वाणिज्यसम्पूर्णर्द्धिकामो वृद्धिकामः पुष्टिकामोऽन्नादिकामः शस्त्रहतानामारोग्य[12]कामो वा। नवम्यामेक[13]खुराश्वादिपशुकामः ऐश्वर्यकामः स्त्रीकामो वाभिजित्कामो वा। दशम्यां बहु[14]गोकामो बहुवाजिकामोऽन्नादिकामो वा ब्रह्मवर्चसका[15]मो वा व्यवहारर्द्धिकामो वा। एकादश्यां बहुपरिवारकामो [16]बहुब्रह्मवर्चस्विसुतकामो वा[17] ऋद्धिकामो वा सन्तत्यैश्वर्यवरदारसर्ववेदवित्त्वसमत्व[18]कामो वा कृष्णायसकामो वा[19]। द्वादश्यां धनधान्य-

---

१ °प्राप्त° क
२. स्वरूप° क
३. च क ×
४. सु° ख
५. श्राद्धं कुर्यात् क ×
६. शत्रुच्छिद्रदर्शनकामः क ×
७. °पूज्यकामो ख
८. पशुकामो ख +
९. महासत्रकामो क
१०. वा क ×
११. वा क ×
१२. शस्त्रहतारोग्य° क
१३. एकखुर° क ×
१४. °गोरूपर्धि° क
१५. °तेजस्कामो क
१६. रूप्य° ख
१७. वा क ×
१८. °वर···समत्व° क ×
१९. वा ख ×

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुप्य[1]कामः [2]श्रीकामो वा[3] आयुर्वसुराज्यजयलाभकामो वा क्षेत्रकामो वा। त्रयोदश्यां स्त्रीवशित्वकामो[4] ज्ञातिश्रेष्ठकामः सौभाग्यकामो यशस्काम ऋद्धिप्रजापशुमेधास्वातन्त्र्योत्तमपुष्टिकामो[5] दीर्घायुरैश्वर्यकामः पशुकामो[6] बहुपुत्रबहुमित्रदर्शनीयापत्यकामो वा। चतुर्दश्यां शस्त्रादिमृतस्य भूतिकामः स्वस्तिकाम आयुर्वृद्धिकामो वा। अमावास्यायां प्रतिपदादिसर्वतिथिप्रोक्तसर्व[7]फलकामः सर्वकामः[8] पुष्टिकामो वा। केचित्तु अमावास्यायां तु[9] सर्वकाम इति सर्वशब्दस्य प्रकृतवाचित्वादेकैकस्य फलस्य काम्यत्वेन प्रकृतत्वादुक्तान्यतमफलकामस्याधिकारो दर्शपौर्णमासवदिति वदन्ति। तन्न।

"पक्षत्यादिविनिर्दिष्टान् विपुलान् मनसः प्रियान्[10]।
श्राद्धदः पञ्चदश्यां तु सर्वान् कामान् समश्नुते॥"

इति समुच्चयबोधकवृद्ध[11]मनुवचनविरोधात्। अन्यथा सर्वान् कामान् समश्नुते[12] इत्यनेनैव प्राप्तेः पक्षत्यादीति वैयर्थ्यापत्तेः। ननु त्रयोदशीश्राद्धे कथं प्रवृत्तिः **"युवानस्तत्र म्रियन्ते"** इति कात्यायनोक्तेः **"युवमारिणश्च भवन्ति"** इत्यापस्तम्बोक्तेश्च। तत्रानपत्यतया एतद्दोषसहिष्णोरधिकार इति केचित्। अन्ये तु विद्यमानपुत्रस्यैवात्यन्तानभीष्टस्याभिचारं य उल्लंघितशास्त्रः कामयते तस्याधिकारः श्येनयागविधिवदिति। वस्तुतस्तु पुत्रगतानिष्टश्रवणादपुत्रस्य पश्वादिफलकामस्य तत्रा[13]धिकारः। एवमर्थवादस्याधिकारिविशेषबोधकतया

---

१. °रुप° — २. स्त्री° क
३. वा क × — ४. वा ख +
५. °कामो ख × — ६. °कामो क ×
७. सर्व° क × — ८. सर्वकामः क ×
९. तु क × — १०. मनसष्प्रियान् क
११. °वृद्ध° क × — १२. समश्नुते क ×
१३. तत्र ख ×

---

14 Cf. द्वैतनिर्णय पृ० ५०
15 Cf. द्वैतनिर्णय पृ० ५०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सार्थकत्वमुक्तं[1] विध्यविरोधकत्वं च । पुत्रगतत्वं चानिष्टस्य फलस्या[2]पस्तम्बस्मृतौ दर्शनीयापत्य इति[3] प्रक्रमात् युवमारिणेति पुंस्त्वश्रवणाच्च बोद्धव्यम् । अथ लिङ्गं न विवक्षितम् । तद्ध्यपत्यमात्रगतमेवानिष्टमिति । यदुक्तमुक्तकामनाव्यतिरेकेणाकरणेऽनिष्टं फलमिति तत्तुच्छम्[4] । काम्योपक्रमे[5]ऽश्रवणात् ।

'ज्ञातीनां च भवेच्छ्रेष्ठः कुर्वन् श्राद्धं त्रयोदशीम् ।
अवश्यं तु युवानोऽस्य[6] प्रमीयन्ते न वा गृहे ॥"

इति महा[7]भारतवाक्यस्यायमर्थः यस्य गृहे युवानः सन्ति[8] तस्य म्रियन्ते, अतस्त्रयोदशीश्राद्धे यदिदमनिष्टं तन्नावश्यकमित्यपुत्रेण ज्ञातिश्रेष्ठकामेन श्राद्धं कार्यमिति[9] । तस्मात् त्रयोदशीश्राद्धं काम्यमपुत्रेणैव कर्तव्यमिति[10] । नित्यं तु सपुत्रापुत्राभ्यामुभाभ्याम[11]पि तत्र निन्दाया अश्रवणादिति प्रागुक्तम् । उभयविधमपि[12] त्रयोदशीश्राद्धं पिण्डदानसहितमेव कर्तव्यम्[13] । त्रयोदशीश्राद्धोल्लेखेन क्वापि पिण्डदानस्यानिषेधात् । मघाश्राद्धे तु काम्ये नित्ये[14] च सपुत्रापुत्रयोर्द्वयो[15]रप्यधिकारः । किन्तु ज्येष्ठपुत्रिणा पिण्डरहितं श्राद्धं[16] कार्यमि[17]ति दर्शितं प्राक् । न च

"प्रौष्ठपदामतीतायां मघायुक्तां त्रयोदशीम् ।
प्राप्य श्राद्धं तु कुर्वीत[18] मधुना पायसेन च ॥"

---

१. उक्तं ख×
२. °फलस्य° क×
३. इति ख×
४. तन्न क
५. प्रक्रमे ख
६. युवानोऽन्न क
७. महा° क×
८. भवन्ति ख
९. इति क×
१०. इति क×
११. उभाभ्याम् क×
१२. अपि क×
१३. कार्यम् क
१४. नित्यकाम्ये क
१५. द्वयोरपि ख×
१६. श्राद्धं क×
१७ कर्तव्यम् ख
१८. हि कर्तव्यम् ख

17–18 Cf. शङ्ख १४.३२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति शंखलिखित[1]वचनात् न केवलयोर्मघात्रयोदश्योर्मित्रत्वं किंतु मिलितयोरिति रमणीयम्[2]। तथा हि विष्णुः—

"**प्रौष्ठपद्योर्ध्वं कृष्णत्रयोदशी चे**"ति नित्यश्राद्धकालेषु केवलां त्रयोदशीं दर्शयति। कन्यागतापरपक्षप्रक्रमस्थं पूर्वलिखितम्। "**तत्रापि महती पूजा कर्तव्ये**"ति देवीपुराणवचनं न केवलां मघामिति। तस्मात् केवलयोर्मिलितयोश्च निमित्तत्वमुभयत्र[3]श्रवणात्। न च केवलश्रुतिर्हि[4] सापेक्षपरा, नैरपेक्ष्यश्रुतिबाधापत्तेः। मूलभेदकल्पनापत्तिरिति चेन्न। कार्यानुरोधेन[5] कारणकल्पनाया अन्याय्यत्वात्। चतुर्दशीश्राद्धं च[6] व्याधिं विनैव[7] शस्त्राद्यभिघातमृतस्य, नान्यस्य।

> "**विषशस्त्रश्वापदादितिर्यक्ब्राह्मणघातिनाम्[8] ।**
> **चतुर्दश्यां भवेत् पूजा अन्येषां तु विगर्हिता ॥**"

इति मरीचिवचनात्। घातोऽस्यास्तीति घाती। तेन विषादिहतानामित्यर्थोऽन्यथानन्वयात्। एतच्च[9] द्वादशस्वपि कृष्णचतुर्दशीषु काम्यम्, तत्र[10] तत्र विशेषाश्रवणात्। कन्यागतापरपक्षचतुर्दश्यां तु तन्नित्यमपि। तत्प्रक्रमे देवीपुराणे—

> "**आहवेषु विपन्नानां जलाग्निभृगुपातिनाम् ।**
> **चतुर्दश्यां भवेत् पूजा अमावास्यां[11] तु कामिकी ॥**"

अमावास्यायां कामिकी[12]त्वकथनाच्चतुर्दश्यां नित्यत्व[13]मायाति। श्राद्धं

---

१. °लिखित° ख ×
२. युक्तम् क
३. उभय° ख
४. °श्च क
५. कार्यानुरोधेन क ×
६. तु क
७. एव क ×
८. °घातिना क
९. तच्च क
१०. तत्र ख ×
११. अमावास्यायां क
१२. काम्यत्व° ख
१३. आवश्यकत्व° ख

---

3 Cf. विष्णुस्मृति ७६
4–5 Cf. देवीपुराण ५६.१७
16–17 Cf. देवीपुराण ५६.१८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चेदमुद्बन्धनादिनात्मघातिनोऽपि[1] बोद्धव्यम् ।

"प्रायोऽनशनशस्त्राग्निविषोद्बन्धनिनां तथा ।
चतुर्दश्यां तु कर्तव्यं तृप्त्यर्थमिति निश्चयः ॥"

इति ब्रह्मपुराणवचनात् । न चाविधिनात्मघातिनः श्राद्धनिषेधात्,

"अचिकित्स्यैर्महारोगैः पीडितस्तु पुमानपि ।"

इति दर्शितविधिनात्मघातिपरत्वमस्येति वाच्यम् ।

"तर्पणीयाश्चतुर्दश्यां लुप्तपिण्डोदकक्रिया ।"

इति तत्रैव दर्शितत्वात् । एवं चैतत्पर्यालोचनया पूर्वलिखितवाक्यपर्यालोचनया च गोब्राह्मणहतत्वनिबन्धनमात्मघातित्वनिबन्धनं वा[2] येषां लुप्तपिण्डोदकक्रियत्वं तेषामेव श्राद्धं, न तु ब्रह्महत्यादिना लुप्तपिण्डोदकक्रियाणामिति[3] । नन्वेवं लुप्तपिण्डोदकक्रियाणामेव[4] श्राद्धं स्यान्नान्येषामिति विपरीतमुपस्थितम् । मैवं, वाक्यान्तरेषु विशेषश्रवणात् । अतएव श्राद्धमिदं स्त्रिया अपि कर्तव्यम्[5] ।
"न योषिद्भ्यः पृथग् दद्यात्" इत्यादिनिषेधात्, नैवमिति[6] चेत्, तर्हि पुंसोऽपि न स्यात् ।

"ये सपिण्डीकृताः प्रेता न तेषां तु[7] पृथक्क्रिया ।"

इति शातातपनिषेधात् । विशेषविधेः करणमिति चेत्; तुल्यं ममापि विशेषविधिः पुंस्येव चरितार्थ इति चेन्न[8]; वैपरीत्यस्यापि संभवात् । पुंस्त्वश्रुतेर्विनिगम इति चेन्न; तस्यानाकांक्षितत्वेनोपादेयेऽप्यविवक्षितत्वात् । निमित्तकोटित्वे सुतराम् । एवं च सकलदेशीयाचारोऽपि उपपद्यते[9] । तस्मात् स्त्रिया अपि शस्त्रहतश्राद्धं कर्तव्यम् । तथा च

१. ये च मृतास्तेषामपि ख
२. °हतत्वनिमित्तकत्वं क
३. °पिण्डोदकानामिति ख
४. °पिण्डोदकानामेव ख
५. कार्यम् क
६. नेति ख
७. तेषां न स्यात् ख
८. न क ×
९. संगच्छते क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृतपत्यनुमरणायाः प्रसवमृतायाश्च[1] कर्तव्यम्; रोगव्यतिरेकेण मृतत्वस्य[2] प्रयोजकत्वात्। शस्त्रादिविशेषविवक्षायां तु[3] वाक्यभेदादाचारविरोधाच्च। वृक्षपातादिना[4] मृतानामपि शिष्टा आचरन्ति। तच्च काम्यावाहनविश्वदेवादिपार्वणेतिकर्तव्यं तथासहितं[5] कर्तव्यम्।

"कामाय विहितं काम्यमभिप्रेतार्थसिद्धये।
पार्वणेन विधानेन तदप्युक्तं यथाक्रमम्[6]॥"

इति शातातपवचनात्। एवमन्यदपि काम्यं[7] [8]युगान्तरमन्वन्तरादिसंक्रान्त्यादिश्राद्धं [9]सकलदेशीयमहाजनाचारानुरोधादेकोद्दिष्टविधिनैव कर्तव्यम्। एतन्मूलकमेव गौडीयवाक्यं पठन्ति।

"चतुर्दश्यां तु यच्छ्राद्धं सपिण्डीकरणे कृते।
तदेकोद्दिष्टविधिना कर्तव्यं शस्त्रघातिनाम्॥"

इति। अत्र युवमृतानां[10] च[11] चतुर्दश्यामेव कर्तव्यम्।

"युवानस्तु गृहे यस्य मृतास्तेषां तु दापयेत्।
शस्त्रेण वा हता ये वै[12] तेषां दद्याच्चतुर्दशीम्॥"

इति वायुपुराणवाक्यात्[13]। न च गृह इति विवक्षितत्वाद्बहिर्मृतानां यूनामपि न कर्तव्यमिति वाच्यं, सम्बन्धमात्रपरत्वात्। अन्यथा असम्बन्धियूनः स्वगृहमृतस्य[14] श्राद्धकरणापत्तेः। तस्माद् यस्य युवानो मृता इत्यनेनैव निमित्तलाभे हविरुभयत्ववद् गृह इत्यविव-[15]

१. सप्रसवमरणायाश्च ख
२. मृतस्य ख
३. तु ख ×
४. °पतनादिना ख
५. कर्तव्यतया ख
६. खगाधिप ख
७. काम्यं क ×
८. °युगादि° क +
९. पार्वणविधिनैव कर्तव्यम् ख +
१०. युव° क ×
११. च ख ×
१२. च ख
१३. °पुराणात् क
१४. स्व° ख ×
१५. इति न ख

13–14 Cf. वायुपुराण ८१.१८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षितम्। युवत्वं च षोडशवर्षोपरि त्रिंशद्वर्षपर्यन्तं शास्त्रान्तरोक्तं तदत्राभिमतम्। न तु **"आ षोडशाद् बालाः सप्तत्यूर्ध्वं स्थविरा"** इत्यनुसारात् षोडशवर्षोपरि सप्ततिवर्षपर्यन्तम्। न वा प्रथमे वयसि नाधीतमित्यनुसारात् पंचविंशतिवर्षोर्ध्वं पञ्चाशद्वर्षपर्यन्तमिति, आचारबाधापत्तेः। आश्विनापरपक्षश्च[1] कन्यागतादित्यं विनापि निमित्तमिति बोद्धव्यम्; अश्वयुक्कृष्णपक्षे त्वित्यादिपूर्वोक्तवाक्यात्। अतएव

"आषाढ़ीमवधिं कृत्वा यः स्यात् पक्षस्तु पञ्चमः।
तत्र श्राद्धं प्रकुर्वीत कन्यां गच्छतु वा न वा॥"

इति प्रवादः। कन्यागतत्वं तु

"कन्यां गते सवितरि यान्यहानि षोडशः।
क्रतुभिस्तानि तुल्यानि तेषु दत्तमथाक्षयम्॥
[2]यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः।
तावच्छ्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदा॥"

इति ब्रह्मपुराणवाक्यद्वयात्[4] काम्ये नित्ये च श्राद्धे[5] निरपेक्षमेव निमित्तमिति कन्यागतस्याकरणे[6] तुलागतस्य निमित्तत्वम्। न च द्विवचनबलादुभयोः सापेक्षयोर्निमित्तत्वम्, न वा निरपेक्षयोरपि, नित्यवत्।

"येयं दीपान्विता राजन् ख्याता पञ्चदशी भुवि।
तस्यां देयं न चेद्दत्तं पितॄणां तु महालया[7]॥"

इत्यभिधानात्, अनुपादेयसंख्याया अविवक्षितत्वाच्च। यद्वा "तावच्छ्राद्धस्य कालः स्यादि"ति स्वरसादेकस्यैव शरदात्मकस्य कालस्य

१. °श्च क×
२. तथा ख+
३. सच्चं क
४. °वाक्यात् क
५. श्राद्धे क×
६. °गताकरणे ख
७. महाशिष क

8–9 Cf. अपरार्क on याज्ञवल्क्य १.२१८, पृ॰ ४२३
19–20 Cf. श्राद्धतत्त्व, पृ. २५४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कदाचित् कन्यागतभागद्वारा निमित्तत्वम्, कदाचित्तुलागतभागद्वारा। अमावस्याया इवापराह्ण[1]द्वारेति। नन्वेवं शुक्लपक्षेऽपि कन्यागते[2] श्राद्धं स्यात्। मैवं, कृष्णपक्षस्य ततः प्रशस्तत्वात्। सकृदेव करणे उभयशास्त्रार्थसिद्ध्यै[3] प्रयासगौरवायोगाच्च[4]। केचित्तु यदाश्विनकार्तिकयोः कृष्णपक्षे श्राद्धं न सम्पन्नं तदा शुक्लपक्षेऽपि कर्तव्यं तुलागतत्वलाभे। तथा च—

"तावत् प्रेतपुरं शून्यं यावद् वृश्चिकदर्शनम्।"

इति वाक्यमित्याहुः। वायुपुराणे

"शुक्लपक्षस्य पूर्वार्धे श्राद्धं कुर्याद् विचक्षणः।
कृष्णपक्षापरार्धे तु रौहिणं तु न लंघयेत्॥
रौहिणं कुतपादूर्ध्वं मुहूर्तं च न लंघयेत्।"

यथा तत्रारम्भोऽपि[5] स्यात् तथा कुर्यात्। एतच्च पिण्डान्वाहार्येतरविषयम्, तत्र वासरतृतीयांशविधानात्[6]। ब्रह्मपुराणे

"पूर्वाह्णे मातृकं श्राद्धमपराह्णे तु पैतृकम्।
एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम्॥"

पूर्वाह्णे[7] प्रातरूर्ध्वं मध्याह्नात् प्राक् मातृकं[8] श्राद्धम्।

"पित्रादित्रयपत्नीस्तु भोज्या मातॄः प्रति द्विजाः।
स्त्रीणामेव तु तद् यस्मान्मातृश्राद्धमतः स्मृतम्॥"

इति शंखोक्तेः पूर्वार्धविधिश्चायमन्वष्टकाकर्तव्यमातृश्राद्धे बोद्धव्यः, वृद्धिश्राद्धान्तर्गते प्रातर्विधानात्। न च मातृश्राद्धं विहाय पित्रादि-[9]

१. °अपरार्ध° क
२. °गत° क
३. °सिद्धौ ख
४. °गौरवात् क
५. तत्रारम्भोऽपि क
६. °तृतीयायां सविधेः क
७. पूर्वे° क
८. मातृ° क
९. विहाय पित्रादि क ✕

9–10 *Cf.* वायुपुराण ८३.८०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्राद्धे प्रातर्विधिः। ततश्च प्रातः पित्रादिश्राद्धं कृत्वा पूर्वाह्णे मातृकं श्राद्धमिति वाच्यम्—

"मातृणां प्रथमं श्राद्धं पितृणां तदनन्तरम्।"

इति शातातपविरोधात्। पैतृकं पित्रादिदैवतषट्पुरुषश्राद्धम्[१]। एतच्च कृष्णपक्षाभिप्रायम्। शुक्लपक्षे पूर्वाह्णावरोधात्। एकमेवोद्दिश्य यत् क्रियते तदेकोद्दिष्टम्, योगात्। न तु मृताहकर्तव्यत्वमपि विवक्षितं, प्रमाणाभावात्।

अतोऽपि शस्त्रहतश्राद्धे एकोद्दिष्टविधिर्बोद्धव्यः। तत्रापीतरश्राद्धनिषेधादेकस्यैवोद्देश्यत्वात्। वृद्धिः कन्याविवाहादिः। प्रातरादि व्याचष्टे मत्स्यपुराणम्[२]—

"प्रातः कालो मुहूर्तांस्त्रीन् संगवस्तावदेव तु।
मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णस्ततः परम्॥
सायाह्नस्त्रिमुहूर्तः स्याच्छ्राद्धं तत्र न कारयेत्।
राक्षसी नाम सा वेला गर्हिता सर्वकर्मसु॥
अह्नो मुहूर्ता[३] विख्याता[४] दश पञ्च च सर्वदा।
तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः॥
मध्याह्ने सर्वदा यस्मान् मन्दी[५]भवति भास्करः।
तस्मादनन्तफलदस्तत्रारम्भो विशिष्यते॥"

मुहूर्तपदमत्राहुः पञ्चदशांशपरम्[६]। तेनायमर्थः—पञ्चदशधा विभक्तस्याह्नः प्रातरादयो भागा इति। कुतपविधिरेकोद्दिष्टे इतरत्रावरोधात्[७]। पूर्वाह्णस्तु संगवशब्देनैव कथितः। ननु

---

१. 1–4 क×
२. 8–10 क×
३. मुहूर्तो क
४. विख्यातो क
५. मन्दो ख
६. पंचदशभागपरम् ख
७. °अवोधात् क

11–18 Cf. मत्स्यपुराण २२.८२–८५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"पूर्वाह्णे दैविकं श्राद्धं कार्यमभ्युदयार्थिना ।"

इति शातातपो वृद्धिश्राद्धे पूर्वाह्णं[1] विधत्ते । तथा[2] च "प्रातर्वृद्धिनिमित्तकमि"त्यनेन सह[3] विरोधः । मैवम्, पूर्वाह्णपदस्यात्र प्रातःपरत्वात् । "पूर्वाह्णे मातृकमि"त्यत्र तु सङ्गवपरत्वमेव । प्रातःपदस्य पृथगुपादानात्, भिन्नभागसाहचर्याच्च । शातातपः

"दिवसस्याष्टमे भागे मन्दीभवति भास्करः ।
स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम् ॥"

इदमप्येकोद्दिष्टपरम् । अष्टमः[4] दिवसस्य[5] पञ्चदशेषु[6] भागेषु । दत्तं[7] तत्रेति शेषः । एवं चानेन दानस्याक्षयफलत्वमुक्तम् । पूर्वेण चारम्भस्येति द्वयमपि कुतपो[9]ऽनन्तफलम् । समाप्तिस्[10]तु तत्र वान्यत्र वा इति न विशेषः । एतस्य च विधिद्वयस्य गुणफलरूपत्वात् मुहूर्तान्तरेऽपि मध्याह्ने एकोद्दिष्टकरणे न विरोधः । यद्वा कालस्य प्रयोगाङ्गत्वाद् वाक्यद्वयेऽपि प्रयोगे कालविधानादेकवाक्यत्वम् । मध्याह्नस्य निमित्तत्वमेतद्भागद्वारा फलश्रुतिरर्थवादमात्रमिति[11] । मनुः

"रात्रौ श्राद्धं न कुर्वीत राक्षसी सा हि कीर्तिता[12] ।
सन्ध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते ॥"

अचिरं मुहूर्तद्वयम् । एवं च एतद्दर्शनान्निषिद्धेतरकाले श्राद्धेऽधिकारः[13] । अपराह्णविधि[14]स्त्वधिकफलार्थः । सति सम्भवे स एवादर्तव्यः । तथा च मत्स्यपुराणम्[15]

---

१. पूर्वाङ्गं क
२. तदा ख
३. सह क×
४. अष्टमे क
५. दिवसस्य ख×
६. पंचदश° क
७. दिवसस्य ख+
८. त्वा° क
९. कुतपे° क
१०. तु क×
११. इति क×
१२. कीर्तिता हि सा ख
१३. श्राद्धाधिकारः ख
१४. अपराह्णादि° क
१५. °पुराणे ख

15–16 Cf. मनु ३.२८०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"ऊर्ध्वं[1] मुहूर्तात् कुतपात् यन्मुहूर्तचतुष्टयम् ।
मुहूर्तं पञ्चकं चैव स्वधावाचनमिष्यते ॥"

इति[2] । मुहूर्तपञ्चकं कुतपात् पूर्वमर्थात् । कुतपस्य प्रशस्तत्वं पूर्वमुक्तम् । तेन पञ्चदशस्वहर्भागेषु भागदशकं श्राद्धीयम्[3] । प्रथममुहूर्तद्वयं सायाह्नश्चेति मुहूर्तपंचकमश्राद्धीयमित्युक्तं भवति । केचित्तु मुहूर्तपञ्चकं वापि इति पठन्ति[4] । तन्मते सायाह्नैकमुहूर्तव्यापनात्

"सायाह्नस्त्रिमुहूर्तः स्यात् श्राद्धं तत्र न कारयेत् ।"

इत्यनेन स्वोक्तिविरोधः पुराणकर्तुः समाधेयः । अथ पिण्डान्वाहार्यश्राद्धे वासरस्य तृतीयांशे नातिसन्ध्यासमीपत इति परिशिष्टवचनादत्यन्तसन्ध्यासमीप एव निषेध इति । तद्विषयोऽयं व्यवस्थित[5]विकल्प इत्युच्यते । तन्न; तत्राप्यतिसंध्यासमीपः सायाह्न एवोक्तोऽन्यथा दुर्ज्ञानत्वात् । दिनतृतीयांशावरुद्धे तस्मिन् सामान्यवचनाप्रवेशात्[6] । तदेवं पाठद्वैधे न्यायो निर्णायक उक्तः । विष्णुः

"सन्ध्यारात्रौ न कर्तव्यं श्राद्धं खलु विचक्षणैः ।
तयोरपि च कर्तव्यं यदि स्याद् राहुदर्शनम् ॥
राहुदर्शनदत्तं हि श्राद्धमाचन्द्रतारकम् ।
गुणवत् सर्वकामीयं पितृणामुपतिष्ठते ॥"

एतेन राहुदर्शनश्राद्धस्य काम्यत्वमप्युक्तम्[7] । हारीतः

"तीर्थद्रव्योपपत्तौ च न कालमवधारयेत् ।
पात्रं च ब्राह्मणं प्राप्य सद्यः श्राद्धं विधीयते ॥"

---

१. यदूर्ध्वं क
२. इति क ×
३. श्राद्धी ख
४. वदन्ति ख
५. व्यवस्थित क ×
६. असंभवात् ख +
७. अपि क ×

1–2 Cf. मत्स्यपुराण २२.८८
14–17 Cf. विष्णुस्मृति ७७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उपपत्तिः प्राप्तिः । अवधारयेन्नियमयेत् । तेनायमर्थः—योऽयममावास्यादिकालनियमो यश्चापराह्णनियमः सोऽत्र नास्ति । अतो यदैव तीर्थप्राप्तिस्तदैव निषिद्धरात्र्यादिकालं विहाय श्राद्धमिति । पात्रं पंक्तिपावनम् । तत्र तीर्थश्राद्धे विशेषतो[१] न ब्राह्मणपरीक्षा । अन्नाद्यर्थ[२]मुपस्थितो भोज्यः । अर्घावाहनवर्जनम्[३] । सक्तुसंयावपायसपिण्याकतिल[४]गुडैः श्राद्धम् । पिण्डदानं चामान्नेन वा । अन्यत्रापि पाकाद्यसम्पत्त्या वा श्राद्धमेव कर्तव्यम् । चन्द्रसूर्यग्रहे चामश्राद्धमेव । आमश्राद्धे चामान्नेनैव ब्राह्मणहस्तेऽग्नौकरणं कर्तव्यम् । तेनैव पिण्डदानम्[५] । एकोद्दिष्टं तु पक्वान्नेनैव कर्तव्यम् । तदसंभवे तदहरुपवासः । शूद्रेण चामश्राद्धमेव सदा कर्तव्यम् । द्विजशुश्रूषापरशूद्रेण तु त्रयोदशेऽहनि[६] प्रेतश्राद्धं पक्वान्नेनैव कर्तव्यम् । तीर्थश्राद्धे च विलम्बो नैव कर्तव्यः[७] । किंतु यदैव तीर्थप्राप्तिस्तदैव स्नानोत्तरकृत्यं तर्पणादि कृत्वा श्राद्धं कर्तव्यम् । न च[८] विघ्नं समाचरेत् । न चात्र श्राद्धे काकादिदृष्टिदोष इति[९] । ऽव्यपदेन च येनानन्तफलप्राप्ति[१०]स्तद् बोद्धव्यम् । तच्च सदन्न[११]कालशाकदधिमधुतिलभूयिष्ठवार्धीणससर्वाङ्गलोहिताज[१२]शृङ्गरहितगण्डकमहाशल्कमत्स्योपाहृतपशुमांसमन्यान्यपि विशेषविहितानि व्रीहियवादीन्यवहितान्यपि निषिद्धवर्जमुपादेयानि । [१३]निषिद्धानि तु[१४] पालंकीनालिकापोतिकाशिग्रुशि[१५]म्बिवार्ता[१६]कुभूलवणमसूरप्रत्यक्ष[१७]लवणपिप्पली-

---

१. विशेषः क
२. अन्नार्थी क
३. °वर्जम् क
४. °तिल° क ×
५. आमान्नेनैव…पिण्डदानम् ख ×
६. °ऽह्नि ख
७. न कार्यः क
८. च ख ×
९. इति ख ×
१०. यदनन्तफलत्वेनोक्तं क
११. मुन्यन्तर° ख
१२. °छागमांसं ख
१३. अथ ख +
१४. तु ख ×
१५. °श्वम्बक° ख
१६. °वार्ताकः° ख
१७. °उषर° ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्षपकूष्माण्डालाबुतण्डुलीयकः[1] कुसुम्भपिण्डमूलकः[2] कर्पूर[3]मार्गाजोष्ट्राविकं चामरैकशफं[4] माहिषं श्राद्धार्थं मे प्रयच्छति। याचितं तपसः वंशाग्रः कोविदारकोरकोऽदूषकलोहितवृक्षनिर्यासलशुनपलाण्डुगृञ्जनं कूष्माण्डकृष्णलवणं ग्राम्यवराहतिर्यग्घाति[5]तविषच्छद्महतः स[6]मन्त्रप्रोक्षितमांसः विट्कृष्णाजाजी शितपाकी कुम्भिहस्त्यंकुरादि[7]वृन्ताकाकृताग्रयो धान्यजाता अच्छोदोद्भव[8]निर्यासशणकुलत्थबीजपूरकबिल्वकार्कधस्तू[9]रपारिभद्राटरूषकपिण्याकमथितभल्लातकवरटकपित्थातसीदधिशाकौषधिवर्जं सजलं जम्बूफलं रसगन्धहीनाक्षतकीटशर्करापाषाणोपहतवाग्भावदुष्टदुष्टोपहतातिलवणवासोऽवधूतं यत्र च पाकानन्तरं प्रत्यक्षलवणं प्रक्षिप्तं तत् प्रत्यक्षलवणम्।

अथ विहितनिषिद्धानि

पक्वबिल्वहिङ्गुपिप्पलीशृङ्गाटककरम्भनिष्पावकेषिकामधुकमरीचानि। एषां च केवलविहितालाभे[10] उपादानम्। एषामप्यभावे[11]ऽविहितानिषिद्धानाम्[12]। निषिद्धस्य तु सर्वथाऽनुपादानम्। यदुक्तमपकरणत्वेन विधिस्वातन्त्र्येण च[13] निषेध इति तन्न[14], विशेषाश्रयणात्। वैपरीत्यस्यापि संभवात्। करम्भाद्यप्राप्तेश्च। न त्वनेकेषां द्रव्याणां विधौ व्रीहियवविधिवद् विकल्पापत्तिः[15]। मैवम्

---

१. °तण्डुलीयः° क
२. °पिण्डमूलं क
३. °कर्पूर° क×
४. °शफ° क
५. °व्याधि° क
६. मन्त्राप्रोक्षित° ख×
७. °अंकुरादि° क×
८. °वेदोक्त° क
९. °धस्तूर क×
१०. °विहिताभावे क
११. °प्यलाभे ख
१२. °निषिद्धस्य क
१३. च क×
१४. तत्र° क
१५. विकल्पः स्यात् क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"भक्ष्यं भोज्यं च विविधं मूलानि च फलानि च ।
हृद्यानि चैव मांसानि पानानि सुरभीणि च ॥
उपनीय तु[1] तत्सर्वं[2]......................।"

इति मनु[3]वचनात् ।

"ततोऽन्नं बहुसंस्कारं नैकव्यञ्जनभक्ष्यवत्[4] ।
चोष्यपेय[5]समृद्धं[6] च यथावदुपपादयेत् ॥"

इति देवलवचनाच्च समुच्चयोऽवगम्यते[7] । अथवा लिंगात् तत्र तत्र श्रुतेश्चा[8]त्र स्व[9]प्राधान्यं व्यञ्जनादीनां तु[10] गुणफल[11]त्वमिति गुणप्रधानयोः समुच्चय एवोपपन्नः । व्यञ्जनादीनां परस्परं भिन्नकार्य[12]त्वात् समुच्चयः । तुल्यकार्यव्यञ्जनादिसमुच्चयस्तु श्रुतिबलादेव । एवमन्नप्रभृतीनामपि श्यामाकादीनां विकल्प एव, तुल्यकार्यकरत्वात् । ननु भिन्नकार्याणामेव बहूनां श्रवणात् तावतां चानुपादानात्[13] श्राद्धानिष्पत्तिरेव । नैवम्; शक्त्या नियमात् । काम्ये कथमिति चेन्न, शक्त्या दद्यादिति विधेस्तत्रार्पितत्वात्[14] । तच्च पार्वणश्राद्धं प्रेतत्वविमुक्तिहेतुकषोडशश्राद्धानन्तरं कर्तव्यम्[15]। तत्रापि[16] प्रथममशौचव्यपगमे । ततो द्वादशभिर्मासैर्मृताहे[17] द्वादशमासिकानि, एकाहोनषण्मासे ऊनषाण्मासिकमेकाहोनवर्षे ऊनवार्षिकं पूर्णे संवत्सरे नवममासे[18]

१. तु ख×
२. °एतत्° ख+
३. मनु° क×
४. °पानवत् ख
५. °भक्ष्य° ख
६. समृद्धि क
७. °वगमात् ख
८. °श्चास्य क
९. स्व° क×
१०. तु क×
११. °फल° क×
१२. °करण क+
१३. तुल्यकार्यव्यञ्जनादि···चानुपादानात् क×
१४. °स्तत्रापि गतत्वात् ख
१५. कर्तव्यम् ख×
१६. तत्रापि ख×
१७. मृताहनि क
१८. एकोहनवर्षे···मासे ख×

1–3 Cf. मनु ३.२२७-२२९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षष्ठमासे[1] त्रिपक्षे द्वादशाहे वा पुत्रजन्मादिवृद्धि[2]दिवसे[3] वा सपिण्डीकरणमिति । तत्र सर्वत्र प्रेतशब्देनोल्लिख्य त्यागः । एकं पात्रम् । एकं पवित्रम् । एकोऽर्घ्यः । एकः पिण्डः । नावाहनम् । नाग्नौकरणम् । नात्र[4] विश्वेदेवाः । स्वदितमिति तृप्तिप्रश्नः । सुस्वदितमित्युत्तरम् । उपतिष्ठतामित्यक्षय्यपद[5]स्थाने अक्षय्योदकदाने स्वस्त्यस्त्विति वदेत्[6] । सकृत् प्रणववर्जमुक्त्वा विसर्जनम् । स्वधा स्थाने सर्वत्र नम इति उपतिष्ठतामिति वा वक्तव्यम् । पिण्डे "ये चात्र" इत्यादि मन्त्रो "नमो व" इत्यादि मन्त्रश्च न पठितव्यः । प्रथमश्राद्धे त्वयं विशेषः—अर्घदानात् प्राक् छत्रं प्रेतहितमुद्दिश्य ब्राह्मणाय दद्यात् । ततः सुखस्पर्शे पादुके प्रेतस्वर्गकरणकामो दद्यात् । गन्धदानात् प्राक् दर्भहस्तस्तिलान् विकीर्य प्रेतमाह्वयेत् ।

"ओं इह लोकं परित्यज्य गतोऽसि परमां गतिम् ।"

इति[7] । गन्धादिदानानन्तरं प्रेतहि[8]तमुद्दिश्य तदुपयुक्तशय्यासनालंकारवाहनायुधादिकं प्रकृष्टं धनं[9] श्राद्धभोक्त्रे दद्यात् । श्राद्धानन्तरं गोभू[10]हिरण्यश्रेष्ठरत्ने दासीदासादिकं प्रकृष्टधनं च प्रेतमुद्दिश्य ब्राह्मणेभ्यो दद्यात् । श्रोत्रियादीन् त्रीन्[11] सप्त नव वा[12] दश वा तथा ज्ञातिबन्धुदरिद्रान् भोजयित्वा[13]तिथीन् वा भोजयेत् । पणकाकिणीमूलफलात्मिकामपि दक्षिणां तेभ्यो दद्यात् । अत्र च श्राद्धानुभोजनार्थमेक एव ब्राह्मणो निमन्त्रणीयः । इतरे च श्राद्धानन्तरं भोजयितव्याः[14] ।

---

१. षष्ठमासे क ×
२. °वृद्धि° क ×
३. °दिने क
४. अत्र क ×
५. °पद° ख ×
६. वदेत् क ×
७. गन्धदानात्···इति क ×
८. °हित° क ×
९. प्रकृष्टं धनं क ×
१०. °भू° ख ×
११. त्रीन् क ×
१२. वा क ×
१३. भोजयित्वा ख ×
१४. भोजनीयाः ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"ओं गतोऽसि दिव्यलोकं त्वं कृतान्तविहितात् पथः[1]।
मनसा वायुभूतेन[2] विप्र त्वाहं[3] . निमन्त्रये ॥
पूजयिष्यामि भोगेनेत्येकं विप्रं निमन्त्रयेत् ॥"

तथा

"दत्त्वा[4] पाद्यं तु[5] विविधं नमस्कृत्य द्विजोत्तमम् ।"

तथा

"एवं शुद्धिं ततः कृत्वा ब्राह्मणं शीघ्रमानयेत् ।
आगतं तु द्विजं दृष्ट्वा कर्तव्या स्वागत[6]क्रिया ॥"

इत्यादौ वराहपुराणे बहुश एकवचननिर्देशात् । यच्च

"तत एकादशाहे तु द्विजानेकादशैव तु ।
क्षत्रादिः सूतकान्ते तु भोजयेदयुजो द्विजान् ॥"

इति मत्स्यपुराणेनो[7]क्तम् । तत्राप्येकं श्राद्धे भोजयेत् । दशश्राद्धानन्तरमित्येकादशत्वं विवक्षितम्[8] । अतएव श्राद्धानन्तरं बृहस्पतिः

"श्रोत्रिया भोजनीयास्तु[9] नव सप्त त्रयोदश ।"

एवं तत्र[10] तत्रैकोद्दिष्टश्राद्धे ब्राह्मणबहुत्वमनेनैवाभिप्रायेण वर्णनीयम्[11]। अतएव समृद्धा[12] अप्येकोद्दिष्टे एकमेव ब्राह्मणं भोजयन्ति । यत्तु "ब्राह्मणान् यथाशक्त्युदङ्मुखान् गन्धमाल्यवस्त्रालंकारपूजितान् भोजयेदेकवन्मन्त्रान् इत्येकोद्दिष्टे" [13]इति विष्णुना बहुत्वं निर्दिष्टं तत्

१. ओं ··पथः क ×
२. भावपूतेन ख
३. विप्रेभ्योऽहं क
४. च ख +
५. तु ख ×
६. °भ्यागत° ख
७. °पुराणे क
८. वोद्धव्यम् क
९. हि क
१०. तत्र ख ×
११. वर्णितम् क
१२. सुसमृद्धा ख
१३. एकवन् मन्त्रान् ख +

10–11 Cf. मत्स्यपुराण १८.८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कठशाखिविषयं द्रष्टव्यम्[1]। तदभिप्रायकत्वात्[2] तदभिधानस्य। "एवं च ब्रूयुस्तेऽभिरताः स्माहे"ति याज्ञवल्क्यीयमपि ब्राह्मणान्तर[3]बहुत्वं शाखान्तरविषयम्। अथवा प्रेतश्राद्धनिमन्त्रितभोजनकाल एवेतरे सत्कारपूर्वं[4] भोजयितव्याः[5]। तदभिप्रायं वैष्णवीयं[6] याज्ञवल्क्यीयमपि[7] बहुत्वमिति। तथा चोक्तं वराहपुराणे[8]—

"भुज्यमानस्य विप्रेण प्रेतभागस्य सर्वशः।
ज्ञातिवर्गेषु मित्रेषु सम्बन्धिषु जनेषु च॥
भागस्तस्य प्रदातव्यो येनार्थो यस्य विद्यते॥"

अत्रैकादशाहैकोद्दिष्टप्रयोगः

तत्र[9] पूर्वदिने पूर्ववत्[10] स्नानादिकं कृत्वास्तंगते सूर्ये विप्रगृहं गत्वा,

"ओं गतोऽसि दिव्यलोकं त्वं कृतान्तविहितात् पथः।
मनसा वायुभूतेन[11] विप्र त्वाहं निमन्त्रये॥
पूजयिष्यामि भोगेन..........................॥"

इति पठित्वा प्रेतमुद्दिश्य[12] "ओं अद्यामुकगोत्रस्यामुकप्रेतस्य श्वः श्राद्धं[13] करिष्ये[14] त्वं मयात्र[15] निमन्त्रित" इति द्विजं निमन्त्रयेत्[16]। "ओं[17] निमन्त्रितोऽस्मी"ति तेनोक्ते नियमश्लोकमभ्यर्थनश्लोकं चैकवचनोहेन पठित्वा यद्याचरिष्यसीत्यादि तेनोक्ते पाद्यं दत्वा

---

१. द्रष्टव्यम् क ×
२. °प्रायत्वात् क
३. ब्राह्मणान्तर क ×
४. सत्कारपूर्वकमितरे ख
५. भोजनीयाः ख
६. वैष्णवं क
७. च क
८. ब्रह्म° क
९. तत्र क ×
१०. पूर्ववत् पूर्वदिने क
११. पूतभावेन ख
१२. प्रेतमुद्दिश्य पठित्वा ख
१३. श्राद्धे ख
१४. कर्तव्ये ख
१५. अत्र क ×
१६. निमन्त्र्य क
१७. ओं ख ×

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्विजं[1] नमस्कृत्य पादौ प्रक्षालयेत्[2] तिल[3]तैलेन। ततः सूर्योदये ब्राह्मणस्य श्मश्रुकर्म नखच्छेदनं च कारयित्वा उद्वर्तनोपकरणं स्नानीयकरणं[4] च दत्वा नद्यादितीरे गृहे वा श्राद्धार्थं भूमि प्रकल्प्य[5] नद्यादिजले स्नात्वा तीर्थानि मनसा ध्यात्वा तज्जलेनैवात्मानमभ्युक्ष्य ब्राह्मणमानीय स्वागतं पृष्ट्वा पाद्यं च[6] दत्वा पादौ प्रक्ष्याल्य चाचम्य[7] शिरसाभिवन्द्य जानुनी विस्राव्य पाद्यार्घ्यं दत्वा स्वयमप्याचम्य[8] सिद्धमित्यभिधाय कल्पितासनं स्पृशन् ब्राह्मणमुपवेशयेदनेनैव मन्त्रेण—

"ओं अत्रासने देवराजाभ्यनुज्ञातो विश्रम्यतां द्विजवर्यानुग्रहात्। प्रसादयेस्त्वासनं गृह्य पूतं[9] ज्ञानाग्निपूतेन करेण[10] विप्र।" ततः श्राद्धाय संकल्पं[11] कृत्वा गायत्रीं "देव अद्य" इति च त्रिर्जपित्वा[12] "ओं अद्यामुकगोत्र पितरमुकप्रेतरिदम्[13]आसनं ते मया दीयते तत्रोपतिष्ठतामि"त्यासनमुत्सृज्य ब्राह्मणाय वरणार्थं छत्रं दत्त्वा स्वर्गतरणकामः[14] पादसुखस्पर्शकरे[15] पादुके [16]प्रेतदुर्गतितरणकामो दद्यात् "अपहते"ति तिलान् विकीर्य[17]। ततोऽर्घपात्रे पवित्रं दत्त्वा "ओं शन्नो देवी" इत्यादि वा जलं, "तिलोऽसी"ति तिलान् [18]गन्धपुष्पाणि प्रक्षिप्य

---

१. द्विजान् क
२. प्रक्षाल्य ख
३. तिल ख ×
४. स्नानीयकरण क ×
५. कल्पयित्वा क
६. च क ×
७. चाचम्य क ×
८. आचमनीयं दत्वा क
९. पूत° क
१०. करे क
११. संकल्प्य क
१२. गायत्रीं जपित्वा ख ×
१३. इदम् क ×
१४. स्वर्गतरणकामः क ×
१५. °करे क ×
१६. दत्त्वा ख +
१७. प्रेत°...विकीर्य ख ×
१८. दत्त्वा ख +

---

14 Cf. मन्त्रब्राह्मण २।३।३, खादिर ३।५।१३, गोभिल २.६
15 Cf. ऋग्वेद ७।६।५, शुक्लयजुर्वेद ३६.१२, आश्वलायन गृः सूः ४।७।८
16 Cf. आश्वलायन गृः सूः ४।७।८, गोभिल २.१०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पवित्रं विप्रकरे दत्वा[1] "या दिव्येति" पठित्वा द्विजहस्ते सपवित्रे[2] नामगोत्राभ्यां प्रेतायार्घं दद्यात्[3]। ततः कुशहस्तो भूमौ[4] प्रेतमाह्वयेत्। तत्र मन्त्रः—

"ओं इहलोकं परित्यज्य गतोऽसि परमां गतिम्।"

इति। ततो गन्धपुष्पधूपदीपाच्छादनानि[5] प्रेताय दत्त्वा ब्राह्मणाय "सर्वः-सु[6]गन्ध" इति मन्त्रेण[7] गन्धं, "श्रिया देव्या" इति मन्त्रेण पुष्पाणि "वनस्पतिरसानि"ति मन्त्रेण धूपं समर्प्य दीपवस्त्राणि च प्रेतोद्देशेन समर्प्य[8], तदुपभुक्तासना[9]युधालंकारवस्त्रा[10]दिकं ब्राह्मणाय दद्यात्। ततोऽनेकविधान्नपानव्यञ्जनादिकं सामिषं[11] यथावत् परिविष्य संकल्प्यापोशानं दत्त्वा जपादिकं विधाय द्विजे तृप्ते अन्नं विकीर्याचम्य पुनर्जप्त्वा चुलुकं दत्वा "विप्रं स्वदितमि"ति पृष्ट्वा "सुस्वदितं" इत्युक्ते[12] शेषमन्नमनु[13]ज्ञाप्योच्छिष्टसन्निधौ चतुरस्रमण्डलमध्ये कुशमूलेन[14] दक्षिणाग्ररेखां कृत्वा तदुपर्युपमूलसकृन्मूलंकुशानास्तीर्य "देवताभ्य" इति त्रिर्जपित्वा तदुपरि[15] प्रेतायावनेजनं दत्त्वा[16] ततः श्राद्धशेषान्नपान[17]व्यञ्जनादिनिर्मितं पिण्डं प्रदाय कुशमूले करं प्रोञ्छ्याचम्य हरिं स्मृत्वा पुनरवनिज्य

"ओं[18] अत्र पितर्मादयस्व
यथाभागमावृषायिष्ट"

१. पवित्रं ··दत्वा क×
२. सपवित्रे क×
३. दत्वा क
४. भूमौ क×
५. गन्धादि ख
६. गन्धः ख
७. मन्त्रेण क×
८. समर्प्य प्रेतोद्देशेन क
९. °शय्या° क
१०. °वस्त्र° क×
११. व्यञ्जनाद्यामिषं क
१२. प्रत्युक्तः ख
१३. °आस्तीर्य° ख+
१४. °पिंजल्या ख
१५. ततः ख
१६. प्रदाय ख
१७. °पान° क×
१८. ओं ख×

17–18 Cf. साममन्त्रब्राह्मण २।३।६, खादिर ३।५।१७, गोभिल ४।३।११

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति पठित्वोदङ्मुखीभूय श्वासं नियम्य तेनैव पथा[1] परावर्तमानो जपेत् ।

"ओं[2] अमीमदत् पिता यथाभागमावृषायिष्ट ।"

इति जपेत् । ततो नीवीं विस्रस्य "ओं[3] एतत्ते पितर्वास" इति मन्त्रं[4] पठित्वा नामगोत्राभ्यां प्रेताय पिण्डोपरि सूत्रं दत्त्वा गन्धादि निक्षिप्य "वसन्ताय" इत्यादिना षड्ऋतून् नमस्कृत्य द्विजमाचमय्य तत्करे उदकं पुष्पाणि अक्षतादि[5] च[6] दत्त्वा शुचिर्भूत्वा शान्त्युदकानि[7]-कृत्वा शिरसा प्रणम्य मन्त्रान्[8] प्रस्तुवीत[9] ।

"नमो नमो मेदिनी लोकधात्रि
उर्वी महीशैलगिरिधारिणी धरणि नमः ।"
"त्रि[10]जगत्प्रतिष्ठे वसुधे नमोऽस्तु
वैष्णवोभूतधात्रि नमोऽस्तु ते सर्वरसप्रतिष्ठे
निवापनवीचि नमो नमोऽस्तु ते ॥"

ततः "ओं अद्या[11]मुकगोत्रस्य पितुरमुकप्रेतस्य[12] दत्तमेतदन्नपानादिकमुपतिष्ठतामिति" विप्रकरेऽक्षय्योदकं दत्वा,

"ओं अघोरः पितास्तु ; गोत्रं नो वर्धताम् ।"

इति वदेत् । सर्वत्र ब्राह्मणेन प्रत्युक्ते[13] ततः पिण्डोपरि सपवित्रान्

१. तेनैव पथा ख ×
२. ओं ख ×
३. ओं क ×
४. मन्त्रं ख ×
५. पुष्पाक्षतादि क
६. च क ×
७. शान्त्युदकं च क
८. मेदिनीमन्त्रेण ख
९. अस्तुवन् ख
१०. त्रि° क ×
११. ओमद्य ख ×
१२. अमुकप्रेतस्य क ×
१३. वर्धतामिति तेनोक्ते क

3 Cf. साममन्त्रब्राह्मण २।३।७, खादिर ३।५।१६, गोभिल ४।३।१२
16 Cf. गोभिल २.३३, कात्यायन ३ .

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कुशानास्तीर्य नमो वाचयित्वा[1] तदुपरि वारि[2]धारां दत्वा[3] पिण्डं परिषेचयेत्[4] ।

"ओं ऊर्जं वहन्तीरमृतं घृतं
पयः कीलालं परिस्रुतम् ।
स्वधा स्थ तर्पयत मे पितरम्[5] ॥"

इति मन्त्रेण[6] पिण्डमुत्थाप्यार्घपात्रमुत्तानीकृत्य दक्षिणां दत्त्वाशिषः प्रतिगृह्य चरणौ प्रक्षाल्य[7] द्विजं नमस्कृत्य पाणिना पाणिं धृत्वोत्थाप्य शय्यासनमञ्जनं कंकतिकां[8] च दद्यात्[9] । द्विजस्तु तदादाय शय्यामध्यास्य मुहूर्तं विश्रम्य[10] निवापस्थानमागत्य गवां[11] लाङ्गूलमुद्धृत्य हस्तमादध्यात्[12] । ततस्ताम्रपात्रस्थिततिलोदकं सामवेदिनो द्विजातीया[13] आहरेयुर्मन्त्रेण । श्राद्धकर्ता च तदादाय गृहस्थितं[14]द्रव्याणि[15] [16]प्रसिञ्चयेत् । ततोऽग्निमुखान् देवांस्तर्पयेत् । ततो[17] भूतेभ्यो बलिं दत्त्वा ब्राह्मणान् सम्पूज्य स्वस्तीत्योंका[18]रवर्जमुच्चार्य ब्राह्मणं विसृज्य बहिःस्थितं वारिधारया [19]त्रिर्वेष्टयित्वा प्रणम्यानुव्रज्याभिवाद्य प्रदक्षिणीकृत्य गृहं प्रविशेत् । ततः प्रेतहितमुद्दिश्य गोभूहिरण्यादिकं[20] दद्यात् । श्रोत्रियादींश्च[21] भोजयेत् । मत्स्यपुराणे

---

१. नमो वाचयित्वा क ×
२. वारि° क ×
३. ददत् ख
४. परिषिञ्चेत् ख
५. °रमृतं ··· पितरम् ख ×
६. ततः क
७. संगृह्य क
८. कंकेतिकां क
९. दत्वा ख
१०. च क्षणं ख +
११. गो° क
१२. निदध्यात् क
१३. सामवेदिद्विजातय क
१४. °स्थितं ख
१५. °द्रव्यं ख
१६. प्र° क ×
१७. ततो ख ×
१८. °कार° क ×
१९. त्रिः ख ×
२०. °हेमदास्यादिकं ख
२१. च क ×

3–5 Cf. मन्त्रब्राह्मण २।३।१५, शुक्लयजुर्वेद २.३४, विष्णुस्मृति ७३.२३, खादिर ३।५।२९, गोभिल ४।३।२६, कात्यायन ३

९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'आशौचान्ताद् द्वितीयेऽह्नि शय्यां दद्याद् विलक्षणाम् ।
काञ्चनं पुरुषं तद्वत् फलवस्त्रसमन्वितम् ॥
सम्पूज्य द्विजदाम्पत्यं नानाभरणभूषणैः ।
वृषोत्सर्गं च कुर्वीत देया च कपिला शुभा ॥"

इदं च शय्यादिदानं प्रेतहितकामेन कर्तव्यमाचारात् । अतएव 'नीलं वा वृषमुत्सृजेदि'ति पितृणामाशंसा । केचित्तु नैमित्तिकं[1] मन्यन्ते तन्न; द्वितीयेऽह्नीति कारकविभक्तेराधारत्वेनैवान्वय[2]प्रतीतेः । साधिकारकमंण्याधारत्वेन वान्वयो[3] वाच्य इति न, कालवत्त्वेनैव पूर्वमधिकारः । निमित्तं तु कारकविभक्त्यसंभवे भिन्ने जुहोतीत्यत्र च[4] स्वीकृतम् । श्राद्धशेषान्न[5]भोजनं चात्र न कर्तव्यम् । अनेनैव विधिना द्वादशाहे श्राद्धं कर्तव्यम् । किन्त्विदं श्राद्धं न प्रेतत्वविमुक्तिहेतुः, किन्तु पृथगेव । "यत्त्वेकादश्यां द्वादश्यां वा श्राद्धं कर्म" इति बौधायनवचनं[6]; तत्र वाकारः समुच्चये । यद्वा "प्रकृष्टक्षत्रियस्य द्वादशाहम्[7] एकादशाहं श्रोत्रियस्ये"ति गौतमाभिधानात्[8] द्वादशाहे शुचित्व[9]लाभात्तद्विषयोऽयं व्यवस्थितविकल्पः । यत्तु[10] द्वादशाहश्राद्धे मूलं नास्तीति वदन्ति तत् पश्यतोहरत्वम् । आशौचान्त[11]श्राद्धमभिधाय

"द्वितीयेऽह्नि पुनस्तद्वदेकोद्दिष्टं समाचरेदिति ।"

मत्स्यपुराणवचनस्य[12] राजादिभिर्लिखितत्वात् । द्वादशमासिकेषूनषाण्मा-

---

१. नैमित्तितां ख
२. °एवान्वय° क ×
३. विनियोग क
४. इत्यादौ क
५. °ऽन्न° क ×
६. °वाक्यं क
७. द्वादशाहं क ×
८. °वचनात् ख
९. शुद्धि° क
१०. यत्र क
११. अशौचान्ते क
१२. °वचन क ×

1–4 Cf. मत्स्यपुराण १८.१२-१४
17 Cf. मत्स्यपुराण १८.९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सिकोनवार्षिकयोरप्ययमेव[1] प्रयोगः। किन्तु विप्रगृहगमननिमन्त्रणमन्त्रासनमन्त्र[2]छत्रपादुकादानप्रेताह्वानमन्त्रगन्धादिदानवस्त्रालंकारादिदान[3]शान्त्युदकशिरःप्रणाममन्त्रस्तुतिचरणसंवाहनद्विजनमस्कारान् तथा ब्राह्मणोत्थापनानन्तरं[4] ब्राह्मणविसर्जनात् प्राक् यदुक्तं तन्न कुर्यादिति विशेषः। सपिण्डीकरणानन्तरं च यत् प्रतिवर्षमृताहश्राद्धं तदप्यनग्निनैकोद्दिष्टविधिनैव कर्तव्यम्। किन्तु स्वधोच्चारणं तत्र कर्तव्यम्। "अभिरम्यतामि"ति ब्राह्मणविसर्गे "अभिरताः स्म" इति प्रतिवचनं प्रेतशब्देनोद्देशो न कर्तव्य इति विशेषः[5]। यस्य त्वमावास्यायां प्रौष्ठपद्यूर्ध्वंकृष्णपक्षे वा क्षयः पार्वण[6]विधिनैव तस्य कर्तव्यं[7] सपुत्रश्चेत्। अपुत्रस्तु तत्राप्येकोद्दिष्टमेव।

"अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये।
तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणम्॥"

इति आपस्तम्बेनोक्तेः। साग्निस्तु सपिण्डीकरणोत्तरं पार्वणविधिनैव[8] मृताहे [9]श्राद्धं कुर्यात्[10]। सपिण्डीकरणोत्तरं तु प्रेतपरभूतपुरुषत्रयश्राद्धं[11] विश्वदेवश्राद्धादि सकलपार्वण[12]विधिनैव कर्तव्यम्। प्रेतश्राद्धं च[13] प्रागुक्तैकोद्दिष्टविधिना कर्तव्यम्[14]। प्रयोगस्त्वेक एव। तत्र मध्याह्नकाल एवादर्तव्यः, प्रेतश्राद्धप्राधान्यात्। यच्च नात्र दैवं भोजयेदिति सपिण्डीकरणं प्रक्रम्याश्वलायनगृह्यपरिशिष्टवचनं[15] तत् पदार्थानुसमयः पित्रादिभिः सह न कर्तव्य[16] इत्येवं परम्। अतएव

---

१. °श्र° ख
२. °सप्त° क
३. °स्त्रालंकारादिदान° क ×
४. ब्राह्मण° क ×
५. सपिण्डीकरणान्तरं(5) · विशेषः क ×
६. पारण° क
७. श्राद्धं कार्यम् ख
८. °रेव क
९. अपि क +
१०. श्राद्धं कुर्यात् क ×
११. °श्राद्ध° क ×
१२. °सर्व° ख
१३. तु क
१४. कर्तव्यम् क ×
१५. परिशिष्टवचनं क ×
१६. कार्यं ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रागेव दैर्घ्यमन्त्रादिकं च दत्त्वा गन्धमाल्यैः पात्रमर्चयित्वा हुतशेषं पितृभ्यः पाणिषु दद्यादिति तेनैव काण्डानुसमयः स्फुटमुपदर्शितः ।

"सपिण्डीकरणश्राद्धं देवपूर्वं नियोजयेत् ।"

इति शातातपवाक्य[1]मपि काण्डा[2]नुसमयमेव [3]प्रदर्शयतीति[4] पदार्थानुसमयस्य प्राप्तत्वात् । मातृसपिण्डीकरणं[5] तु जीवति पितरि पितामहीप्रपितामहीवृद्धप्रपितामहीभिः सह पितामह्यां जीवन्त्यां प्रपितामह्यादिभिस्तिसृभिः मृते पितरि तदादित्रयेण । यच्च

"स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं स्त्रियाः ।"

इति हारीतवाक्यं, तत्र पितामह्यादिव्यावृत्त्यर्थमेवकारः । अतएव

'गन्धोदकतिलैर्युक्तं कुर्यात् गोत्रचतुष्टयम् ।
अर्घार्थं पितृपात्रेषु प्रेतपात्रं प्रषेचयेत् ॥
ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत् ॥"

एतत् सपिण्डीकरण[6]मेकोद्दिष्टं स्त्रिया अपीति याज्ञवल्क्येन स्त्रियाः सपिण्डीकरणं पुरुषत्रयेणैवोक्तम्[7] । भविष्यपुराणेऽप्येवमेव[8] सपिण्डीकरणलक्षण[9]मुक्तमेव[10] ।

"नित्येन तुल्यं शेषं स्यादेकोद्दिष्टं स्त्रिया अपि ।"

इत्येकोद्दिष्टमेकादशाह[11]श्राद्धं सपिण्डीकरणं च स्त्रिया अपि कर्तव्यमित्यर्थः । अथवा प्रेतेतरश्राद्धस्याङ्ग[12]तयैतत् सपिण्डीकरणश्राद्धं[13]

---

१. °वचन° क
२. कालानु° ख
३. एव क ×
४. उपपादयतीति क
५. °सपिण्डीकरणं ख ×
६. °करणम् ख ×
७. °सहोक्तम् ख
८. °ऽप्येवमेव ख ×
९. °लक्षण° ख ×
१०. उक्त्वा एव ख
११. °आदि° ख +
१२. °श्राद्धस्यांगत्वात् ख
१३. °श्राद्धे ख

10–12 Cf. याज्ञवल्क्य १.२५३–२५४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रधानमेकोद्दिष्टम्, अतः स्त्रिया अपि कर्तव्यमिति[1]। पुत्राभावे स्त्रियाः सपिण्डीकरणम् अनपत्यासु मातृभिस्तिसृभिः[2] सह कर्तव्यम्। तथा च पैठीनसिः—

"अपुत्रायां मृतायां तु पतिः कुर्यात् सपिण्डताम्।
श्वश्र्वादिभिः सहैवास्याः सपिण्डीकरणं भवेत्[3]॥"

पतिपुत्राभावे स्त्रीसपिण्डने[4] प्रमाणं नास्ति[5]। सपत्नीपुत्रे पुत्रत्वातिदेशात् तेनापि [6]कर्तव्यमिति केचित्। अनूढायाः सर्वमेव हि[7] कृत्यं पितृपितामहादिभिः कर्तव्यम्। ब्राह्म[8]दैवार्षप्राजापत्यविधिपरिणीतायाः भर्तृगोत्रेण। आसुरगान्धर्वराक्षसपैशाचविधिपरिणीतायाः सपिण्डनपर्यन्तं पितृगोत्रेण, ततः परं भर्तृ[9]गोत्रेण सर्वमेवौर्ध्वदेहिकं पुत्रपत्यादिभिःकर्तव्यमिति वृद्धाः। अन्ये तु

'संस्थितायां तु भार्यायां सपिण्डीकरणान्तिकम्।
पैतृकं भजते गोत्रमूर्ध्वं तु पतिपैतृकम्॥"

इति शातातपवचने भार्याशब्दस्य सप्रतियोगित्वात्[10] पतिकर्तृकत्वपक्षे सपिण्डकरणपर्यन्तं[11] पितृगोत्रभजनमूर्ध्वं च पतिगोत्रभजनम्। अन्यकर्तृकत्व[12]पक्षे तु परिणयोत्तरमेव पतिगोत्रभजनम्।

"पाणिग्रहणिका मन्त्राः पितृगोत्रापहारकाः।
भर्तृगोत्रेण दातव्यं स्त्रीणां पिण्डोदकन्ततः॥
चतुर्थीहोममन्त्रेण त्वङ्मांसहृद[13]येन्द्रियैः।
भर्त्रा संयुज्यते नारी तद्गोत्रा[14] तेन सा भवेत्॥"

१. इति क ×
२. मात्रादिभिः क
३. तथा (2)·· भवेत् क ×
४. स्त्रियाः सपिण्डीकरणे क
५. नास्ति ख ×
६. न क +
७. हि क ×
८. ब्रह्मं° क
९. पति° क
१०. पतिप्रयोगिकत्वात् क
११. सपिण्डनपर्यन्तं क
१२. °कत्व° क ×
१३. °रुधिरे° ख
१४. होत्रा क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति बृहस्पतिवचनात्[1]। पुत्रिकापुत्रेण मातृसपिण्डीकरणं मातामहादिभिः सह कर्तव्य[2]मिति विशेषः।

अथ प्रयोगः

पूर्वेद्युः स्नानादिकं कृत्वा श्राद्धदिने प्रातःकृत्यं विनिवर्त्य[3] कुशोत्पाटनादिकं च सम्पाद्य[5]स्नातान् द्विजानाहूय स्वागतादिकं पृष्ट्वा[4] प्रवेश्यासनाद्यनु संकल्पपर्यन्तं दैवक्रि[6]याकाण्डं समाप्य[7] प्रेतपूर्वकमासनादि[8] दत्त्वा पितॄनावाह्य तिलान् विकीर्य प्रेताद्यर्घपात्रचतुष्टयं सपवित्रं तिलजलगन्धपुष्पैरापूर्य[9] प्रेतपूर्वक[10]मर्घादिकं दत्त्वा प्रेतपात्रावस्थितेन जलेन[11] पितामहादिपात्राण्यासिचेत्।

"ओं ये समानाः समनसः
पितरो यमराज्ये।
तेषां लोकः स्वधा नमो
यज्ञो देवेषु कल्पताम्[12]।"

"ये समानाः समनसो
जीवा जीवेषु मामकाः।
तेषां श्रीर्मयि कल्पता-
मस्मिन् लोके शतं समाः॥"

---

१. इत्याहुः ख +
२. कृत्यम् क
३. कृत्वा ख
४. कृत्वा ख
५. कृत्वा ख
६. °क्रिया° ख ×
७. निवर्त्य क
८. °आसनानि ख
९. प्रपूर्य ख
१०. °पूर्वम° क
११. °पात्रेण सावशिष्टजलेन क
१२. स्वधा···कल्पताम् ख ×

10–13 Cf. शुक्लयजुर्वेद १९.४५, शाङ्खायन गृः सूः ५।९।४
14–17 Cf. शुक्लयजुर्वेद १९.४६, शाङ्खायन गृः सू ५।९।५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति मन्त्रद्वयेन[1] ततः पात्राणि न्युब्जीकृत्य गन्धादिकं दत्त्वाग्नौकरणं कृत्वा शेषं पितामहादिपात्रे दत्त्वा ततः पिण्डार्थं किंचिदवशिष्टमन्नादिकं परिवेष्य पात्रालम्भाङ्गुष्ठसंयोजनपूर्वकं[2] संकल्प्यापोशानं दत्त्वा जलपात्रविकरणाचमनपुनर्जपचुलुकदानादि कृत्वा[3] प्रेतविप्रं "स्वदितमि"ति पृष्ट्वा इतरान्[4] "तृप्ताः स्थे"ति पृष्ट्वा "यथार्हं" तैरुक्ते शेषमन्नमनुज्ञाप्य चतुरस्रमण्डलद्वये रेखाद्वयं च[5] कृत्वा तदुपरि कुशानास्तीर्य "देवताभ्य" इति त्रिर्जपित्वा[6] "एते पितर" इत्यपि पठित्वा[7] अवनेजनं दत्त्वा[8] यथोक्तान् सर्वान्नादिशेषेण[9] चतुरः पिण्डान् प्रेतोच्छिष्टसन्निधौ स्वावनेजनस्थाने प्रेताय वर्तुलं पिण्डं दत्त्वे[10]तरेभ्योऽपि त[11]त्रोच्छिष्टसन्निधौ पिण्डान् दद्यात्[12]। ततः[13] दर्भमूले करं प्रोञ्छ्याचम्य प्रत्यवनेजनं[14] दद्यात्। **"अत्र पितरो मादयध्वं"** इति पठित्वोदङ्मुखीभूय श्वासं नियम्य[15] जपन् परावृत्य श्वासं त्यक्त्वा नीवीं विस्रंस्य प्रेतपिण्ड[16]पूर्वं सूत्रं तु[17] दत्त्वा प्रेतपिण्डे गन्धादिकं च[18] दत्त्वा सुवर्णरजतकुशैः प्रेतपिण्डं त्रिधा कृत्वा पितामहादिपिण्डत्रये नियोजयेत्[19] "ये समाना" इति पूर्वोक्त[20]मन्त्रद्वयेन। ततः पितामहादि-

---

१. °न्त्रयेण क
२. °नियोजन° क
३. दत्वा ख
४. पितरः ख
५. च क ×
६. त्रि ख ×
७. पठेत् क
८. अवनिज्य ख
९. यावदशेषेण ख
१०. वर्तुलं·· दत्वा ख ×
११. तत्र क ×
१२. दत्वा ख
१३. ततः ख ×
१४. पुनरवनिज्य ख
१५. धृत्वा क
१६. °पिण्ड° ख ×
१७. तु क ×
१८. च क ×
१९. °पिंडेषु योजयेत् क
२०. पूर्वोक्त° क ×

---

11 Cf. साममन्त्रब्राह्मण २।३।६, शुक्लयजुर्वेद २.३१, खादिर ३।५।१७, गोभिल ४।३।११

15 Cf. शुक्लयजुर्वेद १९.४५–४६, शाङ्खायन गृः सूः ५।९।५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पिण्डत्रयं प्रेतपिण्डभागेन सु[1]वर्तुलं कृत्वा गन्धादिभिरभ्यर्च्य ऋतून् नमस्कृत्य ब्राह्मणानाचमय्य तदीय[2]करेषु जलपुष्पाक्षतादि दत्वा प्रेतगोत्रादिकमुच्चार्यं दत्तमन्नपान[3]मुपतिष्ठतामिति [4]विप्रकरेऽक्षय्योदकं दद्यात्[5]। पितामहादिविप्रकरेषु[6] तत्तद्गोत्रनामभ्यां[7] दत्तमन्नपानमक्षय्यमस्त्विति प्रत्येकमक्षय्योदकं दद्यात्[8]। **"ओं अघोराः पितरः सन्तु" "ओं गोत्रं नो वर्धताम्"** इति वदेत्। सर्वत्र विप्रैः "यथार्हमि"त्युक्ते पिण्डोपरि सपवित्रान्[9] कुशानास्तीर्य स्वधावाचनं कृत्वों[10]जमित्यादिना परिषिच्य "विश्वेदेवाः प्रीयन्तामिति" वाचयित्वा पिण्डानुत्थाप्यार्घमुत्तानीकृत्य दक्षिणां दत्त्वाशिषः प्रतिगृह्य[11] स्वस्तीति ब्राह्मणान् वाचयित्वा तानुत्थाप्य[12] प्रेतविप्रं विसृज्य **"वाजे वाजे"** इत्यादिना पितामहादिब्राह्मणपूर्वकं देवब्राह्मणान् विसृज्य सर्वान् ब[13]हिर्जलधारया त्रिर्वेष्टयित्वा[14] प्रणम्यानुव्रज्याभिवाद्य[15] प्रदक्षिणीकृत्य "देवताभ्य" इति त्रिर्जपित्वा[16] वामदेव्यं गीत्वा गृहं प्रविशेत्। ततः पिण्डप्रतिपत्युच्छिष्टापनयनशेषप्रतिपत्त्यादिकं कुर्यात्। त्रिदण्डियतेरेतानि[17] षोडशश्राद्धानि न कार्याणि[18]। किन्त्वेकादशाहमात्रं[19] पार्वणविधिना श्राद्धं कर्तव्यमिति। लघुहारीतः—

१. सु° क ×
२. °विप्र° ख +
३. °आदिकमक्षय्यं ख +
४. प्रेत° ख +
५. दत्वा क
६. करे ख
७. तन्नामगोत्राभ्यां ख
८. दत्वा क
९. सपवित्र° ख
१०. स्वधावाचनं कृत्वा ख ×
११. गृहीत्वा क
१२. तानुत्थाप्य ख ×
१३. बहिः क ×
१४. संवेष्ट्य ख
१५. अभिवाद्य ख ×
१६. देवताभ्यः'''जपित्वा क ×
१७. श्चैतानि क
१८. कर्त्तव्याणि ख
१९. °मात्रे ख.

5–6 Cf. विष्णुस्मृति ७३.२२, गोभिल २.३३, कात्यायन ३
11 Cf. ऋग्वेद ५।४।५, शुक्लयजुर्वेद ६.१८,२१.१, गोभिल २.३६, कात्यायन ३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"सपिण्डीकरणं यावत् प्रेतश्राद्धानि षोडश।
पृथङ् नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित्॥"

मरीचिः—

"मुख्यं श्राद्धं मासि मासि अपर्याप्तावृतुं प्रति।
द्वादशाहेन वा भोज्या एकाहे द्वादशाथवा॥"

अपर्याप्तौ असामर्थ्ये[१] ऋतुं प्रति ऋतावृतावित्यर्थः। द्वादशाहेन वा भोज्या इत्यस्यायमर्थः—पूर्वोक्तपक्षद्वयाशक्तावेकादशाहश्राद्धं कृत्वा द्वादशदिवसेषु[२] द्वादशमासिकानि कृत्वा त्रयोदशेऽहनि सपिण्डीकरणं कार्यम्[३]। शूद्रेण तु द्वादश एव दिवसे। ऊनषाण्मासिकोनवार्षिके षष्ठद्वादशदिनैरेव कर्तव्य इति षोडशश्राद्धसम्पत्तिः। एतदसंभवेऽप्ये[४]-कादशाहश्राद्धं कृत्वा द्वादश एव दिवसे[५] द्वादशमासिकान्यूनषाण्मासि-कोनवार्षिके च कृत्वा सपिण्डीकरणं कर्तव्यमिति सोऽयमेकाहे द्वाद-शाथवेत्यस्यार्थः। यद्यपि द्वादशश्राद्धान्येव मरीचिना दर्शितानि तथापि विध्याद्येकवाक्यतयोक्तः प्रयोगो बोद्धव्यः। साग्निना तु दशरात्रानन्तरं भाविनि दर्शे[६] सपिण्डनं[७] कार्यम्[८]। ततः पिण्डपितृ-यज्ञाधिकारः। लघुहारीतः—

"भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा।
सहपिण्डक्रियां कृत्वा कुर्यादभ्युदयं ततः॥
तथैव काम्यं यत् कर्म वत्सरात् प्रथमादृते।"

अथाभ्युदयिकश्राद्धे श्राद्धदिने प्रातरेव निमन्त्रणं न पूर्वेद्युः। प्राङ्-मुख उदङ्मुखेभ्यो दद्यादुदङ्मुखो वा प्राङ्मुखेभ्यः। पिण्डदानं च[९]

१. अशक्तौ ख
२. दशदिवसैः क
३. कुर्यात् ख
४. तु ख
५. दिने क
६. भाविदर्शदिने क
७. श्राद्धं क
८. कर्त्तव्यम् क
९. पिण्डांस्तु क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्राङ्मुख एव कुर्यात्[1]। आसनादौ तु[2] सर्वत्र ऋजवो दर्भाः। विकरणादितिलकार्यं यवैरेव[3] कार्यम्। स्वधास्थाने सर्वत्र स्वाहा नम इति वा योजयेत्[4]। देवतीर्थेन ऋजुपाणिना पातितदक्षिणजानुनोपवीतिना प्रदक्षिणं सर्वं कार्यम्। नापसव्यकरणम्। न पित्र्यं तीर्थम्। न वामजानुपातनम्। नाप्रदक्षिणावर्तः[5]। नामिषप्रयोगः। अन्येऽपि दक्षिणप्रवणादयः[6] साधारणाः पित्र्यधर्मा निवर्तन्ते किन्तु दैवेन धर्मेण पितॄणामुपचारः। अत्र प्रथमं मातृपितामहीप्रपितामहीनां[7] श्राद्धम्। ततः पितृपितामहप्रपितामहानां[8] श्राद्धम्। ततो मातामहप्रमातामहवृद्धप्रमातामहानां[9] श्राद्धमिति[10]। श्राद्धत्रयेऽपि[11] युग्मा ब्राह्मणा देवपूर्वकता च। केषांचित् शाखिनां देवशून्यत्वम्[12]। यत्तु[13]

"षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत्[14]।"

इति कात्यायनीयं षडभिधानं, तज्जीवन्मातृकविषयम्[15]। अत्र च मात्रादीनां नवानामपि नान्दीमुखत्वविशिष्टानां देवतात्वम्। यच्च ब्रह्मपुराणे पित्रादित्रयस्याश्रुमुखत्वमभिधाय ततः परभूतस्य पुरुषत्रयस्य नान्दीमुखत्वमुक्तं तद्वदत्रापि पित्रादयो जीवन्ति तत्र तेषां[16] न देवतात्वं किन्तु तत्[17]परभूतानामिति बोद्धव्यम्। जीवतां चिरमश्रुमुखत्वं भवतीत्यश्रुमुखत्वानुवादात्[18] विशेषनिर्णयः। एवं चाभ्युदयि-

१. दद्यात् क
२. आसनादिभिस्तु क
३. एव ख ×
४. प्रयोजयेत् ख
५. नाप्रदक्षिणावर्त्तः ख ×
६. °प्लवत्वादयः क
७. प्रपितामहीनां ख ×
८. °पितामहप्रपितामहानां ख ×
९. मातामहप्रमातामहवृद्धप्र ख ×
१०. इति ख ×
११. °त्रिके क
१२. देवशून्यम् ख
१३. यत्तु क ×
१४. °मपक्रमेत् ख
१५. षडभि···विषयम् क ×
१६. तेषां ख ×
१७. ततः ख
१८. अश्रुमुखत्वात् क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

के[1] जीवन्तमतिक्रम्य दातव्यमिति[2]। "न जीवन्तमतिक्रम्य दद्यादि"ति[3] श्रुतेर्नायं विषयः। न वा[4] "पितरि पितामहे प्रपितामहे चापि[5] जीवति न[6] कुर्यादि"ति निषेधस्य विष्णूक्तस्येति। अत्र च श्राद्धात् पूर्वमेव

"गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः॥
कृष्टिः पुष्टिस्तथा तुष्टिस्तथात्मकुलदेवताः[7] ॥"

[8]इति षोडशमातरः सगणाधिपाः प्रतिमादिषु[9] [10]पटादिलिखिता वा अक्षतराशिषु वा गन्धादिना पृथग्विधैश्च नैवेद्यैरोङ्कारादिनमोऽन्तेन स्वस्वनाम्ना[11] पूजनीयाः[12]। ततः कुड्यलग्नां धारां नातिनीचां न चोच्छ्रितां नवसप्तवारान्[13] पञ्चवारान्[14] वा घृतेन दद्यात्। तत्र मन्त्रः

"ओं वसोः पवित्रमसि शतधारम्
वसोः पवित्रमसि सहस्रधारम्
देवस्त्वा[15] सविता पुनातु
वसोः पवित्रेण शतधारेण स्वधा[16] कामधुक्वः॥"

---

१. आभ्युदयिकेन ख
२. दद्यादिति क
३. न ··दिति क ×
४. नापि क
५. प्रपितामहे चापि क ×
६. नैव ख
७. °रात्मकुलदेवतया ख
८. सह ख +
९. प्रतिमा क
१०. वा क +
११. स्वनाम्ना ख
१२. पूज्याः क
१३. वारान् क ×
१४. वारान् क ×
१५. देवस्य त्वा ख
१६. स्वाहा क

5–7 Cf. कात्यायन १.११–१२
13–16 Cf. शुक्लयजुर्वेद १.३, कात्यायन ४।२।११

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत आयुर्वृद्धिकराणि सूक्तानि जपेत्[1]। जीवन्मातृकश्च[2] पित्रादिषट्कश्राद्धं प्रमीतमातृकस्तु मात्रादिनवकश्राद्धं कुर्यात्।

अथ प्रयोगः

स्नातान् ब्राह्मणानाहूय स्वागतं पृष्ट्वा पाद्यार्घ्याचमनीयादीन् दत्वा क्लृप्तासनेषु सयवजल[3]प्रोक्षितेषु प्रागग्रदर्भद्वयान्वितेषूपवेश्य प्रागग्रजुंकुशमयात्मकमासनमुत्सृज्य तदुपर्युपवेश्य[4] विश्वान् देवानावाह्य "नान्दीमुखान् पितृनहमावाहयिष्य" इति पृच्छेत्। "आवाहय"[5] इत्यनुज्ञातः "उशन्तस्त्वा"इत्यादि[6]भिरावाह्य "अपहता" इत्यादि[7]ना यवान् विकीर्य अर्घपात्राणि सपवित्राणि "शन्नो देवी" इत्यादिना जलेनापूर्य देवपात्रत्रये—

"ओं यवोऽसि यवयास्मद्द्वेष[8]।"

इति यवान् प्रक्षिप्य मात्रादिपात्रनवके

"ओं यवोऽसि पितृदैवत्यो
गोसवे देवनिर्मितः
प्रत्नमद्भिः प्रत्तः पुष्ट्या
नान्दीमुखान् पितृन् लोकान् प्रीणयाहि नः स्वाहा ॥"

---

१. जप्त्वा ख
२. च ख×
३. सयवोदक° ख
४. तदुप···वेश्य क×
५. इति क
६. इति ख
७. इत्यादिना ख
८. सोम° ख

---

8 Cf. ऋग्वेद ७।६।२२, शुक्लयजुर्वेद १९.७०, आपस्तम्ब श्रौ. सूः ८।१४।१८, गोभिल २.५, कात्यायन २

8 (अपहता) Cf. खादिर ३।५।१३, गोभिल २.६

9 Cf. ऋग्वेद ७।६।५, शुक्लयजुर्वेद ३६.१२, आश्वलायन गृः सूः ४।७।८, गोभिल २.८, कात्यायन २

11 Cf. गोभिल २.६

13–16 Cf. आपस्तम्ब श्रौ. सूः ७।९।१०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति यवान् विकीर्य[१], सर्वेषु पात्रेषु[२] गन्धपुष्पे च[३] प्रक्षिप्य देवार्घदानं निर्वर्त्य यो यदपेक्षया प्रथममुपवेशितस्तस्य[४] तस्य दक्षिणकरं पश्चादुपवेशितविप्र[५]दक्षिणकरोपरि धृत्वा यथा पवित्राग्रं कराग्रे[६] भवति तथा[७] पवित्राणि जलान्तरं च[८] करेषु दत्वा **"ओं[९] या दिव्या"** इत्यादि[१०] पठित्वा "ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि इदमर्घ्यं तुभ्यं स्वाहा" इति मात्रेऽर्घ्यं दद्यात्[११]। तथैव पितामहीप्रपितामहीभ्यामप्यर्घ्यं[१२] दत्वा **"या दिव्या आप[१३]"** इत्यादि[१४] पठित्वा "ओं अद्यामुकगोत्र पितरमुकशर्मन् नान्दीमुख इदं तेऽर्घ्यं, **"ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा[१५]"** इति पित्रेऽर्घ्यं[१६] दत्वा पयः स्पृष्ट्वा[१७] तथैव[१८] पितामहादि[१९]पंचानामपि दद्यात्[२०]। ततः पात्राणि न्युब्जीकृत्य गन्धादिकं[२१] मण्डलानि कृत्वाग्नौकरणं कृत्वा हुतशेषमन्न[२२]मन्यच्चान्नव्यञ्जनादिकमामिषवर्जं परिविष्य[२३] पात्रालम्भाङ्गुष्ठग्रहणपूर्वकमुत्सृज्य "अन्नहीनमि"ति पठित्वा[२४] विप्रेभ्यो[२५]ऽपोशनं दत्वा अश्नत्सु विप्रेषु[२६] सावित्रीं[२७]

---

१. प्रक्षिप्य क
२. पात्रेषु क ×
३. गन्धं पुष्पं च क
४. तस्य ख ×
५. °विप्र° क ×
६. करोपरि ख
७. एवं क
८. जलान्तरं च ख ×
९. ओं क ×
१०. इति ख
११. दत्वा ख
१२. अप्यर्घ्यं क ×
१३. आप क ×
१४. इति ख
१५. स्वाहा ख
१६. पित्रेऽर्घ्यं ख ×
१७. पयः स्पृष्ट्वा क ×
१८. एवमेव ख
१९. °पंच° क ×
२०. दद्यात् क ×
२१. गन्धादि क
२२. अन्नम् ख ×
२३. परिविष्यामिषवर्जम् ख
२४. इत्याद्युक्त्वा ख
२५. विप्रेभ्यः क ×
२६. विप्रेषु क ×
२७. गायत्रीं क

---

4 Cf. आश्वलायन गृः सूः ४।७।१३, गोभिल २.१५
7 Cf. आश्वलायन गृः सूः ४।७।१३, गोभिल २.१५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"**मधु मधु मध्वि**"ति[1] जपेत्, न च[2] "**मधुवाते**"ति[3] ऋक्त्रयं न पित्र्यमन्त्रान्[4]। अन्यानि तु पवित्राणि[5] जपेत्। तृप्तेषु ब्राह्मणेषु[6] सयवमन्नं प्राङ्मुखेषु दर्भेषु[7] विकीर्याचम्य हरिं स्मृत्वा पात्रब्राह्मणेभ्यः[8] प्रत्येकं[9] जलगण्डूषं दत्वा गायत्रीं[10] "**मधु मधु मध्वि**"ति च[11] जपित्वा "सम्पन्नमि"ति ब्राह्मणान् पृष्ट्वा "सुसम्पन्नमि"ति तैरुक्ते शेषमन्नमनुज्ञाप्य पिण्डानुज्ञां गृहीत्वा पिण्डार्थं चतुरस्रं मण्डलत्रयमुच्छिष्टसन्निधौ कृत्वा तन्मध्ये "**ओं अपहता**" इत्यादिना प्रागग्रैकां रेखां कृत्वा रेखात्रयोपरि समूलान् प्रागग्रान् दर्भान्[12]स्तीर्य प्रथममण्डलदर्भमूले "ओं अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि अत्रावनेनिक्ष्व" ततः स्वाहेति सयवजलेनावनेजनं दत्त्वा मात्रे, एवमेव पितामहीप्रपितामहीभ्यां दर्भमध्याग्रयोः क्रमेण दद्यात्। ततः "ओं अद्यामुकगोत्र पितरमुकशर्मन्नान्दीमुखावनेनिक्ष्व "**ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा**"इति सयवजलैः द्वितीयपिण्डस्थानस्थदर्भमूले पित्रेऽवनेजनं दत्त्वा[13] [14]उपस्पृश्यैवमेव पितामहप्रपितामहाभ्यां दर्भमध्याग्रयोः क्रमेण दद्यात्। अनेनैव क्रमेण द्वितीयमण्डलवामपार्श्वे तृतीयमण्डले[15] [16]दर्भ[17]मूलमध्याग्र-

---

१. च ख +
२. न च क ×
३. इत्यादि ख
४. पित्र्यां सहिताम् ख
५. किन्तु सोमसामादि ख
६. ब्राह्मणेषु क ×
७. कुशेषु क
८. पात्रब्राह्मणेभ्यः ख ×
९. विप्रेभ्यः ख
१०. सावित्रीं ख
११. च क ×
१२ कुशान् ख
१३. ये चात्र (12) दत्त्वा ख ×
१४. इत्यादिना दद्यात् ख +
१५. एवमेव (14)···मण्डले ख ×
१६. अपरपश्चभ्यः स्वस्वमण्डले ख +
१७. कुश° ख

---

1 Cf. आपस्तम्ब श्रौ. सू: १५।८।५, गोभिल २.२६

1 (मधुवाते) Cf. आश्वलायन गृः सूः १।२४।१४, गोभिल २.२५

7 Cf. मन्त्रब्राह्मण २।३।३, खादिर ३।५।१३, गोभिल २.६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्रमेण मातामहादीनामपि दद्यात् । ततः सर्वस्मादन्नमुद्धृत्य[1] व्यञ्जनैरुपषिच्य यवबदरीदधिभिश्च[2] संयोज्य नवपिण्डान् बिल्वोपमान्[3] मात्रादिभ्यः स्वस्वा[4]वनेजनस्थानेऽवनेजनविधिना[5] दद्यात् । ततो दर्भमूले करं प्रोञ्छ्याचम्य पिण्डपात्रप्रक्षा[6]लनजलेन[7] पूर्ववत् पिण्डान् प्रत्य[8]वनेज्य "ओं[9] **अत्र पितर**" इत्यादि पठित्वा श्वासं नियम्यो[10]दङ्मुखीभूय "ओं[11] **अमीमदन्त**" इति पठन् तेनैव पथा परावृत्य श्वासं त्यक्त्वा नीवीं विस्रंस्य पिण्डेषु[12] सूत्रं गन्धादिकं च[13] दत्त्वा षड्ऋतून् नमस्कृत्य ब्राह्मणानाचमय्य "सुप्रोक्षितमस्तु" इत्यद्भिः भूमिं प्रोक्ष्य ओं[14] शिवा आपः सन्तु" इति ब्राह्मणकरे[15] जलं दत्त्वा[16] "ओं[17] सौमनस्यमस्तु" इति पुष्पाणि[18] "अक्षतं[19] चारिष्टमस्तु" इत्यक्षतानि[20] च[21] दत्त्वा[22] "ओं अद्या[23]मुकगोत्राया मातुरमुकदेव्या नान्दीमुख्या दत्तमेत[24]दन्नपानादिकमक्षय्यमस्त्व"ति यथा ज्येष्ठमुपर्युपरिब्राह्मण[25]करे[26]ष्वक्षय्योदकं स्वयं[27]

---

१. °अन्नादु° क
२. दधिभिश्च क ×
३. बिल्वपरिमाणान् ख
४. स्वीयस्वीय° ख
५. अवनेजनविधिना ख ×
६. °क्षालनेन ख
७. जलेन ख ×
८. प्रति ख ×
९. ओं ख ×
१०. श्वासनियमादिकं च कृत्वा ख
११. ओं ··त्यक्त्वा ख
१२. पिण्डोपरि क
१३. च क ×
१४. ओं ख ×
१५. ब्राह्मणकरे क ×
१६. दत्त्वा क ×
१७. ओं ख ×
१८. पुष्पमेव ख
१९. चाक्षतं ख
२०. इत्यक्षतं क
२१. च क ×
२२. विप्रकरे क +
२३. अद्य ख ×
२४. दत्त्वै° ख
२५. कृत्वा मातृविप्र° ख
२६. करे ख
२७. स्वयं ख ×

---

5 Cf. मन्त्रब्राह्मण २।३।६, शुक्लयजुर्वेद २.३१ खादिर ३।५।१७, गोभिल ४।३।११

6 Cf. मन्त्रब्राह्मण २।३।७, खादिर ३।५।१६, गोभिल ४।३।१२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दद्यात्[1]। एवमेव पितामह्याद्यष्टकविप्रकरेषु[2] तद्गोत्रनामभ्यां दद्यात्। ततः "ओं[3] अघोराः पितरः सन्तु"; "ओं[4] गोत्रं नो वर्धताम्" नान्दीमुखाः पितरः प्रीयन्तामि"ति वदेत्। सर्वासु[5] प्रार्थनासु[6] ब्राह्मणाः प्रत्युत्तरं[7] दद्युः। ततः पिण्डोपरि सपवित्रान्[8] कुशानास्तीर्य "ओं[9] नान्दीमुखान् पितॄन् वाचयिष्ये स्वाहा इत्युक्ते" "वाच्यतामि"त्यनुज्ञातः "पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यो मातामहेभ्यः प्रमातामहेभ्यो वृद्धप्रमातामहेभ्यः स्वाहोच्यतामि"ति वदेत्। "अस्तु स्वाहे"ति तैरुक्ते[10] [11]पिण्डोपरि "ऊर्जं वहन्ती"रिति मन्त्रेण[12] वारि[13]धारां दद्यात्। "ओं[14] विश्वेदेवाः प्रीयन्तामि"ति[15] वाचयित्वा [16]पिण्डानुत्थाप्यार्घपात्रमुत्तानीकृत्य दक्षिणां दत्त्वाशिषः प्रतिगृह्य स्वस्तिवाचनं कृत्वा[17] पङ्क्तिमूर्धन्यमङ्गुष्ठे गृहीत्वा विसृज्य वारिधारया संवेष्ट्य[18] प्रणम्यानु[19]व्रज्याभिवाद्य च[20] प्रदक्षिणीकृत्य वामदेव्यं[21] गीत्वा गृहं प्रविशेत्। ततः शेषप्रतिपत्त्यादिकं[22] च कुर्यात्। शातातपः—

---

१. दत्त्वा ख — २. °करे ख०
३. ओं ख × — ४. ओं ख ×
५. सर्वत्र ख — ६. प्रार्थनासु ख ×
७. प्रत्येकमुत्तरं क — ८. सपवित्र° ख
९. ओं क × — १०. नान्दीमुखान् (5) तैरुक्ते (7) ख ×
११. नान्दीमुखेभ्यः पितृभ्यः पितामहेभ्यः प्रपितामहेभ्य एवं मातामह्यादिभ्योऽपि प्रत्येकं स्वाहोच्यतामित्युक्त्वा, अस्तु स्वाहेति तैरुक्ते सपवित्रकुशान्तर्हित ख +
१२. मन्त्रेण क × — १३. वारि° क ×
१४. ओं ख × — १५. दैवान् क +
१६. नान्दीमुखान् पितॄन् वाचयिष्ये वाच्यतामित्युक्तः ख +
१७. वाचयित्वा ख — १८. वेष्टयित्वा क
१९. °अनुज्ञाप्य° क — २०. च क ×
२१. °देव्यां क — २२. °पत्त्यादिं क

---

2 Cf. विष्णुस्मृति ७३.१७, गोभिल २.३३, कात्यायन ३

8 Cf. मन्त्रब्राह्मण २।३।१५, शुक्लयजुर्वेद २.३४, विष्णुस्मृति ७३.२३, खादिर ३।५।२६, गोभिल १।३५, कात्यायन ३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"नानिष्ट्वा तु पितॄन् श्राद्धे कर्म वैदिकमाचरेत् ।"

भविष्यपुराणे ।

"निषेककाले सोमे च सीमन्तोन्नयने तथा ।
यज्ञे पुंसवने चैव श्राद्धं कर्माङ्गमिष्यते ॥"

विष्णुपुराणे—

"कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः ।
नामकर्मणि बालानां चूडाकर्मादिके तथा ॥
सीमन्तोन्नयने चैव[२] पुत्रादिमुखदर्शने ।
नान्दीमुखं पितृगणं पूजयेत् प्रयतो गृही ॥"

ब्रह्मपुराणे—

"कर्मण्यथाभ्युदयिके मंगल्यवति शोभने ।
जन्मन्यथोपनयने विवाहे पुत्रकस्य च ॥
पितॄन् नान्दीमुखान्[३] नाम तर्पयेद् विधिपूर्वकम् ॥"

मत्स्यपुराणे—

"उत्सवानन्दसन्ताने यज्ञे स्वाहादिमंगले ।
मातरः प्रथमं पूज्याः पितरस्तदनन्तरम् ॥
ततो मातामहाश्चैव[४] विश्वेदेवास्तथैव च ।"

केचित्तु यज्ञवद् विवाहमपि स्वीयं निमित्तमिच्छन्ति । तन्न समानमूलकत्वाय ऋष्यन्तरोक्तकन्यापुत्रविवाहपरत्वात्[६] । अथवा—

१. ज्ञेयं ख
२. श्राद्धं (4)···चैव क ×
३. नान्दीमुखं क
४. मातामहानां च क
५. विश्वदेवा° ख
६. उद्गाहपदस्य ख +

3–4 Cf. भविष्यपुराण, ब्राह्मपर्व, १८३.१७

6–9 Cf. विष्णुपुराण ३.१३.५–६

11–13 Cf. पितृभक्ति of श्रीदत्तोपाध्याय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मणि ।
पिण्डानोद्वहनात् तेषां तदभावे[1] तु तत्क्रमात् ॥"

इति छन्दोगपरिशिष्टवचनात् पितुरभावे स्वविवाहस्यापि निमित्तत्वं न तु पितरि सत्यपि । ओद्वहनात् आ उद्वहनात् विवाहपर्यन्तमित्यर्थः । जातकर्मणि तु

"न स्रोष्यन्तीजातकर्मप्रोषितागतकर्मसु ।"

इति परिशिष्टवचने[2] निषिद्धम् । पुत्रजन्मनिमित्तकं च[3] कर्तव्यमेव किं तर्हि निषेधेनेति चेन्न । यदा कालान्तरे जातकर्म क्रियते तदा श्राद्धशून्यमित्यस्ति फलम् । विवाहादौ च गर्भाधानपूर्वभूते[4] कर्मगणे एकमेव श्राद्धम् । यदुक्तं परिशिष्टे—

"विवाहादिः कर्मगणो य उक्तो
गर्भाधानं शुश्रुमो यस्य चान्ते ।
विवाहादावेकमेवात्र कुर्यात्
श्राद्धं नादौ कर्मणः कर्मणः स्यात् ॥"

केचित्तु गर्भाधानान्तर्भाविणैव कर्मगणं[5] व्याचक्षते तन्न ।

"निषेककाले सोमे च सीमन्तोन्नयने तथा[6] ।"

इत्यादि भविष्यपुराणविरोधात् । आचारस्य च ततो दुर्बलत्वादसिद्धत्वाच्च ।

---

१. तस्याभावे क
२. °वचने क×
३. °निमित्तं तु क
४. पूर्व° क×
५. कर्म° क×
६. सीमन्तोन्नयने तथा क×

16 Cf. भविष्यपुराण, ब्राह्मपर्व, १८३.१७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथाधिकारिणः[1]

अथ त्रिविधा क्रिया भवति। पूर्वा मध्यमोत्तरा चेति[2]। तत्राशौचमध्यकर्तव्यदशाहादि[3]क्रिया पूर्वा। एकादशाहश्राद्ध[4]मारभ्य सपिण्डीकरणान्तं[5] मध्यमा। अत[6] ऊर्ध्वमुत्तरा। तदेतासु त्रिविधास्वपि[7] क्रियासु द्वादशपुत्राणामौरसादीनां[8] मध्ये एकस्यापि सत्त्वे नान्यस्याधिकारः। तेषु चौरसः श्रेष्ठस्तदभावे पुत्रिकापुत्राधिकारः[9]। उभयोरभावे एकादशपुत्राः। तेषां पूर्वपूर्वाभावे उत्तरोत्तराधिकारः। विभक्तानां तु सर्वे[10]षां[11] पितृहीनौ पौत्रप्रपौत्रौ सपुत्रस्यापि पितामहस्य[12] पार्वणश्राद्धेऽधिकारिणौ। अपुत्रस्योत्तरक्रिया प्रतिसंवत्सरमेकोद्दिष्टक्रिया[13]रूपा तदीयकन्याविवाहादा[14]वाभ्युदयिकरूपा च[15]। तत्र च[16] तत्[17]पत्न्या अधिकारः[18]। तदभावे भ्रातुस्तदभावे[19] तत्सन्ततेश्च[20]। तदभावे सपिण्डस्य। पूर्वक्रियायामप्येषामधिकारः। मध्यमक्रियायां च। अनुपनीतस्य त्रैवर्णिकस्य[21] पूर्वक्रियैव। तत्र भ्रातृपित्रादेरधिकारः। अकृतचूडस्य तु[22] पूर्वक्रियापि नास्ति। किन्तु भूमिनिख[23]ननमात्रम्। स्त्रियाप्यकृतचूडाया भूमिनिखननमात्रम्[24]।

---

१. क ×
२. इति ख ×
३. °दाहादि° क
४. °श्राद्धम्° क ×
५. सपिण्डीकरणान्तपर्यंतं क
६. अत ख ×
७. त्रिविधास्वपि ख ×
८. औरसादिद्वादशविधपुत्राणां ख १७
९. अधिकारः क ×
१०. उभयोः (6)···सर्वेषां
११. तदभावे एकादशपुत्राणां तु सर्वेषामेवाधिकारः ख +
१२. पितामहस्य क ×
१३. °क्रिया° क ×
१४. °विवाहे आभ्यु° ख
१५. वेति ख
१६. च क ×
१७. तत् क ×
१८. पत्न्यधिकारः क
१९. भ्रातुस्तदभावे क ×
२०. च क ×
२१. त्रैवर्णिकस्य ख ×
२२. तु ख ×
२३. °लिखनन° ख
२४. °लिखननम् ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृतचूडाया अनूढायाः[1] पूर्वक्रियामात्रं पित्रादिना कार्यम्। उढायास्तु[2] सर्वास्वेव क्रियासु[3] पुत्रस्याधिकारः। तदभावे सपत्नीपुत्रस्य, तदभावे पत्युस्तदभावे स्नुषायाः, तदभावे गोत्रजस्य, तदभावे पितृसपिण्डस्य। शूद्रस्याप्यपरिणीतस्य चूडाकरणादूर्ध्वं[4] पूर्वक्रियामात्रं भ्रात्राद्यधिकारिकम्। परिणीतस्य तु त्रिविधासु क्रियासु पूर्ववदधिकारः। अनुपनीतत्रैवर्णिकस्या[5]परिणीतस्त्रीशूद्रयोश्च त्रिविधापि क्रिया[6] कर्तव्या[7]. अनुग्रहादिना न त्वावश्यक इति केचित्।

"सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममन्त्रकम्[8]।"

इति मार्कण्डेयपुराणे।

"कुलद्वयेऽपि चोच्छिन्ने[9] स्त्रीभिः कार्या क्रिया नृप।"

इति विष्णुपुराणवचने च स्त्रीशब्दो यथाविध्यपरिणीतस्त्रीपरः[10]।

"भ्रातुर्भ्राता स्वयं चक्रे तद्भार्या चेन्न विद्यते।
तस्य भ्रातृसुतः चक्रे यस्य नास्ति सहोदरः॥"

इति ब्रह्मपुराणे भार्यापदं पत्नीपरम्। अतएव

"पुत्राभावे तु पत्नी स्यात् पत्न्यभावे सहोदरः।"

इति कामधेनुलिखितहारीतः[11]। अतो[12] न विरोधः। अथवा

---

१. च ख+
२ तु क×
३. सर्वक्रियासु क
४. चूडोर्ध्वं क
५. अपि ख+
६. पित्रा ख+
७. कार्या क
८. °ममन्त्रक क
९. चोच्छन्ने क
१०. °स्त्रीविषयः क
११. °हारीतं ख
१२. °वचनात् ख+

---

8 Cf. मार्कण्डेयपुराण ३०.२२
10 Cf. विष्णुपुराण ३।१३।३२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात् तत्पिण्डं कृत्स्नमर्थं लभेत सा[१] ॥"

इत्यनुसारात् साध्व्यां पत्न्यां स्थितायां[२] तु[३] सोदर्यादिरनधिकारः । असाध्व्यां च स्थितायामपि[४] सौदर्यादिरेव[५]ाधिकारः । पितृमातृसपिण्डाद्यभावे त्वपतितायास्तस्या अप्यधिकार इति सर्वं समञ्जसम्[६] ॥

इतिमहामहोपाध्यायश्रीदत्तविरचितः[७]
श्राद्धकल्पः समाप्तः[८] ॥[९]

---

१. च क
२. सत्यां क
३. तु क ×
४. सत्यामपि क
५. एव क ×
६. इति···समञ्जसम् क ×
७. °श्रीश्रीदत्त° ख
८. परिपूर्णः क
९. इति क +

पुष्पिका कः—नमः शिवाभ्याम्, शुभमस्तु, शकाब्द १६४४

खः—श्रीदत्तरचितः स्वल्पो
मीमांसान्यायनिर्मलः ।
आकल्पं श्राद्धकल्पोऽयं
सच्चित्तमनुवर्त्तताम् ॥

अत्र संवत्सरे १८८०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समीक्षणम्

मिथिलाप्रदेशस्येतिवृत्ते यानि प्रसिद्धराजवंशनामान्युपलभ्यन्ते तेषु कर्णाटवंश एव मुख्यः। वंशस्यास्य प्रतिष्ठाता भारतविश्रुतो नान्यदेवो नाम। ऐतिह्यविदां मते एतद्वंशप्रभवा नरपतयः ख्रिष्टीय-सप्तनवत्युत्तरदशमशतकात् प्रभृति चतुर्विंशत्यधिकत्रयोदशशतकपर्यन्तं मिथिलाया भाग्यनियन्तार आसन्। यदैव चिराय विदेहवंशस्य गौरव-रविरस्तंगतस्ततः प्रभृति चतुःशतीमब्दानां पराधीनता वश्यता वा मिथि-लाया इतिहासप्रसिद्धा। कर्णाटवंशस्य प्रतिष्ठाता तु तां गृहविवादात् परपीडनाच्चोददीधरत्, पुनः स्वमहिम्ना च प्रतिष्ठापयामास। एतद्-वंशोद्भवा नान्यदेवमल्लदेवप्रभृतयः प्रथितयशसो नरपतयो न केवलं राजनैतिकसमुन्नतिमादधातुं प्रायतन्त, परन्तु सांस्कृतिकमभ्युत्थानं प्रत्यपि तेऽप्रमत्तचेतस आसन्। तेन च शिल्पानां कलाकलापानां साहित्या-दीनां च संविधाने नवनवोन्मेषशालिनी प्रतिभा प्राकाशत। साहित्यक्षेत्रे बहवः सुपण्डिताः प्रादुरभूवन्। संस्कृतसाहित्यस्याप्यनुसन्धानमूला बहवो ग्रन्थाः बहूनि व्याख्यानानि चोपन्यबध्यन्त। तेषु लक्ष्मीधर-भट्टरचितो राजनीतिकल्पतरु[1]श्चण्डेश्वरस्य राजनीतिरत्नाकरः पद्मना-भदत्तस्य सुपद्मव्याकरणम्, रत्नेश्वरस्य सरस्वतीकण्ठाभरणनाम्नो-ऽलङ्कारग्रन्थस्य विवृतिः, ज्योतिरीश्वरस्य पञ्चसायकम्, रङ्गशेखरवर्ण-रत्नाकरपृथ्विराजस्य मृच्छकटिकप्रकरणटीका, भवदत्तस्य नैषधीयचरित-व्याख्याग्रन्थः, शीकराचार्यस्य व्याख्यामृताख्यामरकोषाभिधानस्य टीका च विशेषभावेनोल्लेखनीयतामर्हन्ति।

मिथिलायां न्यायशास्त्रालोचनं सर्वजनविदितमेव। वंगीया नव्यन्याय-चुञ्चवो यन्मिथिलावासिभ्यो गुरुभ्यो न्यायशास्त्रविज्ञानं धारयन्तीत्यत्र

---

१. जर्नल आफ बिहार एण्ड उड़ीसा रिसर्च सोसाइटी, वाल्यूम ११, पृष्ठ ६८

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नास्ति सन्देहलेशोऽपि। न्यायशास्त्रेष्विव स्मृतिशास्त्रेष्वपि वंगीयाः स्मार्ता मैथिलस्मार्तानामधमर्णा इति निर्विवादमेव।

वंगीयो जरत्स्मार्तो रघुनन्दनो बहुशो मैथिलस्मार्तग्रन्थप्रणेतॄणां प्रभावेण संस्कृतमतिरासीदित्यप्यनुसन्धातॄणां निःसन्देहम्।

कर्णाटवंशोद्भवानां नृपतीनां जीवितव्यसमये तदुत्तरेष्वपि युगेष्वैनवारवंशीयानां (ख्रिष्टचतुर्विंशत्युत्तरत्रयोदशे षड्विंशत्यधिकत्रयोदशे वा शतके आनुमानिके) राजत्वकाले मिथिलायां स्मृतिशास्त्रस्याध्ययनाध्यापनासंततेः फलं स्मृतिनिबन्धग्रन्थरचनायाः सर्वतः प्रचारवार्त्तोदजृम्भत। तत्र प्रख्यातेषु निबन्धृषु श्रीदत्तोपाध्यायश्चण्डेश्वरो हरिनाथोपाध्यायो भवशर्मा पद्मनाभदत्त इन्द्रपतिस्तदन्तेवासी तद्दीक्षितश्च लक्ष्मीपतिरुल्लेख्यनामानो भवन्ति[1]। एते सर्व एव वंगेषु प्रचलितधर्मशास्त्राणि प्रभावयामासुरिति विप्रतिपत्तिशून्यम्। प्रसङ्गादेतदपि चिन्तनीयं द्वादशे त्रयोदशे चतुर्दशे च ख्रिष्टशतके यत्साधारण्येन प्रजानां स्मृतिशास्त्रमन्वाग्रहातिशयो न निर्मूलको भारतस्योत्तराखण्डे मध्ययुगस्येतिवृत्तपर्यालोचनयोपलभ्यते तत् प्रामाण्यमभ्युपेयते। भारतबाह्यानां शत्रूणामाक्रमणेन वा धर्मान्तरस्य प्रभावेण वा यदैव सनातनधर्मक्षेत्रे सामाजिकी नैतिकचिन्ता चावलुप्तप्राया प्रावर्तत तदैव ब्राह्मणधर्मप्रपन्ना वा वैदिकधर्मोपजीविनो मनीषिणो वा नवनवान् वेदमूलकान् धर्मग्रन्थान् प्रणीय स्वराष्ट्रमिदं विधर्मीकरणकबलादुद्धर्तुमयतिषत। परधर्मो भयावह इति कृत्वा वाक्पल्लवेन स्वधर्मस्य जयमुद्घोषयन्तस्ते स्वाधिष्ठानं राष्ट्रं धर्मान्तरविप्लवान्मोचयितुं प्रयासमङ्गीकृतवन्तः। मन्ये परवर्तिकाले पुराणस्मृतिशास्त्रादिप्रणयनस्य तत्प्रचारस्य वेदमेव निदानमिति। सर्वेषामेषां पुराणस्मृतिग्रन्थानां रचनायां मूलकारणे परोक्षत्वेन विद्येते देशस्य सामाजिकी राजनैतिकी चावस्थे। प्रकृते च मिथिलाया राजनैतिकप्रयुक्तिं विचारयन्तो वयं पूर्वोक्तस्वरसं समर्थयितुं प्रयतिष्यामहे।

१. जर्नल आफ दी एसियाटिक सोसाइटी आफ बंगाल, १९१५, पृष्ठ ४१४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आसीद् द्वादशत्रयोदशशतकयोरखण्डवंगप्रदेशो राढ़वागदीवंगवरेन्द्रमिथिलाभिः पंचधा विभक्तः। तदानीन्तनानां यवनैतिहासिकानां मते इदमुट्टंक्यते यत् महम्मद् वक्तियार्नामा कश्चिद् यवनसेनानी प्राथम्येन मिथिलां त्र्यधिके त्रयोदशशतके (१२०३) आचक्राम[१]। स किल न केवलं मिथिलामेवाधिकृत्य विरराम परन्तु तस्या दक्षिणपूर्वप्रदेशमपि स्वसाम्राज्येऽन्तर्भावितवान्[२]। ततश्च स गौड़भूमिं विजिग्ये। वक्तियार्यवनसेनान्या मिथिलाधिकारकाले तत्र कर्णाटवंशावतंसो नरपतिर्नरसिंहदेवो राष्ट्रं शास्ति स्म। तदानीं च सुल्तान् कुतुबुद्दीन् आइवेकः किल दिल्लीसिंहासनमधिष्ठित आसीत्। केषांचनैतिह्यविदां मते नृपतिर्नरसिंहदेवो वक्तियार्खिल्जीनाम्नो यवनसेनापतेर्वश्यतामङ्गीकृत्य तस्मै करं दातुमगत्योररीचकार[३]। तस्य यवनसेनापतेः पुत्र इक्तियार् उद्दीन् महम्मदो नामासीत्। तेनापि मिथिलाभूमिर्निर्यातिता निपीडिता चाभवत्। स किल मिथिलां मगधांश्च विजित्य प्राज्यानि धनरत्नानि लुण्ठितवान्। तल्लभ्यांशलिप्सया तत्सजातीया बहवोऽनुचरास्तत्पक्षपातिनो भवितुमाग्रहं प्रकाशितवन्तः[४]। चतुर्दशशतकस्य प्रथमभागे मिथिलाधीश्वरेण हरिसिंहदेवेन सह दिल्लीश्वरस्य सम्राजो ग्यासुद्दीन्तुगलकस्य शक्तिपरिचय आसीदित्यत्र नास्ति सन्देहलेशोऽपि। चण्डेश्वरकृतदानरत्नाकरग्रन्थस्य संवादेनोपलभ्यते यन्नरपतिर्हरिसिंहदेवो यवनाध्युषितां पृथिवीं पुनरुदधीधरत्[५]। कविशेखरस्याचार्यज्योतिरीश्वरस्य

---

१. केम्ब्रिज हिस्ट्री आफ इण्डिया, वाल्यूम, ३, पृष्ठ २६०

२. ब्रिग्स, फेरिस्ता, ('हिस्ट्री आफ दी राइज आफ दी महेमेडन पावर') वाल्यूम १, पृष्ठ २३१

३. इलियास् रहमानी, मिथिला, वाल्यूम २२, १९५३, पृष्ठ ६

४. केम्ब्रिज हिस्ट्री आफ इण्डिया, वाल्यूम ३, पृष्ठ ४१; हिस्ट्री आफ बंगाल, वाल्यूम २, पृष्ठ २०, पादटीका १

५. दानरत्नाकर, अन्तिमश्लोकः

"मग्ना म्लेच्छमहार्णवे येनोद्धृता लीलया"

आर. एल. मित्र, नोटिसेस आफ संस्कृत म्यानुस्क्रप्ट, ६, १३५, नम्बर २०६९

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कृत्तौ धूर्तसमागमनाम्नि द्वयंके कस्मिंश्चित् प्रहसने कर्णाटचूडामणि हरिसिंहमभ्येत्यैतदुक्तं वर्तते यदयं किल सुरत्राणं यवनेश्वरं पराबभूवेति[१]। मन्येऽयमेव सुरत्राणः सम्राड् ग्यासुद्दीन् तुगलकापरपर्यायभागिति। यवन ऐतिहासिको ग्यासुद्दीन् वारणी नामधेय उद्घोषयति—"यदा सुल्तान् ग्यासुद्दीन् तुगलकस्तीरहुतमुपागतस्तदा लक्षणावत्यधिपः सुल्तान् नासिरुद्दीन् त्वां तुगलकं विष्टरमाल्यप्रदानेन सम्पूजनार्थं प्रत्युज्जगाम। तथा च तद्देशस्य सर्व एव सामन्तनृपाः (रयिसा राणाश्च) युद्धं विनैव ग्यासुद्दीन्-तुगलकस्य वश्यतां स्वीचक्रुः।"

("Then the Sultan reached Tirhut, the ruler of Lakhnavati, Sultan Nasiruddin came for the great respect to pay homage to the Sultan and without the sword being called into requisition all the Rais and Ranas of the country made their submission.")

हरिसिंहदेवेन सह दिल्लीश्वरस्य ग्यासुद्दीन् तुगलकस्य संग्रामफलं यद् भवतु नाम फलतस्तु तदानींतनानां मैथिलानां समाजे कश्चित् प्रबलो विप्लवः संघटितोऽभवत्[२]। आभीक्ष्ण्येन यवनसम्राजाक्रान्ताया मिथिलाभूमेरधिवासिनां जीवनयात्रा धर्मनिष्ठा च खिलीभूतेति प्रचरति पूर्वतनी वार्ता।

आसीच्चतुर्दशशतकस्य मध्यभागे महम्मदो विन् तुगलको दिल्ली-सिंहासनमधिष्ठितः[३]। तस्य कामचारं प्रमत्ततां च सुभगावसरत्वेनोप-

१. धूर्तसमागमनाटकम्, नेपालदरबार नोटिसेस, पृष्ठ ६६

"नानायोधनिबन्धनिर्जितसुरत्राणात्रसद्वाहिनी।
नृत्यद्भीमकबन्धमेलकदलद्भूमिभ्रमद् भूधरः॥
अस्ति श्रीहरिसिंहदेवनृपतिः कार्णाटचूडामणि-
र्दृप्यत् पार्थिवसार्थमौलिमुकुटन्यस्ताङ्घ्रिपङ्केरुहः॥"

२. इलियट, तारीख—ई—फिरोजशाही, वाल्यूम ३, पृष्ठ १३३

३. केम्ब्रिज हिस्ट्री आफ इण्डिया, वाल्यूम ३, पृष्ठ १३५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जीव्य बहवः सनातनधर्मावलम्बिनो राजानो दिल्लीश्वरस्य शासनमवमन्तुमुपचक्रमिरे। मिथिलाभूमिरपि तदानीं यवनसम्राजः सार्वभौमत्वमवगणय्य सर्वथा स्वं स्वातन्त्र्यं प्रतिष्ठापयितुमुपक्रान्तवती। दुरदृष्टवशाद् द्विचत्वारिंशदधिके त्रयोदशशतके साम्सुद्दीन् हाजी इलियासो वंगराज्ये निजं शासनं प्रत्यतिष्ठिपत्। इत्थं स दिल्लीसाम्राज्यभुजामधिकृतपुरुषाणां क्षीयमाणं बलं सनातनधर्मावलम्बिनां च राज्ञां मिथो विवादं समीक्ष्य लब्धावसरो वंगदेशात् पश्चिमाभिमुखमभिषेचयितुं सन्नाहमकरोत्। तदीयसाम्राज्यलिप्सायाः प्रथमा सिद्धिर्मिथिलाविजयः। स्वेच्छया मिथिलाभुवं द्विधा विभज्य तयोर्मध्यसीमारेखारूपेण बूढ़ीगण्डकं निरूपितवान्। साम्प्रतिकैनवारवंशोद्भवो मिथिलाधिपतिः कामेश्वरठक्कुरस्तन्नानुमेने किन्तु सामसुद्दीन् हाजी इलियासस्य शक्त्यतिरेकं स्मरन्नगत्या मिथिलाविभागमनुमेने।

अत्रान्तरे सम्राजस्तुगलकस्यासन्तोषहेतुत्वमुपागात् सामसुद्दीन् नाम्नो हाजी इलियाससाहस्य क्रमोपचीयमाना प्रतिष्ठा दिल्लीसाम्राज्यवादस्य चास्वीकार एतद्द्वयी। अतः सोऽनतिचिरात् सामसुद्दीन् हाजी इलियाससाहं समुचितं दण्डयितुं तं प्रति कांचित् विपुलां रणवाहिनीं प्राहिणोत्। त्रिपञ्चाशदधिकत्रयोदशशतकेऽसौ चमूर्मिथिलामधिकृत्य स्वपदसेविनीं च विदधती दिल्लीश्वरस्य वश्यतां सुतरां निन्ये। एवं सम्राजः समभ्युदयाद् भीतः सामसुद्दीन् हाजी इलियासो मिथिलायाः पाण्डुयायां तस्याः पुनरेकदलायां प्रपलायांचक्रे। तथापि सम्राट् तुगलकस्तमभिद्रवन् संकटमेव निनाय।

एवं दिल्लीश्वरो मिथिलाभूमौ स्वीयं प्रभुत्वमधिरोपयामास। मिथिलायां स्वीयमधिकारं सुस्थिरं कर्तुकामः स ग्यासुद्दीन्तनयो महम्मदतुगलक"स्तुगलकपुर्-उर्फ तिरहुत्" नाम्ना मुद्रां प्रवर्तयामास। अमूषां पुनर्मुद्राणां द्वयोरेव प्रत्यभिसंधानमिदानीं लभ्यते। यदा तावत् तुगलकः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कामचारेण रौप्यमुद्रामवधूयारकूटमुद्रां प्रावर्तयत् ततः प्रभृति ते अमू आरकूटमुद्रे अस्मिन् विषये प्रतिभुवौ स्थिते[१]।

निरुक्तपरिस्थितेस्त्रयोदशचतुर्दशशतकयोर्मिथिलायां राजनैतिकगतेः संक्षिप्तपरिचय उपलभ्यते। तदानीमाभीक्ष्ण्येन विभिन्नधर्मावलम्बिभिराक्रान्ता मिथिला सुतरां यवनवश्यतामासादयत्। एकतो दिल्लीश्वरशासनादन्यतश्च वंगशासनकर्तुः प्रभावादात्मनो मुक्तिं न लेभे। तेन च मैथिलानां न केवलं राजनैतिकं स्वातन्त्र्यं लुप्तमपि तु धर्माचरणं सामाजिकजीवनगतिश्च शैथिल्यमभजत। यद्यपि यावनधर्मं दूरतः स्थापयितुं सनातनधर्मः सदैव सन्नद्धः प्रयत्नवांश्च तथापि तस्य दुर्दमगतिं रोद्धुं नालम्। ततश्च भारतवर्षस्य प्रादेशिकभूखण्डान्तरेष्वपि यो दशाविपर्ययः पर्यदृश्यत मिथिलायामपि सोऽव्यभिचरित एवासीत्। क्रमेणास्य नवीनाभ्युदयस्य यावनधर्मस्य सनातनधर्मस्य च द्वयोः समन्वयः स्थापितात्माभवत्। मिथिलावासिन आपामराः सर्वे जनाः क्षुण्णायामात्मभाषायां पारसिकीमारवीयां च भाषां प्रयोक्तुं प्राक्रमन्त। यावनधर्मं तदाचरणानि च श्रद्धया ग्रहीतुमारभन्त। उपरितनसमये सम्राजा आकबराख्ययवनाधीश्वरेण प्रवर्तितं फसलीसंज्ञं वत्सरमानं मिथिलायां वत्सरमानत्वेन पर्यणमत्। तेन हि प्रथितनामा राजतरंगिणीग्रन्थभाष्यप्रणेता लोचनकविर्यावनमिमानरागं फिरदासीरागिणीं च समाशिश्रायेति मन्यामहे[२]। अन्यतश्च मिथिलाभूमिर्यवनराजभुज्यमानाप्यष्टादशशतकं यावत् सनातनीं प्राचीनपद्धतिमनुसरन्ती राजकार्यं नीत्यादिकर्माधिकरणिकव्यवहारं च निरवाहयत्[३]। यवना अपि सनातनधर्मावलम्बिनां देवयात्रादिकं श्रद्धावन्त

१. रजार, इण्डियन् म्यूजियम कैन्स, वाल्यूम १, पृष्ठ २३, १२६११
रोरडिलहन, कैटलाग आफ इण्डियन म्यूजियम कैन्स, वाल्यूम २, पृष्ठ ६०, ३८४
रजार, इण्डियन म्यूजियन कैन्स, वाल्यूम १, पृष्ठ ६३, १२६१२
जर्नल आफ दी एसियाटिक सोसाइटी आफ बंगाल, १८८३ पृष्ठ ६२
२. उपेन्द्र ठाकुर, हिस्ट्री आफ मिथिला, पृष्ठ ३७४-३७५
३. के० पी० जैसवाल, आन दि जाजमेन्ट आफ सचल मिश्र, जर्नल आफ बिहार एण्ड उड़ीसा रिसर्च सोसाइटी, १९२०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एवोररीकृतवन्तः। यवनाः सज्जना यतयोऽपि सनातनीयान् रामकृष्णादि-देवावतारानभजन्त। एतदुपरिष्टात् प्रवृत्तिरियं यद् यवनानां मिथिलाया-मागतिसमकालमेव सनातनधर्मावलम्बिनो मिथिलावासिनो न तेषां सामाजिकनयं, संस्कारं, धर्मानुष्ठानं, शिक्षां, दीक्षां, ध्यानधारणादिकानि च नान्वसरन्; न माल्याद्यर्घ्यदानसहकारेण वृतवन्तः। प्रत्युत यथाशक्ति तत्प्रतिरोद्धुं प्रायतन्त। तथाहि जनसमाजे यदैव नवीनधर्माक्रमणजनितो विप्लवः समुदेति स्म तदैव ब्राह्मण्यस्य दृढमूलं चचालेति। अस्मिन्ने-वान्तरे वेदैकशरणा ब्राह्मणा अप्येतन्नवीनधर्मौघेन प्लाव्यमानं स्वदेशं जनसमाजं च रक्षितुं क्रमं बबन्धुः। किन्तु राजनैतिकगतौ सामाजिक-वर्त्मनि च संयमं शृङ्खलां वोज्जीवयितुं नाशक्नुवन्। यथा च पारिवारिकी सामाजिकी वा जीवनयात्रा अबाधितगत्या प्रवहन्ती स्यात् तथा तेऽवधानेन प्रायस्यन्। तत्कालीना जना अभिनवधर्मप्रभावेण विभिन्नमतयो यथा पुनः स्वास्थ्यं सुस्थिरतां वा लभेरन्, यथा पुनरपि ब्रह्मण्यं प्रत्यनु-रागिणो भवेयुस्तदर्थं पण्डितवर्गा बहून् स्मृतिनिबन्धान् न्यबध्नन्। एतदेव तेषामभिप्रेतमासीत् यथा प्राचीना धर्मसंहिता एतन्निबन्धग्रन्थानां सह-कारितया सुबोधा ऋजवः स्युरिति। तत्पारिणामिकतया तदानींतनानां जननिवहानां दृष्टिरस्मिन् विषये निपतिता सामाजिकजीवनगतिश्च कथं-चिदुज्जीविता चाभवत्। एषु स्मृतिनिबन्धेषु निबद्धा विषया एष्वन्तर्भूता आसन्[1]। तथा चोच्यते "समतिक्रान्तकालेन मालिन्यमापन्नेऽप्यस्मिन् शास्त्रेऽन्तर्निहितमौज्ज्वल्यमसाधारणं नैपुण्यं च समधिकमासीत्" इति।

("Intrinsic merit and innate strength in spite of age-old aberrations.")

एवं च "नात्र किमप्याश्चर्यं यद् हिन्दुज्ञानपीठानामन्यतमेयं मिथिला-भूमिरेतेषां शास्त्राणां रक्षयित्री पालिका चासीत्" इति।

---

१. जर्नल आफ बिहार एण्ड उड़ीसा रिसर्च सोसाइटी, १३ (सर्च फार संस्कृत एण्ड प्राकृत म्यानुस्क्रुप्ट्स इन बिहार एण्ड उड़ीसा, ३–४)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

("Mithila being one of the chief architects of Hindu Learning, it is not surprising to find an individual tradition of the texts.")

अतश्च स्मृतिनिबन्धकाराणामेव निरवच्छिन्नसमुद्यमः, प्राज्योऽध्यवसायश्च मिथिलायाः सामाजिकजीवनं कथमपि कियच्चिरमपि प्राचीनभावं सर्वथा नावगणयामासेति वक्तुं शक्यते। एषु स्मृतिनिबन्धकारेषु ग्रहेश्वरमिश्रः, गणेश्वरमिश्रः, श्रीदत्तोपाध्यायः, गणेश्वरठक्कुरः, चण्डेश्वरठक्कुरः, रामदत्तठक्कुरः, हरिनाथोपाध्यायः, पद्मनाभदत्तः, श्रीदत्तमिश्रः, विद्यापत्युपाध्यायः, इन्द्रपतिठक्कुरः, प्रेमनिधिठक्कुरः, लक्ष्मीपत्युपाध्यायः, मिसरूमिश्रः, रुद्रधरोपाध्यायः, गणपतिश्चेत्येवमादयः पण्डिताः विशेषतः प्रथितनामानः। एषु केषांचिन्नामान्यद्यापि पुस्तिकासु पत्रेषु च निगूढानि। तैर्निबद्धग्रन्थानां नामान्येवोपलभ्यन्ते, न तावत् ते ग्रन्था अद्यापि परिचीयन्ते। केनचिन्निबन्धकारेण निबन्धेष्वनेकेषु ग्रन्थेष्वेक द्वावेव प्राप्यन्ते, कस्यचित् पुनः सुदैवप्रसादाद् रचितानां सर्वेषामेव ग्रन्थानामधिगमो भवति। तेषु चैकोऽनेकेऽपि वा प्रकाशिताः सन्त्येव। तत्र श्रीदत्तोपाध्यायोऽन्तिमपक्षपतित इति मन्यामहे। तथा हि तन्निबद्धाः सर्व एव ग्रन्था अस्माभिरुपलब्धाः सन्ति। पुस्तिकाकारेण सत्सु बहुषु ग्रन्थेष्वेक एव प्रकाशित आस्ते। श्रीदत्तोपाध्यायेन नानाविधानां ग्रन्थानां परिचयदानात् प्राक् तस्याविर्भावकालो यत्किंचित् विचारयितव्यः।

दुरदृष्टमेतदस्माकं यत् प्राचीना ग्रन्थकाराः स्वजीवितकालस्य ग्रन्थरचनाकालस्य च किमपि तथ्यं न व्यवृण्वन्। श्रीदत्तोपाध्यायस्यापि तथा प्रत्यक्षप्रमाणाभावात् तत्स्थितिकालज्ञानायास्माभिरन्यत् प्रमाणमनुसर्तव्यम्।

संक्षेपतो वक्तुमिदं शक्यं यत् श्रीदत्तोपाध्यायग्रन्था एकशो बहुशो वा चण्डेश्वरस्य कृत्यरत्नाकरे, वाचस्पतिमिश्रस्य पितृभक्तितरंगिण्यां, रुद्रधरस्य वर्षकृत्यग्रन्थे, शूलपाणिमहामहोपाध्यायस्य दुर्गोत्सवविवेके, तथा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्मार्तप्रवरस्य रघुनन्दनभट्टाचार्यस्याष्टाविंशतितत्त्वेषु तत्र तत्रोद्धृताः सन्ति । किं बहुना चण्डेश्वरस्तस्य कृत्यरत्नाकरग्रन्थे उक्तवान्—

"यत् श्रीदत्तोपाध्यायैस्तु सन्ध्यादिकर्मसु कुशाः पवित्रमित्यनेन कुशपत्रत्रयस्यापि पवित्रत्वेन प्रतिपादनादनन्तर्गर्भिणं साग्रमित्यादिवचनेन सर्वत्र वैदिककर्मसु कौशद्विदलस्याप्युक्तत्वात् सन्ध्यादिकर्मसु कुशत्रयं कौशं द्विदलं पवित्रं च व्यवस्थापितं लिखितं च सन्ध्याप्रयोगे, एतच्च कल्पतरुपारिजातविरोधादत इत्यसङ्गतेश्च नादेयमिति[1] ।"

वाचस्पतिमिश्रप्रणीतपितृभक्तितरङ्गिण्यामपि दृश्यते—

"पशूननक्तीतिवत्, श्रीदत्तोपाध्यायोऽप्येवम्[2] ।"

तत्रैवान्यत्रांशे लिखितम्—

"याम्यां काकोत्पत्तौ वेदद्वयसाधारण्यां समयप्रदीपादौ प्रामाणिकनिबन्धे ।

'पौर्णमास्यां वा योगे वायसाः पञ्च जज्ञिरे
इन्द्राच्च वरुणाद् वायोर्यमादथ च निर्ऋतेः[3] ।'

अन्यत्रापि—

---

१. कृत्यरत्नाकर, पृष्ठ ६६

२. पितृभक्तितरंगिणी, पृष्ठ १०६
आद्यादिषोडशश्राद्धानां साधारण्येन संकल्पवाक्यस्य तदन्तर्गतस्याद्यश्राद्धादेर्विशेषसंकल्पवाक्यस्य च क्रमविधायकः कोऽपि निर्धारितनियमो नास्ति, यदृच्छयैव क्रमो ग्राह्यः । उदाहरणत्वेनैतद् वक्तुं शक्यते यथा पशूननक्तीत्यत्र पशुवधान्ते शोणितनिरासस्य शकृन्निरासस्य च कोऽपि क्रमो न निर्धारितः ।

३. पितृभक्तितरंगिणी, पृष्ठ १६४ ख—१६५ क
दशपूरकपिण्डदानान्तःकाकबलौ वेदिभेदेन दिग्विशेषनियमो न स्वीकृतः । परन्तु दक्षिणैव दिक् सर्ववेदिनां करणीयत्वेन प्रतिभाति । अन्ये तत्र यजुषामुत्तरा सामगानां दक्षिणावलम्बनीयेति वदन्ति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"यत्र तु सर्वस्मिन्नेव दिने निषिद्धं नक्षत्रं तत्र ब्रह्मपुराणीयकल्प एवादरणीय इति प्रदीपः[१] ।"

पुनरेकत्राप्यंशे वाचस्पतिनोक्तम्—

"यच्छ्राद्धेऽन्नादित्यागः स्वधापदोल्लेखेनैव कर्तव्य एतदेव श्रीदत्तोपाध्यायाभिमतम् । परन्तु कल्पतरुरत्नाकरमते तत्र स्वधा नमः इति युग्मं त्यागबोधकपदमुल्लेखनीयमिति[२] ।"

वाचस्पतिमिश्रस्य श्राद्धचिन्तामणावपि दृश्यते—

"अत्र च प्रकाशहलायुधकल्पतरुपारिजातपितृभक्तितरंगिणीप्रदीपविवेकेष्वियं व्यवस्था यदौरसक्षेत्रजाभ्यां मृताहे पितुः पार्वणं कर्तव्यमिति[३]" ।

शूलपाणेर्दुर्गोत्सवविवेकेऽपि श्रीदत्तोपाध्यायस्योक्तिर्लिखितास्ति—

"समांसरुधिरदानमाह श्रीदत्तोपाध्यायधृतं समयप्रदीपे भविष्यपुराणम्

गोसुवर्णानि राजेन्द्र वस्त्राणि विविधानि च ।
समांसरुधिरैर्देवि सन्तुष्यति चरेद् भृशम् ॥

महिषस्य समांसरुधिरदानं निषिद्धम्[४] । तदाह भविष्योत्तरे—

न दद्यान्माहिषं मांसं सरक्तं साधकः क्वचित् ।
ददद्दिष्टफलं तस्य रुष्टा हन्ति च कालिका ॥

---

१. पितृभक्तितरंगिणी, पृष्ठ १६०
सपिण्डनापकर्षे चतुर्णां कल्पानां विधिर्वर्तते, परन्तु तेषु यदि सर्वेषु भरणीकृत्तिकादीनां निषिद्धनक्षत्राणां योगः स्यात्तर्हि प्रदीपकारमते तत्रापकर्षो निषिद्धः । तत्र संवत्सरान्ते मृततिथौ सपिण्डनं विधेयम् । ब्रह्मपुराणीयकल्पस्यैतदेव विधानम् ।

२. पितृभक्तितरंगिणी, पृष्ठ १६६
ततो विष्णुं स्मृत्वा श्राद्धीयद्रव्यं ब्राह्मणाय प्रतिपादयेदिति श्रीदत्ताह्निकानुसारी पन्थाः । कल्पतरुरत्नाकरमते तु स्वधा नम इति त्यागः ।

३. श्राद्धचिन्तामणि, पृष्ठ १३६

४. दुर्गोत्सवविवेक, पृष्ठ २१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

केवलरुधिरदानमिति श्रीकरमिश्राः। (श्रीदत्तमिश्राः इति पाठान्तरम्) ।"

दृश्यते चैतस्यैव ग्रन्थस्यापरत्र—

"यत्तु अष्टम्यां बलिदानेन पुत्रनाशो भवेद् ध्रुवमिति देवीपुराणीयमेतत् त्वष्टमीक्षणे सन्धिपूजाबलिदाननिषेधकमिति श्रीदत्तश्रीकरमिश्राः[1]"

तत्परवर्तिनि काले एव रुद्रधरस्य वर्षकृत्यग्रन्थे श्रीदत्तकृतसमयप्रदीपग्रन्थस्य बहुश उद्धृतयः स्वीकृतयश्च लभ्यन्ते यथा —

"एतद्व्रतत्रयं यावज्जीवमिति, स्नानेन द्रविणाधिकमिति व्रतं यावच्छक्यम् इति च समयप्रदीपः[2] ।"

"ओं भगवन् सूर्य भगवत्यो देवताः अद्येत्यादि प्रतिमासमेकोपवासव्रतमहमाचरिष्ये इति निवेद्य ओं विद्वत्त्वधार्मिकत्वकामः अद्येत्यादि प्रतिमासमेकोपवासव्रतमहं करिष्ये। एतद् व्रतं यावज्जीवमिति समयप्रदीपः[3] ।"

"एकादशीं परित्यज्य द्वादशीमुपवासयेदिति वाक्यादित्याहुस्तन्न, एतद्वाक्यस्य प्रामाणिकत्वात्; वराहपुराणीयवाक्यानां च द्वादशीव्रतविषयकत्वादिति समयप्रदीपः[4] ।"

"इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्तितः।
अग्नीषोमौ स्मृतौ मध्ये समाप्तौ पितृसोमकौ ॥"

इति सामान्यतो मासलक्षणात्, तेन चैत्रादिमासोल्लिखितव्रते शुक्लादिमासपरिग्रह इति समयप्रदीपः[5] ।"

---

१. दुर्गोत्सवविवेक, पृष्ठ १८

२. रुद्रधर, वर्षकृत्य. पृष्ठ १७१

३. रुद्रधर. वर्षकृत्य, पृष्ठ १७३

४. रुद्रधर, वर्षकृत्य, पृष्ठ १७६

५. रुद्रधर, वर्षकृत्य, पृष्ठ १८१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"देवपूजा यस्य देवता व्रतं तस्य पूजा सामान्यव्रते इष्टदेवतापूजा, अग्निहवनं, पूज्यदेवतोद्देशोपक्रमादिति समयप्रदीपः[1] ।"

"यदा पूर्वदिने संक्रान्तिकाले चैकैव तिथिर्भवति तदा पूर्वदिवसस्य शेषार्धमेव पुण्यं यदाह तत्रैव **'आदौ पुण्यं विजानीयाद्यद्यभिन्ना तिथिर्भवेत्**[2]"

स्मार्तप्रवरो रघुनन्दनोऽपि यत् श्रीदत्तोपाध्यायेन बहुशः स्वप्रभावमापादितस्तत्र नास्ति सन्देहलेशोऽपि। तत्प्रणीतेषु अष्टाविंशतितत्त्वेषु बहुत्र श्रीदत्तोपाध्यायप्रभावः प्रत्यक्षेणानुभूयते। उपरिष्टादुल्लिखितेषु ग्रन्थेषु श्रीदत्तोपाध्यायनामोट्टंकितमास्ते यथा मलमासतत्त्वे, शुद्धितत्त्वे, तिथितत्त्वे, दुर्गोत्सवतत्त्वे, व्यवहारतत्त्वे, एकादशीतत्त्वे, आह्निकतत्त्वे, छन्दोगश्राद्धतत्त्वे, यजुःश्राद्धे। परन्तु एषु ग्रन्थेषु मध्ये एकादशीतत्त्वे, मलमासतत्त्वे तथा तिथितत्त्वे बाहुल्येन तदुदाहरणानि लक्ष्यन्ते। यथा एकादशीतत्त्वे—

"दीर्घकालानुपालनीयः संकल्पो व्रतमि"ति नारायणोपाध्यायानां स्वरसमुल्लिख्यैव रघुनन्दनेन "स्वकर्तव्यविषयो नियतसंकल्पो व्रतमिति श्रीदत्तहरिनाथवर्धमानप्रभृतयः[3]" इति श्रीदत्तकृतलक्षणमुद्धृतम्। श्रीदत्तोपाध्यायकृतमेतद्व्रतलक्षणं तत्कृतसमयप्रदीपग्रन्थे उपलभ्यते। तत्र श्रीदत्तादीनां मतेऽपि "स्वकर्तव्यविषयो नियतः संकल्पो व्रतम्" इति लक्षणं परिदृष्टम्[4]।

रघुनन्दनः पुनः सूर्यादिदेवताभ्यो निवेद्य व्रतं संकलपयेदित्यर्थमवलम्ब्य व्रतसंकल्पयोर्भेदमाह। यद् भवतु, मैथिलाचार्यास्तु व्रतस्येतिकर्तव्यतारूपेण **"सूर्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत्"** इति वचनमुपजीव्य

१. रुद्रधर, वर्षकृत्य, पृष्ठ १८२
२. रुद्रधर, वर्षकृत्य, पृष्ठ १८६
३. रघुनन्दन भट्टाचार्य, एकादशीतत्त्व, पृष्ठ ६
४. रघुनन्दन भट्टाचार्य, एकादशीतत्त्व, पृष्ठ ११५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संकल्पव्रतयोरभेदबुद्धिजननार्थं 'संकल्पं कुर्यात्' इत्येतावन्मात्रं तात्पर्यं प्रकाशितवन्तः[1]। अन्यत्रापि यथा—

"समयप्रदीपेऽपि यत्र पूर्वदिने दशमीविद्धा परदिने द्वादशीमिश्रा दिनान्तरे द्वादशी न वर्धते तदा द्वादशीमिश्रैवोपोष्या, प्रधानकालानुरोधात्। पारणादौ तु द्वादशीबाध एव। तन्मूलकमेव गौडीयवचनम्—

"द्वादश्येकादशीमिश्रा परतोऽपि न वर्धते।
गृहिभिर्यतिभिश्चैव सैवोपोष्या सदा तिथिः[2]॥"

अयमपि एकादशीतत्त्वस्यांशविशेषः समयप्रदीपे उपलभ्यते। अन्यच्च दृश्यते—

"यद्यप्येकादश्यां प्रबोधनमुक्तं तथापि तदादिदिनपञ्चकमेव प्रबोधनसमयः। तेन वराहपुराणे द्वादश्यां प्रबोधनविधानम्। यमस्मृतौ कार्त्तिक्यां प्रबोधनविधानं सर्वसमञ्जसमिति। एवमेव श्रीदत्तोपाध्यायः[3]।"

क्वचित् मलमासतत्त्वस्यांशविशेषे स्मार्तप्रवरो रघुनन्दनः श्रीदत्तकृतसमयप्रदीपस्य संज्ञामुल्लिख्योक्तवान्—

"यत् समयप्रदीपे श्रीदत्तः

'दासीदासमलंकारमन्नं षड्रससंस्कृतम्।
पुरुषोत्तमतुष्ट्यर्थं प्रदेयं सार्वकालिकम्॥
यद्यदिष्टतमं लोके यच्चाप्यस्ति गृहे शुचि।
तत्तद्धि देयं तुष्ट्यर्थं देवदेवस्य चक्रिणः॥'

इदं दानं विष्णुप्रीतिमुद्दिश्य ब्राह्मणसंप्रदानकमेव, एवं सर्वत्र दाने विष्णुप्रीतेः सामान्यत उद्देश्यत्वश्रवणात्। विष्णुप्रीतौ देवताधिकरण-

---

१. रघुनन्दन भट्टाचार्य, एकादशीतत्त्व, पृष्ठ ११
मैथिलस्तु अद्य भगवन् सूर्य भगवत्यो देवता एतद् व्रतमाचरिष्यामीत्यनेन सूर्याय देवताभ्यश्च निवेद्य संकल्पं कुर्यात्; अनेकाहश्राद्धे तु अद्यारभ्येति विशेष इत्याह।

२. रघुनन्दन भट्टाचार्य, एकादशीतत्त्व, पृष्ठ ४४–४५

३. रघुनन्दन भट्टाचार्य, एकादशीतत्त्व, पृष्ठ १०५

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न्यायविरोध इति चेन्न, स्वर्गवदधिकारिविशेषणत्वेन तत्सत्त्वप्रसाधनादित्याह[1] ।"

तथा च तिथितत्त्वे—

"अत्रामावास्याष्टमीव्यतिरिक्ताः शुक्लाः, पुनः पुनस्तथापदोपादानात् ; उपक्रमोपसंहारयोः शुक्लत्वकीर्तनाच्च । अत्र कामधेनौ 'तृतीया चैव माघस्ये'ति, कल्पतरौ तु 'तृतीया चैत्रमासस्ये'ति लिखितम् ; अत्र पाठद्वैधे श्रीपतिरत्नमालायामश्वयुजि शुक्लनवमी द्वादश्यूर्जे मधौ तृतीया च पाठात् चैत्रतृतीयैव ग्राह्या । श्रीदत्तोऽप्येवम्[2] ।"

---

१. मलमासतत्त्वे (पृष्ठ ८३९) उक्तं यत् "श्रीविष्णुप्रीतिकामनया ब्राह्मणाय दानमर्थात् ब्राह्मणस्येदं भवत्विति कामनापूर्वकं दानमिति तथा श्रीविष्णुप्रीतिकामनया विष्णुसम्प्रदानकं दानमर्थाद् विष्णोरेवेदमस्तु इतीच्छया दानमिति भेदाद् दानं द्विधा भवति । नन्वचेतनमन्त्रमयदेवतायाः कथं द्रव्ये स्वत्वं स्यादित्याशङ्कायामुच्यते—यद्यपि मन्त्रमयी देवताऽचेतना, तत्रापि तदधिष्ठात्री देवता चेतनैव । परन्तु मीमांसकानां मते तादृशी देवता नोद्देश्यीभवति, अतो यागहोमादिषु सर्वत्र अचेतना मन्त्रमय्येव देवतेति ।"

यच्चोक्तमनन्तरमेव दासीदासालंकाराणां श्रीविष्णुप्रीतिकामनया ब्राह्मणस्वत्वोद्देश्यकानीति तत्र देवदेवस्य तुष्ट्यर्थं देयमित्युपादानात् सर्वत्रैव विष्णुप्रीतिकामनया देयमित्यवगन्तव्यम् ।

अत्रेयमाशङ्का अचेतनमन्त्रमय्या देवतायाः प्रीतिः कथं स्यात् ? प्रीतेर्हि आत्मसमवेतसुखभोगेच्छारूपत्वात्, देवतायाश्चानात्मत्वादिति चेन्न, इन्द्रादिपदाधिकारिणो देवाः सचेतना एव तद्गता सुखेच्छा नानुपपन्नेति पूर्वमेव निरुक्तत्वात् । श्राद्धविवेकटीकाकृत् श्रीकृष्णतर्कालंकारोऽपि स्वरचितटीकायामेवमाह 'तथा हि इन्द्रपदकामः शताश्वमेधेन यजेत' इत्यत्र पदमधिकारः स्वामित्वलक्षणः, तस्याचेतने बाधादिन्द्रपदं विग्रहवत् परमेवेति ।

२. तिथितत्त्वे रघुनन्दनोऽपि सपरिकरं श्रीदत्ताभिधानमुल्लिख्य तन्मतं वर्णितवान् । एतानि तदुदाहरणरूपेण ग्रहीतुं शक्यानि । यथा तिथितत्त्वे (पृष्ठ ४०) मन्वन्तरतिथिविवृतौ—

"अश्वयुक् शुक्लनवमी द्वादशी कार्त्तिकी तथा ।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च ॥
फाल्गुनस्याप्यमावास्या .... ।
श्रावणस्याष्टमी कृष्णा......... ....॥"

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"असवर्णजलदाननिषेधस्तु प्रकरणादपि भ्रात्रादिविषय इति श्रीदत्तः[1] ।"

"न तु श्रीदत्तहरिनाथविद्यावाचस्पतिमिश्रोक्ता शतभिषा, तदष्टम्यां तस्या अलाभात्, तथात्वे तदनन्तरपौर्णमास्यां गोभिलोक्तसूर्याचन्द्रमसोः सप्तमराश्यवस्थाननियमभङ्गापत्तेः[2] ।"

इत्यादिभविष्यमात्स्यवचनेषु यास्तिथयः प्रोक्तास्ताः सर्वा शुक्लाः श्रावणस्याष्टमी, फाल्गुनस्यामावास्या च केवलं कृष्णा ग्राह्या, तथा हि अश्वयुक्शुक्लनवमीत्यनेन शुक्लोपक्रम इति । पञ्चदशी सिता मन्वन्तरादयस्त्वेता इत्युपसंहारे सितापदोपादानादन्तरान्तरा तथाशब्देन सजातीयार्थबोधनात् शुक्लापरत्वं बोध्यम् । प्रसङ्गत एतदपि बोद्धव्यं यत् तृतीया चैत्रमासस्येति स्थाने कामधेनुग्रन्थे तृतीया चैव माघस्य इति, कल्पतरौ तु तृतीया चैत्रमासस्येति पाठद्वैधे श्रीपतिरत्नमालायां अश्वयुजि शुक्लनवमी द्वादश्यूर्जे मधौ तृतीया चेति पाठाच्चैत्रतृतीयैव ग्राह्या तत्समर्थनाय रघुनन्दनेनोक्तं श्रीदत्तोऽप्येवम् । अतः श्रीदत्तस्योक्तिः प्रमाणत्वेन गृहीतेत्यवधेयम् ।

१. रघुनन्दन भट्टाचार्य, तिथितत्त्व, पृष्ठ ५८
भीष्माष्टम्यां (चान्द्रमाघमासीयशुक्लाष्टम्यां) भीष्मतर्पणं सर्वैरेव कार्यम्, ब्राह्मणेनाप्यसवर्णस्य क्षत्रियस्य तर्पणं करणीयम् । असवर्णानां श्राद्धतर्पणादिनिषेधस्तु प्रकरणाद् भ्रात्रादिविषयक एवेति श्रीदत्ताभिप्रायः । रघुनन्दनस्तु--

"ब्राह्मणस्त्वन्यजातीनां यः करोत्यौर्ध्वदेहिकम् ।
तद्वर्णत्वमसौ याति इहलोके परत्र च ॥"

इति मरीचिवचनं तु भीष्मकृत्येतरपरमिति सामान्यविशेषन्यायमनुसृतवान् ।

२. रघुनन्दन भट्टाचार्य, तिथितत्त्व, पृष्ठ ८५
अन्यच्च देवीपुराणे उल्लिखितं यत्--

"कन्यासंस्थे रवावीषे शुक्लाष्टम्यां प्रपूजयेत् ।
सोपवासो निशार्धे तु महाविभवविस्तरैः ॥
पूजां समारभेद् देव्या नक्षत्रे वारुणेऽपि वा ॥"

अत्र निसर्गतो वारुणपदस्य वरुणदैवतं जलमर्थाद् वरुणदेवाधिष्ठितनक्षत्रं पूर्वाषाढोच्यते, श्रीदत्तहरिनाथविद्यावाचस्पतिमिश्रास्तु शतभिषेति, तन्नक्षत्रस्थितशुक्लाष्टम्यामेव पूजा विधेया इत्याहुः, तन्न, तदष्टम्यां (चान्द्राश्विनीयशुक्लाष्टम्यां) तस्याः (शतभिषायाः) अलाभात् । तथात्वे तदनन्तरपौर्णमास्यां गोभिलोक्तसूर्याचन्द्रमसोः सप्तमराश्यवस्थानरूपनियमभङ्गापत्तेरिति स्मार्तस्या-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"बहुपत्नीकयजमानप्रयोगेऽपि पत्नीं सन्नह्येति मन्त्र एकवचनान्त एवेत्युक्तम् इति श्रीदत्तोपाध्यायेन दृष्टान्तीकृतम्।"

रघुनन्दनप्रणीते आह्निकतत्त्वेऽपि परिलक्ष्यते—

"जलक्षित्योः संस्कारोऽपि नास्तीति श्रीदत्तप्रभृतयः[1]।"

एवं चानुमीयते यत् श्रीदत्तोपाध्यायश्चण्डेश्वरशूलपाणिरुद्रधरवाचस्पतिमिश्ररघुनन्दनेभ्यः प्राचीनः। ऐतिहासिकानां पण्डितानां सिद्धान्तानुसारेण चण्डेश्वरस्य जीवितव्यकालश्चतुर्दशशतकीयचतुर्दशख्रिष्टाब्दात् प्रभृति चतुःषष्टिवर्षं यावदिति[2]। अतश्च निःसंशयमेतद् वक्तुं शक्यते यत् श्रीदत्तोपाध्यायोऽस्मात् कालात् प्रागवर्तत इति।

किञ्च, श्रीदत्तस्य जीवितव्यकालस्यापरा या दिक् तन्निर्णयो नाशक्यप्रायः। स हि तस्य पितृभक्तौ, आचारादर्शे, समयप्रदीपे च बहुशो हरिहरस्य नामोल्लिलेख। अथ कियन्त्युदाहरणानि आचारादर्शग्रन्थादुपस्थाप्यन्ते।

"आपस्तम्बः सशिरोऽवमज्जनमप्सु वर्जयेदस्तमिते च स्नानं सशिरोऽवमज्जनं......कार्यं हरिहरेण अशिरोऽवमज्जनमिति पठितम्[3]।"

"अत्र प्राञ्चः अप्रतिष्ठितमात्रेषु पिण्डोद्धारस्तस्यैव परकीयत्वादित्याहुस्तन्नेति हरिहरादयः[4]।"

क्षेपः। अयमभिप्रायः—ज्योतिश्शास्त्रनियमानुसारेण पौर्णमास्यां सूर्याचन्द्रमसोः समसप्तमराश्यवस्थानं भवत्येव। अर्थाद् यस्मिन् राशौ सूर्यस्यावस्थितिस्तद्राशेः सप्तमे राशौ चन्द्रस्यावस्थानमेव समसप्तकमित्युच्यते, परन्तु गणनाबलादायाति यत् शुक्लाष्टम्यां चन्द्रभोग्ये शतभिषानक्षत्रे सति पौर्णमास्यां कन्यास्थरवेः समसप्तकत्वं न भवतीति। अतः स्मार्तोक्तवारुणपदस्य जलदेवताकपूर्वाषाढानक्षत्ररूपोऽर्थः श्रेयानिति। तदष्टम्यामेव देव्याः पूजनं विधेयम्।

१. बलिवैश्वदेवयोः कर्मणोराधारभूतं जलं भूमिर्वा यदि भवेत् तत्राग्नेरिव संस्कारो नापेक्षते, असंस्कृतायामेव भूमौ जले वा वैश्वदेवमनुष्ठातुं शक्यते। (आह्निकतत्त्व, पृष्ठ १५३)

२. पी० वी० काणे, हिस्ट्री आफ धर्मशास्त्र, वाल्यूम १, पृष्ठ ३७२।

३. आचारादर्श, पृष्ठ १० क

४. आचारादर्श, पृष्ठ १० ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"एवं च तमर्थं प्रतिमामार्जनमात्राभावोऽसमर्थं प्रतिपाणिशाटी-मार्जनाभाव इति हरिहरोक्तमश्रद्धेयम्[१] ।"

"हरिहरोऽपि क्रियास्नानप्रातःस्नानयोरेव धर्मानाह[२] ।"

"हरिहरस्तु जलसमीपस्थेन तर्पणजलं जल एव प्रक्षेप्तव्यमिति[३] ।"

"याज्ञवल्क्यवचनात् पितृतर्पणे स्वधा नमः इति हरिहरमते[४] ।"

"अत एव योगियाज्ञवल्क्यकल्पात् स्मृतिमहार्णवलिखितं मरीच्यादि-तर्पणं पद्मपुराणाद्धरिहरेणोक्तम्[५] ।"

"अत्र हरिहरो देवादीनां ओं देवास्तृप्यन्तामित्यादिवाक्येन तर्पणम्[६] ।"

"हरिहरस्तु वाजसनेयिनां जपानन्तरमेव तदनुष्ठानेन[७]...।"

अस्माभिस्तु सम्पाद्यमाने श्रीदत्तोपाध्यायस्य पितृभक्तिग्रन्थेऽपि बहुशो हरिहरस्योल्लेखो दृश्यते । यथा—

"श्वः कर्तास्मीति निश्चित्य दाता विप्रान् निमन्त्रयेत् ।
निरामिषं सकृद् भुक्त्वा सर्वभुक्तजने गृहे ।
असम्भवेऽप्यशक्तौ वा ब्राह्मणान् न निमन्त्रयेत् ॥

इति देवलः । अत्र हरिहरः—पूर्वदिननिमन्त्रणे एकत्रभोजनमङ्ग-मित्याह । तन्न ।"

"एवमन्यत्रापि मन्त्रावृत्त्यनावृत्ती बोद्धव्ये । गन्धादिकं ब्राह्मणार्थमेव न तु पित्राद्युद्देशेन त्यक्तव्यमिति हरिहरः ।"

"एवं च सपवित्रकुशास्तरणमर्थात् पिण्डोपरि । अत एव हरिहर आस्तीर्य पिण्डोपरि इति शेषं प्रति व्याख्यातवान् ।"

१. आचारादर्श, पृष्ठ १६ क–ख
२. आचारादर्श पृष्ठ १२ ख
३. आचारादर्श, पृष्ठ २५ क
४ आचारादर्श, पृष्ठ २६ ख
५. आचारादर्श, पृष्ठ २७ क
६. आचारादर्श, पृष्ठ २७ ख
७. आचारादर्श, पृष्ठ २९ ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"हरिहरादयस्तु शुन्धन्तां पितर इत्यादिमन्त्रः अवनेजनप्रत्यवनेजनयोर्वा आश्वलायनोक्तेः।"

श्रीदत्तः स्वरचितेषु कतिपयग्रन्थेषु एव बहुश कल्पतरोर्मतमुल्लिखितवान्। तथा हि आचारादर्शे—

"कल्पतरुकारस्तु पूर्ववत्[1]।"

"प्राणाहुतिसन्निकर्षादिति कल्पतरुकारादीनाम्[2]।"

"सुमुहूर्तं इति विहितपूर्वाह्णादिकालपरं रक्तं कुंकुममिति कल्पतरुकारः[3]।"

पितृभक्तिग्रन्थेऽपि कल्पतरोर्नामोल्लिखितमास्ते। तथाहि—

"अत्र कल्पतरुकारः। पितॄनुद्दिश्य द्रव्यत्यागो ब्राह्मणस्वीकारपर्यन्तः श्राद्धमित्याह। तदयुक्तम्, प्रेतश्राद्धाव्यापनात्।"

"मातामहानामप्येवमिति सामान्येनातिदेशाद् न्युब्जमधोमुखमुत्तरतो ब्राह्मणादुत्तरस्यां दिशीति कल्पतरुकृतः। तन्न।"

"कल्पतरावप्यादिपदेन तिलपुष्पपवित्राणां ग्रहणमिति व्याख्यातम्।"

"अत एवाशनाय मतेऽनुमते वेति पदं न देयम्। कल्पतरौ चैवमेव व्याख्यातम्।"

"अन्येषां तु प्राचीनावीतादिपितृधर्मं एव विरोधाभावे सति बोद्धव्येति व्यवस्था। कल्पतरौ हलायुधीयश्राद्धाध्याये च शाखाभेदेन व्यवस्थोक्ता।"

"न च पृथक्करणाभावे यत्र पिण्डो दीयते तत्र पृथक् पिण्डमेकोद्दिष्टमिति कल्पतरुव्याख्यानमपि रमणीयं बहुव्रीहेर्जघन्यत्वात्।"

"महार्णवप्रकाशे कल्पतरौ हलायुधीयश्राद्धाध्याये च व्यवस्थोक्ता। औरसक्षेत्रजाभ्यां साग्निभ्यां मृताहे पार्वणं कर्तव्यम्। इतरैस्तु दशभिः पुत्रैर्निरग्निभिः साग्निभिश्चैकोद्दिष्टं कर्तव्यम्।"

---

१. आचारादर्श, पृष्ठ २५ क

२. आचारादर्श, पृष्ठ ६ ख

३. आचारादर्श, पृष्ठ ३१ क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"प्रचरदपि परित्यक्तमज्ञातमूलमिति कल्पतरुकृता प्रतिज्ञा, अनादेशानां च वाक्यानां त्यागान्निर्मूलत्वमिति चेत् तत्राज्ञातमूलत्वस्य मूलसन्देहेऽप्युपपत्तेः।"

"ब्रह्मपुराणीयं पित्रादित्रयपरभूतपुरुषत्रयं नान्दीमुखाभिधानम्। पित्रादित्रिके जीवति शाखान्तरविषयमिति वा कल्पतरुकृता '**सूर्येन्दुकर्मणी ये तु तयोः श्राद्धं न विद्यते**' इति परिशिष्टवचनात् सूर्यदर्शनचन्द्रदर्शनयोः श्राद्धं नास्तीत्युक्तम्। तदपरे दूषयन्ति।"

"इष्टिश्राद्धपदेन कर्माङ्गश्राद्धमेवोच्यते। अतः कर्माङ्गश्राद्धे क्रतुयज्ञो मुख्यः। कल्पतरुकारस्तु इष्टिश्राद्धमिष्टाश्राद्धं प्रति तूद्दिश्येत्यनेन विहितमित्याह।"

इदमत्र विचार्यते कल्पतरुकारलक्ष्मीधरस्य जीवितव्यकालस्तावदनुमानत एकादशशतकस्य प्रथमवर्षादारभ्य तत्पश्चाशद्वर्षपर्यन्त इति सिद्धान्तितम्[1]। हरिहरस्तु तस्मादुपरिष्टात्कालीन इति च। यतो हि स स्वग्रन्थे लक्ष्मीधरकृत्यकल्पतरुग्रन्थस्य नामोल्लिखितवान्। परन्तु नातिव्यवधानं तत्कालादेतत्कालस्येति मन्तव्यम्। अत्र हेतुः—हेमाद्रिकृतस्य (त्रयोदशशतकस्य मध्यभागे) चतुर्वर्गचिन्तामणिग्रन्थस्यान्तिमखण्डे हरिहरस्य नामोल्लिखितमास्ते। अतो हरिहरस्य स्थितिकालो द्वादशशतकात् प्रभृति तच्छतकीयपश्चाशत्खिष्टाब्दाभ्यन्तर एव वक्तुं शक्यते। डा० पी० वी० काणे महोदयोऽपि एतत् समर्थितवान्[2]।

अनयैव सरण्या श्रीदत्तोपाध्यायस्य जीवितव्यकालोऽप्यनुमानतो निर्णेतुं शक्यते यत् सप्तत्युत्तरद्वादशशतकादूर्ध्वं त्रयोदशखिष्टजन्मशतकाभ्यन्तरे एव निर्बाधइति। अयं च समयोऽन्यथापि समर्थयितुं शक्यः। तथा हि श्रीदत्तोपाध्यायः स्वरचिते आचारादर्शग्रन्थे कस्य-

१. पी० वी० काणे, हिस्ट्री आफ धर्मशास्त्र, वाल्यूम १, पृष्ठ ३१७
२. पी० वी० काणे, हिस्ट्री आफ धर्मशास्त्र, वाल्यूम १, पृष्ठ ३४२

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चिद् गणेशमिश्रस्य नाम निरदिशत्[१]। डा० पो० वी० काणे महोदय इमं गणेशमिश्रं मिथिलावासिनश्चण्डेश्वरस्य पितृव्यात् सुगतिसोपान-लेखकाद् गणेशमिश्रादभिन्नमसाधयत्। परन्त्विदमत्र चिन्त्यम्, यद्ययं चण्डेश्वरपितृव्य एवाचारादर्शोक्तो गणेशः स्यात्तर्हि स एव नूनं श्रीदत्तसमकालीनः स्यात्; यतो हि गणेशोऽयं त्रयोदशशतकस्य शेषार्धे ग्रन्थादिकं प्रणिनायेति तत्र नास्ति सन्देहावकाशः। श्रीदत्तस्य जीवितव्यकालस्त्रयोदशशतकस्य शेषार्धं इत्यत्रापि न सन्देहलेशः। अतश्चास्य गणेशस्य चण्डेश्वरस्य पितृव्यगणेशत्वेनावधारणं न संगच्छते। किं चान्यत् प्रमाणमपि तत्र जागर्ति। तथा हि, यदि ठक्कुरवंशजातो गणेश एवोल्लिखितोऽभविष्यत् तदा तं चण्डेश्वरठक्कुरवत् गणेशठक्कुर इति यद् वा महामन्त्रिगणेश इत्याहोस्वित् महामात्यगणेश्वर इत्यादिभिरुपाधिविशेषैरभूषयिष्यत्। वयं तु मन्यामहे आचारादर्शग्रन्थवर्णितो गणेशमिश्रो न तावद् गणेशठक्कुर इति; अपि तु तस्मादपि कियता कालेन प्राचीनतर इति। वस्तुतस्तु हरिनाथोपाध्यायः स्वरचितस्मृतिसारग्रन्थे, विद्यापतिर्गङ्गावाक्यावल्यां, वाचस्पतिमिश्रः श्राद्धचिन्तामणिग्रन्थे[२], गणपतिरपि तत्कृतगङ्गाभक्तितरङ्गिण्यां च यद् गणेश्वरमिश्रस्य नाम उल्लिखितवान् स एव श्रीदत्तेन निर्दिष्टः। त्रयोदशशतकस्य प्रथमार्ध एव तस्य रचनासमय इति।

इत्थं च श्रीदत्तोपाध्यायस्य जीवितव्यकालः सप्तत्युत्तरद्वादशशतकात् प्रभृति त्रयोदशशतकपर्यन्त इति वक्तुं शक्यते।

नानाग्रन्थालयेषु निहितेभ्यः पुस्तकसंग्रहेभ्यः पुस्तिकाचयेभ्यश्च

---

१. अशिरस्कं मार्जनमिति गणेशमिश्रः—आचारादर्श (डेकान कालेज), ३४२, पृष्ठ १५ ख। १९३९ संवति काश्यां मुद्रिते आचारादर्शग्रन्थे अयं पाठो नैवोपलभ्यते।

२. "घृतात् प्रत्यागतश्चापि पुनस्तथैव देवान् पितॄन् ब्राह्मणान् पूजयेच्चेति ब्रह्मपुराणवचनादिदं च श्राद्धमाभ्युदयिकमिति प्रतिहस्तकादयः पठन्तीति गणेश्वरमिश्रः।"—वाचस्पतिमिश्र, श्राद्धचिन्तामणि, पृष्ठ ६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वयं श्रीदत्तोपाध्यायलिखितानां साकल्येन षट्पुस्तकानां परिचयं लभामहे । यथा—

१. आचारादर्शः
२. छन्दोगाह्निकम्
३. पितृभक्तिः
४. शुद्धिनिर्णयः
५. समयप्रदीपः
६. श्राद्धकल्पः

अन्यच्च व्रतपद्धतेर्व्रतसारग्रन्थस्य वा लेखकोऽपि श्रीदत्तोपाध्याय इत्यनुमातुं शक्यते । मिथिलायां प्राप्यपुस्तकसंग्रहपरिचये (पृष्ठ ४०१) व्रतपद्धतिरिति नाम्ना श्रीदत्तोपाध्यायग्रन्थ उल्लिखित आस्ते । डा० पिटर्सनाभिधेयमनीषी स्वसम्पादिते आल्वारनाम्नि ग्रन्थसंग्रहे (पृष्ठ ६४) श्रीदत्तरचितमपरमेकं व्रतसारनामकं ग्रन्थं समुल्लिलेख । परन्तु निरुक्तं ग्रन्थद्वयं समयप्रदीपग्रन्थान्न पृथगिति समीक्षयैवावगच्छामः । तस्य च ग्रन्थस्योपक्रमिकं श्लोकद्वयमित्थम्—

"श्रेयः समादिशतु सालसपक्ष्मपाते
निद्रायिते अपि दृशौ भृशमुन्नमय्य ।
संवाह्यमानचरणाम्बुजजातहर्षो
लक्ष्मीमुखेक्षणपरः परमेश्वरो वः ॥"

अथ च—

"निबन्धे च निबद्धानि
वचनानि विचिन्वता ।
श्रीदत्तेन व्रतादीनां
सारमाकृष्य लिख्यते ॥"

इत्येतच्छ्लोकद्वयं समयप्रदीपग्रन्थस्योपक्रमे दृश्यते । अतो

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्रतसारो व्रतपद्धतिर्वा यत् समयप्रदीपग्रन्थस्यैव नामान्तरं तदनाक्षेपमेवानुमेयमिति ।

उल्लिखितेषु श्रीदत्तोपाध्यायग्रन्थेष्वाचारादर्शग्रन्थमात्रं मुद्रापितमास्ते[1] । अयमेव ग्रन्थो भूयसीं जनबहुमानास्पदतां लेभे । यतो हि अस्य द्वावेव टीकाग्रन्थौ रचितौ । तयोः प्रथमस्य नाम आचारादर्शव्याख्या[2], अपरस्य च आचारादर्शबोधिनीति[3] । आचारादर्शग्रन्थस्योपक्रमिकश्लोकादेवावगम्यते यदयं ग्रन्थो वाजसनेयिनां ब्राह्मणानां धर्मोपयोगिनीतिकर्तव्यतां निरूपयतीति । उक्तं च—

"अहोरात्राश्रितो धर्म
इह वाजसनेयिनाम् ।
निबध्यते निबन्धो यो
धर्मशास्त्रनिबन्धृभिः[4] ॥"

इह आचारादर्शग्रन्थे संक्षेपतो वक्ष्यमाणा विषया निरूपिताः । यथा—निद्राभङ्गः, शौचादिप्रातःकृत्यं, शौचान्तरकर्माणि, आचमनविधिः, आचमनभेदाः, आचमनानुकल्पविधिः, आचमनापवादः, दन्तधावनं, तदाश्रिता मन्त्राः, तत्र निषिद्धकाष्ठादीनि, प्रातःस्नानविधिः, स्नानान्तकल्पाः, नित्यस्नानम्, अन्तर्जलेऽघमर्षणं, स्नानान्तरं वस्त्रपरिधानं, तत्रार्द्रवस्त्रपर्युदासः, सन्ध्योपासना, तत्समाप्तिकालः, पवित्रधारणं, गायत्रीतत्त्वम्, प्राणायामः, आचमनं, मार्जनम्, अघमर्षणं, सूर्यार्घ्यदानं, निषिद्धकुशाः, प्रशस्तकुशाः, सन्ध्याप्रयोगः, ब्रह्मयज्ञः, देवतर्षिपितृमरीच्यादीनां तर्पणानन्तरकृत्यानि, देवपूजा, तत्र पञ्चोपचारपरिचयः, पुष्पाणि, धूपो,

---

१. काश्यां १९२४ संवति, १९३९ संवति च प्रकाशितः ।
२. मिथिला कैटलाग, पृष्ठ ३१
३. हरप्रसाद शास्त्री, डेस्क्रिप्टिव कैटलाग आफ संस्कृत मैनुस्क्रृप्ट्स इन् दी गवर्णमेण्ट कलेकशन् अण्डर दी केयर आफ दी एसियाटिक सोसाइटी, वाल्यूम ३, पृष्ठ २२१
४. आचारादर्श, पृष्ठ १

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दीपो, नैवेद्यम्, देवताविशेषे पर्युदस्तानि पुष्पाणि, पूजाफलं, पूजनोत्तरकर्म, बलिवैश्वदेवौ, पञ्चयज्ञनिरूपणं, नित्यश्राद्धं, भिक्षादानं, भोजनविधिः, अभोज्यानि, प्राणाहुतिक्रमः, भोजनपात्रपर्युदासः, जलपानप्रकारः, हस्तक्षालनविधिः, शयनविधिः, दारोपगमः, मैथुनोत्तरशुद्धिः, तत्र वारतिथिनक्षत्रविशेषपर्युदासः।

उक्तानामेतेषां विषयाणां विचारकाले ग्रन्थकृता मनुवसिष्ठपद्मपुराणलघुहारीतमरीचिछन्दोगपरिशिष्टगोभिलवायुपुराणबौधायनकालिकापुराण-याज्ञवल्क्यसंहितेत्यादिधर्मग्रन्थानामंशविशेषा आलोचिताः। अन्यच्च एतदनन्तरकालीनग्रन्थेषु आचारचिन्तामणिः, कल्पतरुः, कामधेनुः, राजकृतग्रन्थः, (भोजदेवीयः), स्मृतिमहार्णव इत्यादयस्तथा गणेशमिश्रेण, हरिहरेण, हलायुधेन च निबद्धग्रन्थानां परिचया उपलभ्यन्ते। न केवलं तथा, श्रीदत्तोपाध्यायोऽपि तदीयग्रन्थेषु क्वचिदेकत्र छन्दोगाह्निकस्य नाम आचारादर्शे उदलिखत्[1]।

छन्दोगाह्निकग्रन्थस्तत्त्वत आचारादर्शग्रन्थस्यैव न्यूनतापरिपूरक इति वक्तुं शक्यते। तथा हि आचारादर्शग्रन्थो यथा यजुषामादरार्हस्तथा सामगानामपि छन्दोगाह्निकग्रन्थो नित्यकृत्यवर्णनात् समादरणीयतां भजते। अत्र हि ग्रन्थे प्रातःकालीनशय्यात्यागात् प्रभृति नैशशयनावधिः कृत्यनिचयोऽवश्यज्ञातव्यो वर्णितः, प्रसङ्गत एतदपि समुल्लेख्यं यदस्मिन्नाचारादर्शे न तावत् कापि तत्त्वसमस्या विप्रतिपत्तिर्वावतारिता; परन्तु छन्दोगाह्निकग्रन्थेऽन्तरान्तरा यद्यपि कापि समस्या कश्चन वितर्को वा दृश्यते, तथापि मनीषी श्रीदत्तोऽसामान्यप्रतिभाबलेन तेषां सर्वेषां समाधानं कृतवान्। यदि वस्तुसिद्धौ कुत्राप्युपजीव्या वैदिकमन्त्रा न दृश्यन्ते तदा पञ्चरात्रसंहिता पञ्चरात्रं वा सहायकभावेनाश्रयणीयमिति श्रीदत्त-

१. आचारादर्श, पृष्ठ ३१ ख "एव तु मन्त्रपाठ इत्याद्यस्मपक्षनिरासविस्तारश्छन्दोगाह्निकेऽनुसंधेयः।"

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मतम्। तत्र हेतुप्रदर्शनावसरे श्रीदत्तेनोक्तं यद् वयं महाभारते वराहपुराणे च पञ्चरात्रस्य प्रशस्यतामुपालभामहे[1] इति। अत एव पञ्चरात्रसंहिता वेदबाह्येति स्वीकरणं न समीचीनतामर्हति। कामं कुमारिलभट्टमते[2] आचार्यशंकरस्यापि मते[3] पञ्चरात्रसंहिता वेदबाह्येति स्वीकृतिः। श्रीदत्तोपाध्यायस्तु मन्यते न हि वेदबाह्यमात्रमेव वेदविरोधीति। यद्धि वेदविरोधि तन्न खलु कदाचिदप्यास्तिकदर्शने प्रमाणत्वेन गृहीतमिति। परन्तु वेदबाह्यमपि यदि तद् वेदाविरोधि स्यात् तर्हि तस्य प्रामाण्याभ्युपगम एव संगच्छत इत्येव श्रीदत्तस्याकूतम्। स्मृतिनिबन्धेष्वभ्युपगतप्रामाण्या अवैदिकपञ्चरात्रसंहितादिग्रन्थाः सामाजिकव्यवहारे धर्मानुगतजीवने च महदेकं परिवर्तनमानीतवन्तः। न खल्वेतदेव पर्याप्तम्। श्रीदत्तोत्तरकालेऽपि मैथिलस्मृतिनिबन्धकारा भूयस्तत्प्रभावमङ्गीकृतवन्त इत्यकामेनापि वाच्यम्। किं बहुना, मिथिलाप्रदेशस्यैतिह्यपरिचये इदमेवोपलभ्यते यत् श्रीदत्तोपाध्याय एव तादृशः प्रथमः स्मृतिनिबन्धकाराणां यः खल्ववैदिकग्रन्थानपि प्रमाणपदवीमारोपयदिति। अनेनैव मार्गेण छन्दोगाह्निकग्रन्थस्यापि सप्रयोजनकत्वमैधिष्ट। अस्यैव ग्रन्थस्यापरस्मिन्नंशे स प्राचीनस्मृतिनिबन्धं कामधेनुग्रन्थं भोजराजविरचितग्रन्थवत् सप्रमाणमवर्णयत्[4]। वस्तुतस्तु लोकप्रसिद्ध्या कामधेनुग्रन्थो

---

१. छन्दोगाह्निक, पृष्ठ २८ क—"सा च (विष्णुपूजा) पुरुषसूक्तेन, विष्णुसंहितया, विष्णुकल्पेन वा। वेदमन्त्राभावे पञ्चरात्रकल्पैरेव। ..पञ्चरात्रनिर्मूलत्वाभिधानं तु निर्मूलमेव, 'अलाभे वेदमन्त्राणां पञ्चरात्रोदितो विधि'रिति वराहपुराणसंवादात्, महाभारतादौ प्रशंसितत्वात्। न च पञ्चरात्राप्रामाण्यव्यवस्थापकवेदान्तीयेन विरोधः। तस्य वेदविरोधात्माद्युपदर्शकशाण्डिल्यादिपञ्चरात्रगोचरत्वात्। भट्टवार्तिककारीयपञ्चरात्राप्रामाण्याभिधानमपि वेदविरुद्धार्थविषयमेव।"

२. कुमारिलभट्ट, बाह्यग्रन्थानामप्रामाण्यनिरूपणम्।

३. ब्रह्मसूत्र, शांकरभाष्य, २।२।४२-४५ उत्पत्त्यधिकरणम्।

४. छन्दोगाह्निक, एसियाटिक सोसाइटी, नं० २९०३, पृष्ठ १० ख "अत एव कात्यायनीयस्नानविधिः राज्ञाऽलिखितोऽपि शिष्टैरनुष्ठीयते, कामधेनौ च लिखित इति। राज्ञाऽलिखितोऽपि गोभिलतर्पणविधिः कामधेनुलिखित इति।"

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भोजराजकृत इत्यभ्युपेयते। अस्यैव छन्दोगाह्निकग्रन्थस्य संवादं स स्वकीयसमयप्रदीपग्रन्थे पितृभक्तौ चोपनिबद्धवान्। अत्र ग्रन्थे स कल्पतरोः, कामधेनोः, कर्मप्रदीपस्य, गोपालस्य, छन्दोगपद्धतेः, भूपालस्य, मिताक्षरायाः, रत्नकरण्डिकायाः, भोजकृतश्राद्धकल्पस्य, स्मृतिमञ्जूषायाः, स्मृतिमहार्णवस्य च ग्रन्थानां नामानि समुल्लिलेख। वाचस्पतेः पितृभक्तितरङ्गिण्यां, चण्डेश्वरस्य गृहस्थरत्नाकरे, एवमन्येष्वपि ग्रन्थेषु छन्दोगाह्निकस्य समुल्लेखो वर्त्तते।

छन्दोगाह्निकग्रन्थस्तावदल्पीयसैव कालेन जनबहुमान्यतामर्जितवान् नास्ति तत्र सन्देहलेशोऽपि। एतदुपरितनकाले महामहोपाध्यायशंकरमिश्रनामधेयो मैथिलः कश्चन स्मार्तश्छन्दोगाह्निकोद्धाराभिधं कंचिदेकं छन्दोगाह्निकस्य मर्मप्रकाशकं ग्रन्थं प्रणीतवान्[1]।

श्रीदत्तस्य पितृभक्तिसंज्ञो ग्रन्थः समुल्लेखयोग्यः। इदमधिकमुच्यते यद् वाचस्पतिमिश्रप्रणीतया पितृभक्तितरङ्गिण्या सहास्य ग्रन्थस्य कापि संगतिर्नास्ति। परं यजुरधीतिब्राह्मणानां श्राद्धतत्त्वमेवैतद्ग्रन्थस्याभिधेयम्। ग्रन्थारम्भे श्रीदत्तेनोररीकृतं यदयं ग्रन्थो गोपालभूपालेन (राज्ञा भोजदेवेन) विरचितं ग्रन्थमवलब्य, कर्कभाष्येण सह कातीयकल्पं चोपजीव्य विरचितः[2]। अत्र ग्रन्थे श्राद्धलक्षणं वैशद्येन समीक्षितं तथा पार्वण-

---

१. छन्दोगाह्निकस्य हस्तलिखितग्रन्था अत्र समुपलभ्याः—

(क) हरप्रसाद शास्त्री, डेस्क्रिप्टिव कैटलग आफ संस्कृत मैनुस्क्रिप्ट्स इन दी गवर्णमेण्ट कलेक्शन अण्डर दी केयर आफ दी एसियाटिक सोसाइटी, वाल्यूम ३, पृष्ठ ३५०-३५२

(ख) के० पी० जैसवाल एण्ड ए० पी० बनर्जी शास्त्री, डेस्क्रिप्टिव कैटलग आफ संस्कृत मैनुस्क्रिप्ट्स इन मिथिला, वाल्यूम ३, पृष्ठ १२८-१३१

२. पितृभक्ति (डेकान कालेज मैनुस्क्रिप्ट्स नं० १५२,१८९२-१८९५) द्रष्टव्यः प्रथमः श्लोकः—

"कातीयकल्पं सह कर्कभाष्यं
गोपालभूपालमतादि दृष्ट्वा।
सतां च वाच्यानि निशम्य सम्यग्
यजुर्विदां श्राद्धविधिं विधास्ये॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मेकोद्दिष्टं, सपिण्डनं, मासिकश्राद्धमाशौचान्तद्वितीयदिनविधेयं श्राद्धमाभ्युदयिकं च विशेषतो निरूपितानि ।

श्रीदत्तोपाध्यायादुपरिष्टाज्जाताः स्मृतिनिबन्धकारा अस्माद् ग्रन्थात् प्रयोजनानुसारेणांशविशेषान् यदृच्छयोदजीहरन् । अयमत्र विशेषः—ये खल्विमं विषयमवलम्ब्यालोचितवन्तो यथा रुद्रधरवाचस्पतिमिश्रमुखास्ते हि इमं पितृभक्तिग्रन्थमाकरग्रन्थत्वेनाभ्युपगतवन्तः । वाचस्पतिमिश्रो हि मैथिलस्मार्तेषु वरिष्ठ इत्युच्यते । परन्तु तत्कृतश्राद्धचिन्तामणिना सह श्रीदत्तप्रणीतपितृभक्तिग्रन्थस्य समीकरणोपयोगिन्यां समीक्षायां प्रथमवर्णितस्य ग्रन्थस्योपरि चरमोक्तग्रन्थस्य प्रभाव इति सुस्पष्टमेव प्रतीयते । यद्यपि वाचस्पतिमिश्रा बहुशः क्षेत्रेषु स्वमतं न विवृतवन्तस्तथापि श्रीदत्तमतं समुल्लिलिखुः । अस्मिन् ग्रन्थे श्रीदत्तः कामधेनुरजनीबन्धगौडीयस्मृतिप्रभृतीनां निबन्धानां प्रामाणिकत्वमन्वीक्षितवान् । कामं गौडीयस्मृतिनिबन्धान् स यथेच्छं व्यवहृतवान् तदपि बहुष्वंशेषु गौडीयनिबन्धकाराणां मतं न समर्थितवान् । मीमांसादर्शनीयस्मृतिप्रामाण्याधिकरणं[1] प्रति पाठकानां दृष्टिमाकर्षयन् गौड़ीयस्मृतिनिबन्धानामपरीक्षिततत्त्वान्यपि, खण्डयामास[2] । वाचस्पतेः श्राद्धचिन्तामणिं विना

१. पितृभक्ति, पृष्ठ २५ क—"अत्र महार्णवप्रकाशे कल्पतरौ हलायुधीयश्राद्धाध्याये च व्यवस्थोक्तौरसक्षेत्रजाभ्यां साग्निभ्यां मृताहे पार्वणं कर्तव्यमितरैस्तु दशभिः पुत्रैर्निरग्निभिरेकोद्दिष्टं कर्तव्यम्" । तथा च वाचस्पतिपादानां श्राद्धचिन्तामणौ (पृष्ठ १३६) अपि—"अत्र च प्रकाशहलायुधकल्पतरुपारिजातपितृभक्तिप्रदीपविवेकेष्वियं व्यवस्था यदौरसक्षेत्रजाभ्यां साग्निभ्यां मृताहे पितुः पार्वणं कर्तव्यम्... एकोद्दिष्टम्..साग्निभ्यामौरसक्षेत्रजाभ्यां पार्वणेतिकर्तव्यतयैकोद्दिष्टमेव कार्यमिति रत्नाकरः ।"

२. मीमांसासूत्र, स्मृतिप्रामाण्याधिकरण, १.३.१; १.३.२

"धर्मस्य शब्दमूलत्वा-
दशब्दमनपेक्षं स्यात् ।
अपि वा कर्तृसामान्यात्
प्रमाणमनुमानं स्यात् ।।"

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रुद्रधरस्य श्राद्धविवेकग्रन्थे यत्रास्य पितृभक्तिग्रन्थस्य[1] समुल्लेखोऽस्ति तत्र पितृभक्तिग्रन्थः प्राचीनगौरवमजंयांबभूव। श्रीदत्तोपाध्यायोऽपि पितृभक्तिग्रन्थे यत्र यत्र येषां ग्रन्थानां नामानि येषां च ग्रन्थकाराणामभिधानान्युदाहरति तानि सर्वाणि समुत्थाप्यन्ते—यथा—आपस्तम्बः, आश्वलायनः, उशनाः, ऋष्यशृङ्गः, कल्पतरुः, कर्कभाष्यम्, कातीयम्, कात्यायनः, कामधेनुः, गोभिलः, गौतमः, छन्दोगश्राद्धकल्पः, जाबालः, तैत्तिरीयम्, देवलः, देवीपुराणम्, नारायणवृत्तिः, पारस्करः, पितृहितकरणिकारः, प्रचेताः, ब्रह्मपुराणम्, भविष्यपुराणम्, भाष्यकारः, मत्स्यपुराणम्, मनुः, महार्णवप्रकाशः, मार्कण्डेयपुराणम्, मिताक्षरा, याज्ञवल्क्यः, याम्यः, रत्नकरण्डिका, राजा, रामायणम्, वराहपुराणम्, वायुपुराणम्, विधिपुष्पमाला, विष्णुपुराणम्, विष्णुसंहिता, वैजवापम्, शङ्खः, शतपथम्, शातातपः, शुभंकरः, श्राद्धकल्पः, श्रीकण्ठः, स्मृतिमञ्जरी, स्मृतिमञ्जूषा, हरिहरः, हलायुधः, हारलता, हारीत[2] इति। अस्य पितृभक्तिनाम्नो ग्रन्थस्य

---

१. पितृभक्ति पृष्ठ २७ ख तदेतानि वाक्यानि राज्ञा लिखितत्वादनादेयानीति केचित्। तदयुक्तम्, कामधेनावपि राजनिबन्धवत् शिष्टपरिग्रहात्। संशयस्तर्हीति चेन्न, राज्ञा लिखितस्यादर्शनेनाप्युपपत्ते.। न हि यावन्ति स्मृतिवाक्यानि तावन्ति सर्वाण्येव राज्ञा दृष्टानीति प्रमाणमस्ति। न च राजलिखितमेवाद्रियते इत्यपि नियमः, रामायणादेरनादरप्रसंगात्...तथेह यत् स्मृतिवचनं महाजनपरिगृहीतं तत् प्रमाणं स्मृत्यधिकरणन्यायात्। नन्वेवं गौडनिबन्धानामपि प्रामाण्यापत्तिर्निर्मूलबहुवचनत्वेन शिष्टैरनादृतत्वात्।

२. पितृभक्तिग्रन्था निम्नोक्तेषु स्थलेषूपलभ्यन्ते :—

(क) हरप्रसाद शास्त्री डेस्क्रिप्टिव कैटलाग आफ संस्कृत मैनुस्क्रिप्ट्स इन दी गवर्णमेण्ट कलेक्शन अण्डर दी केयर आफ दी एसियाटिक सोसाइटी, वाल्यूम ३, पृष्ठ ४००, संख्या ५२३३

(ख) पूना डेकान कालेज लायब्रेरी, संख्या १५२, १८९२-१८९५

(ग) हरप्रसाद शास्त्री, डेस्क्रिप्टिव कैटलाग आफ संस्कृत मैनुस्क्रिप्ट्स इन दी गवर्णमेण्ट कलेक्शन अण्डर दी केयर आफ दी एसियाटिक सोसाइटी, वाल्यूम ३, पृष्ठ ३९९-४००, संख्या ५७६७

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

महादेवकृता 'पितृभक्तिचर्चा'[1] मुरारिकृता 'पितृभक्तिव्याख्या'[2] इति द्वौ विवृतिग्रन्थौ परिचीयेते।

श्रीदत्तोपाध्यायरचितोऽपरोऽपि कश्चिद् ग्रन्थः शुद्धिनिर्णय इति नाम्ना परिचीयते[3]। शुद्धिमवलम्ब्यान्येऽपि बहवो ग्रन्था मैथिलनिबन्धृभी रचिताः सन्ति। वस्तुतस्त्विदं तत्त्वं मिथिलायां भूयस्त्वेन जनप्रियतामाप। श्रीदत्तकृतशुद्धिनिर्णयग्रन्थे तावज्जननमरणादिजनिताशौचात् शुद्धयुपायाः कात्स्न्र्येन वर्णिताः[4]।

प्रागेवोक्तं यत् श्रीदत्तोपाध्यायस्य नाम्ना यौ व्रतसारव्रतपद्धतिग्रन्थौ प्रचलितौ, तौ तु समयप्रदीपग्रन्थस्यैव नामान्तरभाजौ। अयं हि श्रीदत्तोपाध्यायस्य समयप्रदीपाभिधो ग्रन्थो ह्यत्युत्तमः। यदपि समयप्रदीपनाम्नान्यद् ग्रन्थद्वयमुपलभ्यते तत्त्वस्मदालोच्यसमयनिर्णयविषये सादृश्यं विना नान्यत् किमपि साम्यमुपजीव्यते। तत्र प्रथमस्य समय-

(घ) के० पी० जैसवाल एण्ड ए० पी० बनर्जी शास्त्री, डेस्क्रिप्टिव कैटलाग आफ संस्कृत मैनुस्कृप्ट्स इन मिथिला, वाल्यूम ३, पृष्ठ २८०-२८२
राजेन्द्रलालमित्रमहोदया बीकानेरकैटलागाख्यग्रन्थे एकां पुस्तिकामुल्लिखितवन्तः। किन्तु तत्र ग्रन्थकारस्य नाम न प्राप्यते। आदावन्ते च यौ श्लोकौ तौ तु पितृभक्त्यनुरूपौ इति कृत्वा स ग्रन्थः पितृभक्ति एव नान्य इति मन्यामहे।

१. के० पी० जैसवाल एण्ड ए० पी० बनर्जी शास्त्री, डेस्क्रिप्टिव कैटलाग आफ संस्कृत मैनुस्कृप्ट्स इन मिथिला, वाल्यूम ३ पृ० २८२

२. के० पी० जैसवाल एण्ड ए० पी० बनर्जी शास्त्री, डेस्क्रिप्टिव कैटलाग आफ संस्कृत मैनुस्कृप्ट्स इन मिथिला, वाल्यूम ३, पृष्ठ २८५

३. पी० वी० काणे, हिस्ट्री आफ धर्मशास्त्र, वाल्यूम १, पृष्ठ ७५२

४. शुद्धिनिर्णयपुस्तिकार्थं द्रष्टव्यं, पी० वी० काणे, हिस्ट्री आफ धर्मशास्त्र, वाल्यूम १, पृ० ७५२
के० पी० जैसवाल एण्ड ए० पी० बनर्जी शास्त्री डेस्क्रिप्टिव कैटलाग आफ संस्कृत मैनुस्कृप्ट्स इन मिथिला, वाल्यूम ३, पृ० ४३३

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रदीपनाम्ना प्रथितयोर्ग्रन्थयोः रचयिता विट्ठलदीक्षितः[1]। अयं त्वद्यत्वेऽपि न मुद्रणेन प्रकाशतां नीतः, हस्तलिखितपुस्तिकाकारेण विराजते। द्वितीयस्तु मुद्रितः। हरिहराचार्योऽस्य निबन्धक। अयमेव स्मार्त-रघुनन्दनपिता हरिहराचार्यो न वा तत्र महान् सन्देहोऽस्ति। अयं तावत् कश्चिज्ज्योतिश्शास्त्रग्रन्थ इति। अस्मिन् ग्रन्थे ज्योतिश्शास्त्रविषयाः सन्ति, ते यथा—चन्द्रशुद्धिः, ताराशुद्धिः, नक्षत्रदोषशान्तिः, नक्षत्रप्रचयः, नक्षत्राधिदेवता, योगनवांशविचारः, कालाशुद्धिः, सर्वग्रहशुद्धिः, विशेषतो रविशुद्धिः, रविदोषशान्तिः, दग्धास्तिथयः, नन्दाभिसंज्ञकास्तिथयः, पापादितिथयः, सिद्धियोगः, कालवेला, वारवेला, माहेन्द्रादियोगः, क्षेत्राधिपः, नक्षत्रामृतयोगः, उग्रादिनक्षत्रसंज्ञा, गर्भाधानपुंसवनसीमन्तोन्नयनान्नप्राशनादयः संस्काराः, योटकादिविचारः, सप्तशलाकावेधः, दशयोगभङ्गः, पञ्चशलाकावेधः, सुतहिवुकादियोगः, औषधभक्षणं, वाजिप्रक्रिया, गोयात्रादयः, सामान्यतो देवताप्रतिष्ठा, धान्यच्छेदनाम्बुवाचीगृहप्रवेशाः, योगिनीविचारः, यात्रालग्ननिर्णयः, उषायोगः, नवान्नादयश्च। ग्रन्थारम्भे वयं पश्यामः—

"अनायासेन समयं
कर्मणां यो विधित्सति।
तदर्थं ज्योतिषः श्लोकान्
संचिनोमि यथामति॥ इति।

तथा—

"ज्योतिषग्रन्थकलापाद्
वचनान्याकृष्य शिष्यबोधाय।
समयप्रदीपमेतं
कुरुते श्रीहरिहराचार्यः॥" इति[2]।

---

१. पी० वी० काणे, हिस्ट्री आफ धर्मशास्त्र, वाल्यूम १, पृ० ६५६

२. समयप्रदीप, पृष्ठ १

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ततश्चानुमीयते यदस्मदालोच्यसमयप्रदीपग्रन्थेन सार्धं नास्त्यस्य सम्बन्धलेशोऽपि[1]।

लौकिकानां सर्वेषामेव भावानां यद्यपि नित्येनानित्येन वा कालेन सहाङ्गाङ्गिभावसम्बन्धोऽस्त्येव, तथापि श्रौतस्मार्तधर्मकर्मभिः सह कालस्याङ्गाङ्गिभावसम्बन्धो विशेषेनोल्लेखनीयः। शास्त्रविहितकर्मणां साधनेष्वन्यतमं साधनं काल इति ऋषिभिर्निर्णीतम्। उक्तं च—

"अकाले चेत् कृतं कर्म
काले तस्य पुनः क्रिया।
कालातीतं तु यत् कुर्या-
दकृतं तद् विनिर्दिशेत्॥"

कालस्य क्रियाया अधिकरणत्वेऽपि धर्मशास्त्रमीमांसकैः प्राधान्येनाङ्गत्वनिरूपणार्थं कर्मानुष्ठानकर्तुर्विशेषणत्वेन स गृहीत इति, एतच्च

---

१. समयप्रदीपस्य हस्तलिखितग्रन्था अत्र समुपलभ्याः

(क) पूना डेकान कालेज लायब्रेरी, संख्या ३७१, १८७५-१८७६

(ख) कलकत्ता एसियाटिक सोसाइटी लायब्रेरी, नं० जी० १०६१६। हरप्रसाद शास्त्री, डेस्क्रिप्टिव कैटलाग आफ संस्कृत मैनुस्कृप्ट्स इन दी गवर्नमेण्ट कलेक्शन अण्डर दी केयर आफ दी एसियाटिक सोसाइटी, वाल्यूम ३, पृष्ठ ६६७

(ग) इण्डिया आफिस लायब्रेरी, लण्डन, जूलियस एगेलिंग, कैटलाग आफ दी संस्कृत मैनुस्क्रप्ट्स इन दी लायब्रेरी आफ दी इण्डिया आफिस, लण्डन, पार्ट ३, ५३८-५३६, नं० १६८३

(घ) सरस्वती भवन लायब्रेरी आफ दी वाराणसेयसंस्कृतविश्वविद्यालय, कुबेरनाथशुक्ल, कैटलाग आफ दी संस्कृत मैनुस्कृप्ट्स इन सरस्वतीभवन, वाल्यूम ३, नं० ११८८७

(ङ) सरस्वती भवन लायब्रेरी आफ दी वाराणसेयसंस्कृतविश्वविद्यालय, कुबेरनाथ शुक्ल, कैटलाग आफ दी संस्कृत मैनुस्कृप्ट्स इन सरस्वती भवन, वाल्यूम ३, न० १३०६३०

(च) के० पी० जैसवाल एण्ड ए० पी० बनर्जी शास्त्री, डेस्क्रिप्टिव कैटलाग आफ संस्कृत मैनुस्कृप्ट्स इन मिथिला, वाल्यूम ३, नं० ४१४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

"शुचिस्तत्कालजीवी कर्म कुर्यात्" इत्यादिभिरधिकारबोधकविधिविचारे स्फुटीकृतम्। अस्माच्च कारणात् मीमांसकैर्विद्वद्‌भिर्धर्म्यकर्मबोधकविधिवाक्येषु कालवाचकशब्देभ्यो विहिता सप्तमी नाधिकरणे सप्तमीति सिद्धान्तितम्। कालः कर्तुर्विशेषणमिति कृत्वा तत्र विशेषणे तृतीयाप्राप्तिरेव स्यात् तदपवादार्थं कालभावयोः सप्तमीति विशेषविधानं कृतम्[1]। यतश्च सर्वेषां धर्म्यकर्मणां कालोऽपरिहार्यमङ्गमिति विहितमतो हि श्रीदत्तोपाध्यायो निजग्रन्थस्य समयप्रदीप इति नाम चकार इत्येवं सिद्धान्तोऽसंगत इति न मन्तव्यम्। अस्मिंस्तु समयप्रदीपग्रन्थे कालविशेषेण विहितानि श्रौतानि स्मार्तानि च कर्माणि यद्यप्यालोच्यानि, तथाप्यत्र सर्वाणि व्रतान्येव विशेषत आलोचितानि। इदमभिसन्धाय ग्रन्थकारेण ग्रन्थोपक्रमे "श्रीदत्तेन व्रतादीनां सारमाकृष्य लिख्यते" इति प्रतिज्ञातम्। अथवा समयप्रदीप इत्यस्य आचारप्रदीप इत्यर्थोऽपि करणीयः। समयपदस्याचाररूपोऽर्थोऽपि प्रसिद्धः। तदुक्तं—"समयः शपथाचारः···"

अत्रेदमप्युल्लेख्यं यदस्य ग्रन्थस्य व्रतसारसंज्ञया व्रतप्रदीपनाम्ना वा व्यपदेशोऽस्तीति। व्रतानि व्रतपरिगणनं वा आदायानेके ग्रन्थकाराः स्वस्वग्रन्थे तत्त्वमालोचितवन्तः। परन्तु तेषु लक्ष्मीधरो हेमाद्रिश्च समुल्लेख्यसंज्ञौ इति। मत्स्यभविष्यादिपुराणेष्वप्यनेकेषां व्रतानां परिचयः प्रदत्त एव। ते पुनर्व्रततत्त्वं वा व्रतलक्षणं वा व्रतविषयकसमीक्षां वावलम्ब्य न प्रावर्तिषत। रघुनन्दनेन तु यद् यत् कृतं तत् समयप्रदीपकारोक्त्य-

---

१. 'शुचिस्तत्कालजीवी कर्म कुर्यात्' अनेनार्षवचनेन कर्त्तुः शुचित्वस्य तत्कालजीवित्वस्य च विशेषणतया प्राप्तेस्तत्कालरूपविशेषणतावच्छेदकस्यापि प्राप्तिः। तत्कालपदेन च पञ्चमीषष्ठ्येकादशीप्रभृतयः कालविशेषा एव गृह्यन्ते, त एव विशेषणात्मानः, तच्छब्दस्य शक्तेर्विशेष एवोपस्थितेः। अत एव "पञ्चम्यामुपवसेत्" इत्यादिवाक्यानां शाब्दबोधविषयः—पञ्चम्युपलक्षिततत्पुरुषीयोपवासः कार्य इत्यादिरूपो भवति। पञ्चम्यामिति पदस्य पञ्चमीविशिष्टपुरुषीयेत्यर्थः, अतश्च मीमांसकमते कालो विशेषणमिति सिद्ध्यत्येव। एवं च जटाभिस्तापसो ज्ञेय इत्यादिषु यथा जटोपलक्षितस्तापसो ज्ञानविषय इति बोधो भवति तथा पञ्चम्या परिचायितेन पुरुषेणोपवासः करणीय इत्यायाति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पेक्षयातीव स्वल्पतनु, अन्तरान्तरा च स्वग्रन्थेषु स समयप्रदीपकारस्य मतमविकलमुद्धृतवान्। अतोऽनयापि दिशा समयप्रदीपः समधिकमूल्य इति मन्तव्यम्। समयप्रदीपकारस्तावत् न हेमाद्रिवत् नापि कृत्यकल्पतरुकारवदनेकशो व्रतानां परिगणनेनैव चरितार्थः, परमितकर्तव्यतातत्त्वानि लक्षणानि विभागांश्चानुसरन् सर्वथा समीक्षां चक्रे।

अधुना सम्पाद्यमानः श्रीदत्तोपाध्यायस्यापरः प्रसिद्धो ग्रन्थो श्राद्धकल्पो नाम। वैदिकसाहित्येतिहासपर्यालोचनेनेदमेव ज्ञायते यत् तत्र श्राद्धाध्यायस्यैव श्राद्धत्वेन परिचितिः। अनया दिशा श्रीदत्तस्य ग्रन्थनामानि पाठकानामीषद् विभ्रान्तिविषयकाणि भवितुमर्हन्ति। श्रीदत्तोऽस्मिन् ग्रन्थे सामगानां श्राद्धमधि विचारितवान्। ग्रन्थकाररचितोऽयं श्राद्धकल्पग्रन्थो भूपालगोपालयोर्ग्रन्थादिसमीक्षावशात् तत्प्रदर्शितमार्गानुसारेण प्रवृत्तः। केचिद्विद्वांसो मन्यन्ते यदिमौ श्राद्धकल्पपितृभक्तिग्रन्थौ द्वावेव श्रीदत्तकृतौ अभिन्नौ एकात्मानौ वा, अथवा श्राद्धकल्प एव पितृभक्तिग्रन्थनाम्ना परिचित इति[1]। वयं तु प्रागेवावोचाम यत् पितृभक्तिग्रन्थोऽस्मात् पृथगिति। किंच, श्रीदत्तः स्वयमेव स्वकीये पितृभक्तिग्रन्थे क्वचिदेकत्रेदमुक्तवान्—

"एतत्त्वस्माभिश्छन्दोगश्राद्धकल्पे सविस्तारमालोचितम्[2]।"

अस्य श्राद्धकल्पस्य परिचयस्तत्कृतसमयप्रदीपग्रन्थेऽप्युपलभ्यते[3]।

श्राद्धकल्पपुस्तकस्योल्लेखो वाराणसेयसंस्कृतविश्वविद्यालयस्य ग्रन्थपरिचयात्[4], अथ च बम्बईविश्वविद्यालयस्य आई० एस० देसाईसंगृहीत पुस्तकपरिचयत उपलभ्यते[5]।

१. एच० डी० वेलणकर, कैटलाग आफ मैनुस्क्रुप्ट्स इन दी आई० एस० देसाई कलेक्शन इन दी बम्बई युनिर्वासिटी।
२. पितृभक्ति पृ० १५ ख इति प्रपञ्चितमस्माभिश्छन्दोगश्राद्धकल्पे।
३. समयप्रदीप, पृष्ठ ४६ क निर्णीतमस्माभिः श्राद्धकल्पे।
४. कुबेरनाथ शुक्ल, डेस्क्रिप्टिव कैटलाग आफ संस्कृत मैनुस्क्रुप्ट्स इन दी सरस्वती भवन, वाल्यूम ३, १३११८० तथा १३७६५।
५. एच० डी० वेलणकर, कैटलाग आफ संस्कृत मैनुस्क्रुप्ट्स इन दी आई० एस० देसाई कलेक्शन इन दी बम्बई, यूनिर्वासिटी, पृष्ठ ५१।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



'ख' पुस्तिकायाः प्रतिलिपिः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्राद्धकल्पसम्पादनाय संगृहीतानामालोचितानां हस्तलिखितपुस्तिकानां परिचयः

वाराणसेयसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनग्रन्थागाराद् द्वे हस्तलिखिते पुस्तके तथा पूनाडेकानकालेजग्रन्थालयाद् एका हस्तलिखिता पुस्तिका समानाय्य सम्यगालोच्य च ता अवलम्ब्यैव संस्करणमिदं प्रस्तूयते। आलोचनसौकर्यार्थमुक्ता हस्तलिखितपुस्तिका यथाक्रमेण क ख ग इति रूपेणाभिधीयन्ते। एतासां संक्षिप्तपरिचयोऽधुना प्रदीयते।

(क) वाराणसेयसंस्कृतविश्वविद्यालयसरस्वतीभवनग्रन्थागारस्य पुस्तिका। कुबेरनाथ शुक्ल, डेस्क्रिप्टिव कैटलाग आफ संस्कृत मैनुस्क्रप्ट्स इन दी सरस्वती भवन, वाल्यूम ३, नं० १३१८०। प्राचीने देशजपत्रे लिखिता। सम्पूर्णा पत्रसंख्या ३१। शकाब्द १६६४। वङ्गलिपिभिः लिखितेयम्। दैर्घ्येण २९.८ से० मी० प्रस्थेन च १०.०२ से० मी० इयम्। सर्वपत्रेषु दशपङ्क्तयः, किन्तु अन्तिमपत्रे (३१ क) एकादश एव पङ्क्तयो दृश्यन्ते।

आरम्भः—

स्मृतिगृह्यपुराणानि
भूपगोपालसंमतम्।
सतां वाक्यानि चालोक्य
छन्दोगश्राद्धमुच्यते॥

अन्तिमोंऽशः—

इति महामहोपाध्यायश्रीश्रीदत्तविरचितः श्राद्धकल्पः परिपूर्णः इति। नमः शिवाभ्याम्। शुभमस्तु। शकाब्द १६६४।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अस्यां पुस्तिकायां केचन प्रमादा दृश्यन्ते—अशुद्धिः, वर्णानां शब्दानां द्विरुक्तिराधिक्यं वा, वर्णानां शब्दानां न्यूनता। क्रमेण कानिचन उदाहरणानि प्रदर्श्यन्ते।

अशुद्धयः

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
श्रवज्जलाम्	स्रवज्जलाम्	१ ख
शंकल्प्य	संकल्प्य	१ ख
प्रमम्	श्रमम्	२ क
ब्राह्मणस्तिक्षुकं चापि	ब्राह्मणो भिक्षुकं चापि	६ क
वैपरित्यस्यावगमात्	वैपरीत्यस्यावगमात्	७ क
ब्राह्मणे	ब्राह्मणान्	८ ख
अपन्यस्तम्	उपन्यस्तम्	८ ख
मन्त्रो	मन्त्रा	८ ख
शिश्वेत्	सिश्चेत्	९ क
परिगतोनि	परिगतानि	९ क
ष्ठापयेत्	स्थापयेत्	१० क
संश्रवपदं	संस्रवपदं	१० क
अवनाजयेत्	अवनेजयेत्	११ क
चतुरषं	चतुरस्रं	१२ ख
मनात्	मनाक्	१३ क
लक्ष्मीवंस्थे	लक्ष्मीर्वसेत्	१३ ख
परिशिश्वेत्	परिसिश्चेत्	१३ ख
अत्यन्तप्रसस्ता इति	अत्यन्तप्रशस्ता इति	१६ ख
रिक्षानि	रिक्तानि	१६ ख
श्राद्धकरणप्रशक्तिः	श्राद्धकरणप्रसक्तिः	१६ ख
वैपरित्यस्यापि	वैपरीत्यस्यापि	१९ ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
यान्यहामि	यान्यहानि	२० क
श्राद्धः स्यात्	श्राद्धं स्यात्	२० ख
दिवशस्याष्टमे	दिवसस्याष्टमे	२१ क
मरिचानि	मरीचानि	२२ ख
वैपरित्यस्यापि	वैपरीत्यस्यापि	२२ ख
एक एव ब्राह्मणे निमन्त्रणीयः	एक एव ब्राह्मणो निमन्त्रणीयः	२३ क
दीपवस्त्रापि	दीपवस्त्राणि	२४ ख
शंकल्प्य	संकल्प्य	२४ ख
पूष्पाक्षतादि	पुष्पाक्षतादि	२४ ख
तेनेक्ते	तेनोक्ते	२५ क
नमे वाचयित्वा	नमो वाचयित्वा	२५ क
अनेनैव विविना	अनेनैव विधिना	२५ ख
कर्मोति	कर्मेति	२५ ख
प्रेतश्राद्धानि षेडश	प्रेतश्राद्धानि षोडश	२७ ख
दशदिवशैः	दशदिवसैः	२७ ख
विकरणातितिलकार्यम्	विकरणादितिलकार्यम्	२८ क
स्वाभा नमः	स्वाहा नमः	२८ क
ओं पसोः पवित्रमसि	ओं वसोः पवित्रमसि	२८ ख
कामोधुक्षुः	कामोधुक्षवः	२८ ख
अधिकारम्	अधिकारः	३१ ख

आधिक्यम्

गौरमृत्तिकायाच्छाद्य	गौरमृत्तिकयाच्छाद्य	३ क
भावितव्यम्	भवितव्यम्	३ ख
भोज्यन्तामिमिति	भोज्यन्तामिति	६ क
तदितितुच्छम्	तदतितुच्छम्	६ ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
दद्यात् दवसानं	दद्यादवसानं	६ ख
श्श्राद्धदकाले	श्राद्धकाले	७ क
अमुका अमुकं	अमुकामुकं	७ क
श्राद्धं न्नोक्तं	श्राद्धं नोक्तं	७ क
उभयोद्देशेनैकदेमेव	उभयोद्देशेनैकमेव	७ क
मन्त्रस्यापितृव्यं	मन्त्रस्य पितृव्यं	७ ख
गौरषसर्षंपाक्षतं	गौरसर्षंपाक्षतं	८ क
सोम्या सा साग्निष्वात्ताः	सोम्या साग्निष्वात्ताः	६ ख
पात्रे मादाय	पात्रमादाय	६ ख
गन्धानादिकं	गन्धादिकं	११ क
पृथ्व्वी	पृथ्वी	११ क
न न पाणितलेन	न पाणितलेन	१२ क
अमुकागोत्रस्य	अमुकगोत्रस्य	१३ ख
ब्रह्मपुराणादावुपपदेशा-दतिदेशं	ब्रह्मपुराणादावुपदेशादतिदेशं	१४ क
दानप्रतिप्रतिग्रहं	दानप्रतिग्रहं	१५ क
पक्षस्यात्रिभागं	पक्षस्य त्रिभागं	१७ क
अपत्यगतगतमेव	अपत्यगतमेव	१८ ख
अनिष्टमिमिति	अनिष्टमिति	१८ ख
सा वेला सा वेला	सा वेला	२१ क
शब्देनैव क कथितः	शब्देनैव कथितः	२१ क
रात्र्यादिकामलं	रात्र्यादिकालम्	२१ ख
निषिद्धस्य निषिद्धस्य तु	निषिद्धस्य तु	२२ क
उदङ्मुङ्मुखी	उदङ्मुखी	२४ ख
सिञ्चयेत्	सिञ्चेत्	२५ क
आधारात्वेन	आधारत्वेन	२५ क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
पादार्थान्वयसमयः	पदार्थान्वयसमयः	२६ क
देवाशून्यत्वम्	देवशून्यत्वम्	२८ क
जीवन्त्यममतिक्रम्य	जीवन्तमतिक्रम्य	२८ क
वृद्धिप्रमातामहेभ्यः	वृद्धप्रमातामहेभ्यः	२९ क
नामकर्माणि	नामकर्मणि	३० क
ॅराधिकारः	ॅरधिकारः	३१ ख

न्यूनता

विनिर्मक्तैः	विनिर्मुक्तैः	२ क
विहितमभयकालिने	विहितमुभयकालिने	२ ख
विश्वदेवं	विश्वेदेवं	४ क
मख्यत्वम्	मुख्यत्वम्	४ क
निबन्धरः	निबन्धारः	५ ख
दक्षिणामखेन	दक्षिणामुखेन	६ क
अमकामकं	अमुकामुकं	६ क
अमकसगोत्रा	अमुकसगोत्रा	७ क
प्रथःपक्षः	प्रथमः पक्षः	८ क
सिद्धन्तया	सिद्धान्ततया	८ क
ॅमपस्थितं	ॅमुपस्थितं	८ क
पदत्र	पदमत्र	८ क
सस्वागतमिति	सुस्वागतमिति	८ ख
अत्राध्वम्	अत्रास्वध्वम्	८ ख
श्राद्धदेशावरं च	श्राद्धदेशावरणं च	८ ख
ब्राह्मणेनैवनुज्ञातः	ब्राह्मणेनैवानुज्ञातः	९ क
मदयध्वम्	मादयध्वम्	९ क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
विप्रकरे दीयनामं	विप्रकरे तदीयनामं	९ ख
क भाष्पे	कर्कभाष्ये	१० क
व्याक्षाणः	व्याचक्षाणः	१० क
अं वो गन्धः	अयं वो गन्धः	१० क
कस्य पात्रं तु	कांस्यपात्रं तु	११ ख
स्वीयावनस्थाने	स्वीयांवनेजनस्थाने	१२ ख
केषंचित्	केषांचित्	१३ क
वचना	वचनात्	१४ क
उदनिधानादिकं तु	उदकनिधानादिकं तु	१४ क
नात्रोकनिधानम्	नात्रोदकनिधानम्	१४ क
पिण्डान्वार्यकं श्राद्धम्	पिण्डान्वाहार्यकं श्राद्धम्	१५ ख
परिष्टवचनात्	परिशिष्टवचनात्	१५ ख
स्मृतेरप्राण्यमाशंकनीयम्	स्मृतेरप्रामाण्यमाशंकनीयम्	१६ क
विरहितोपेतत्	विरहितोऽप्येतत्	१६ ख
श्राद्धमहिताग्नेद्विजन्मः	श्राद्धमाहिताग्नेर्द्विजन्मनः	१६ ख
चतुर्दशशस्त्रादिं	चतुर्दश्यां शस्त्रादिं	१८ क
अन्वकां	अन्वष्टकां	२० क
प्रातः का मुहूर्तान्	प्रातःकालमुहूर्तान्	२० ख
स एवादव्यः	स एवादर्तव्यः	२१ ख
तथा च मत्पुराणम्	तथा च मत्स्यपुराणम्	२१ ख
न कालमधारयेत्	न कालमवधारयेत्	२१ ख
न ब्राह्मणरीक्षा	न ब्राह्मणपरीक्षा।	२१ ख
द्वादभिर्मासैः	द्वादशभिर्मासैः	२२ ख
श्वास नियम्य	श्वासं नियम्य	२४ ख
नमो नमो मेदि	नमो नमो मेदिनि	२४ ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
कानु समयं	कालानुसमर्थ	२६ क
जीवे मामकाः	जीवेषु मामकाः	२७ क
द्वादशवेत्यस्यार्थः	द्वादशाहेथवेत्यस्यार्थः	२७ ख
दैवेन धर्मपितृणामुपचारः	दैवेन धर्मेण पितृणामुपचारः	२८ क
तद्वत्रपि	तद्वदत्रापि	२८ क
पितादयो जीवन्ति	पित्रादयो जीवन्ति	२८ क
विक्तस्येति	विष्णूक्तस्येति	२८ ख
पूर्वमे	पूर्वमेव	२८ ख
पित्राषट्श्राद्धं	पित्रादिषट्श्राद्धं	२८ ख
यवबदरदधि	यवबदरधिभिः	२९ ख
विवाहे पुकस्य च	विवाहे पुत्रकस्य च	३० क
शुश्रुम यस्य चान्ते	शुश्रुमो यस्य चान्ते	३० ख
तत्र भ्रापित्रादेः	तत्र भातृपित्रादेः	३१ ख

(ख) वाराणसेयसंस्कृतविश्वविद्यालयसरस्वतीभवनग्रन्थागारस्य पुस्तिका। कुबेरनाथ शुक्ल, डेस्क्रिप्टिव कैटलाग आफ संस्कृत मैनुस्क्रिप्ट्स इन दी सरस्वती भवन, वाल्यूम ३, संख्या १३७६५। प्राचीने देशजपत्रे लिखिता। सम्पूर्णा पत्रसंख्या ३१। संवत्सर १८८०। देवनागरलिपिभिः लिखितेयम्। दैर्घ्येण ३१·०८ से० मी० प्रस्थेन च १५·५ से० मी० इयम्। सर्वपत्रेषु एकादशपङ्क्तयः, अन्तिमे पत्रे (३१ख) अष्टपङ्क्तयो दृश्यन्ते।

आरम्भः—

श्रीगणेशाय नमः

स्मृतिगृह्यपुराणादि
भूपगोपालसम्मतम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सतां मतानि चालोक्य
छन्दोगश्राद्धमुच्यते ।

अन्तिमोंऽशः—

इति महामहोपाध्यायश्रीदत्तविरचितः श्राद्धकल्पः समाप्तः ।

श्रीदत्तरचितः स्वल्पो
मीमांसान्यायनिर्मलः
आकल्पं श्राद्धकल्पोऽयं
सच्चित्तमनुवर्त्तताम् ।

अत्र संवत्सरे १८८०

अस्यां पुस्तिकायां केचन प्रमादा दृश्यन्ते—अशुद्धिः, वर्णानां शब्दानां द्विरुक्तिराधिक्यं वा, वर्णानां शब्दानां न्यूनता । क्रमेण कानिचन उदाहरणानि प्रदर्श्यन्ते ।

अशुद्धयः

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
देवोद्दिशेन	देवोद्देशेन	१ ख
कसहम्	कलहम्	२ क
णिजम्	निजम्	२ ख
पितृव्यमातुलादिश्रीद्धे	पितृव्यमातुलादिश्राद्धे	७ ख
वेशेषित	विशेषित	७ ख
स्वयंमुदा	स्वयंभुवा	९ क
र्यि च मः	र्यि च नः	९ ख
प्रतिपादयोत्	प्रतिपादयेत्	१० क
लेकी श्रेष्ठतमम	लोके श्रेष्ठतमम्	१० ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
सोमश्छा	सोमस्था	११ क
शुक्तां	सूक्तां	११ क
अमुकसर्मन्	अमुकशर्मन्	१२ ख
अवनिजनस्थाने	अवनेजनस्थाने	१३ क
आचयेदिति	आचरेदिति	१४ क
कामेकी	कामिकी	१९ ख
सकलदेसीयं	सकलदेशीयं	२० क
बहीर्मृतानां	बहिर्मृतानां	२० क
वीधानत्	विधानात्	२१ क
योगान्	योगात्	२१ क
दन्तमक्षयम्	दत्तमक्षयम्	२१ ख
अपराह्णादिणियमः	अपराह्णादिनियमः	२२ क
वीलम्बो नैव कर्तव्यः	विलम्बो नैव कर्तव्यः	२२ क
तच्च मुन्यन्नरम्	तच्च मुन्यन्तरम्	२२ ख
मरिचानि	मरीचानि	२३ क
वैपरित्यस्यापि संभवात्	वैपरीत्यस्यापि संभवात्	२३ क
मुलानि च फलानि च	मूलानि च फलानि च	२३ क
उद्दिश्य त भुक्तं	उद्दिश्याभुक्तं	१३ ख
कठशाखीविषयं द्रष्टव्यम्	कठशाखिविषयं द्रष्टव्यम्	२४ क
अथवो	अथवा	२४ क
ब्राह्मणस्य स्मश्रुकर्म नखच्छेदं	ब्राह्मणस्य श्मश्रुकर्म नखच्छेदं	२४ क
वारिधारां ददन्	वारिधारां ददत्	२५ क
अनैनैव विधिना	अनेनैव विधिना	२५ ख
विप्रमृहगमननिमन्त्रणमन्त्राः	विप्रगृहगमननिमन्त्रणमन्त्राः	२६ क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
तिषामपि च देयं स्यात्	तेषामपि च देयं स्यात्	२६ क
पतीपैतृकम्	पतिपैतृकम्	२६ ख
पुत्रीकापुत्रेण मातृसपिण्डनं	पुत्रिकापुत्रेण मातृसपिण्डनं	२६ क
परीषिउच्यक्य	परिषिञ्च्य	२७ ख
मरिचिः	मरीचिः	२७ ख
सुस्वा	स्वधा	२८ ख
नान्दिमुखत्वकथनम्	नान्दीमुखत्वकथनम्	२८ ख
यपित्वा	जपित्वा	२९ ख
इत्युक्तो	इत्युक्त्वा	२९ ख
पुत्रीकापुत्राधिकारः	पुत्रिकापुत्राधिकारः	३० ख

आधिक्यम्

दूरगमनुं	दूरगमनं	२ क
शस्त्रग्रग्रहणं	शस्त्रग्रहणं	२ क
भूमिसंस्कारोत्रो	भूमिसंस्कारो	३ क
सिद्धीमिति प्रोच्यो	सिद्धमिति प्रोच्य	३ ख
आसन्नं तु	आसनं तु	३ ख
उत्तरस्यां स समापनीयम्	उत्तरस्यां समापनीयम्	४ क
शातातुपवचनात्	शातातपवचनात्	६ क
दृष्टार्थमेवा	दृष्टार्थमेव	७ ख
खड्गिलललाटजातशृङ्गम्	खड्गिललाटजातशृङ्गम्	८ ख
तथ्यैव	तथैव	१२ ख
अन्वारेभ्य	अन्वारभ्य	१२ ख
इति मनुवचनात्	इति मनुवचनात्	१५ क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
चतुर्दश्याष्टमभागें	चतुर्दश्यष्टमभागें	१५ ख
विहाय भविति	विहाय भवति	१५ ख
कृष्णे चतुर्दशीषु	कृष्णचतुर्दशीषु	१९ ख
चतुर्दश्यायायाम्	चतुर्दश्यां	१९ ख
ब्रह्माण्डपुराणवचनात्	ब्रह्मपुराणवचनात्	१९ ख
मुन्वन्तरादिं	मन्वन्तरादिं	२० क
युवामृतानां	युवमृतानां	२० क
वायुपुराणावाक्यात्	वायुपुराणवाक्यात्	२० क
पितृणां तदानन्तरम्	पितृणां तदनन्तरम्	२१ क
शातातापो	शातातपो	२१ ख
नातिसान्ध्यासमीपत	नातिसन्ध्यासमीपत	२२ क
सामान्यावचनप्रवेशासंभवात्	सामान्यवचनप्रवेशासंभवात्	२२ क
कूष्ष्माण्ड	कूष्माण्ड	२२ ख
समुच्चायावगमात्	समुच्चयावगमात्	२३ क
एकाहोनवर्षो ऊनवार्षिकम्	एकाहोनवर्षोनवार्षिकम्	२३ क
संवत्सरेः	संवत्सरे	२३ क
षष्ठमासेः	पष्ठमासे	२३ क
त्रिपक्षेः	त्रिपक्षे	२३ क
पुत्रजन्मदिवसे वाः	पुत्रजन्मदिवसे वा	२३ क
उद्दिश्याब्राह्मणाय दद्यात्	उद्दिश्य ब्राह्मणाय दद्यात्	२३ ख
शय्यासनालंकारावाहनायुधादिकम्	शय्यासनालंकारवाहनायुधादिकम्	२३ ख
अतिथिं चाभोजयित्वा	अतिथिं च भोजयित्वा	२३ ख
इति निमन्त्रणेना गन्धम्	इति निमन्त्रणेन गन्धम्	२४ ख
मेदिनोमन्त्रेण स्तुवन्	मेदिनीमन्त्रेण स्तुवन्	२५ क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
अक्षय्योदकं दत्वा कं	अक्षय्योदकं दत्त्वा	२५ क
ब्राह्मणान् बहिःस्थितं	ब्राह्मणं बहिःस्थितं	२५ ख
ओंकारवर्जामुच्चार्यं	ओंकारवर्जमुच्चार्य	२५ ख
आधारत्वेनैवान्वयप्रातीतेः	आधारत्वेनैवान्वयप्रतीतेः	२५ ख
द्वादशांहे शुचित्वालाभात्	द्वादशाहे शुचित्वलाभात्	२५ ख
मत्स्यपुराणवचानस्य लिखितत्वात्	मत्स्यपुराणवचनस्य लिखितत्वात्	२५ ख
ब्राह्मणोत्थापनानंरतरम्	ब्राह्मणोत्थापनानन्तरं	२६ क
इति हारीतववचनं	इति हारीतवचनं	२६ ख
संकल्पपंपर्यन्तम्	संकल्पपर्यन्तम्	२७ क
प्रेतपूर्वकं अर्घानि पिदत्त्वा	प्रेतपूर्वकं अर्घानि दत्त्वा	२७ क
गन्धादिभिरभ्यरभ्यर्च्य	गन्धादिभिरभ्यर्च्य	२७ ख
संपिण्डीकरणं यावत्	सपिण्डीकरणं यावत्	२७ ख
स्वाधास्थाने सर्वत्र स्वाहा	स्वधास्थाने सर्वत्र स्वाहा	२८ क
प्रतिमादिषुः	प्रतिमादिषु	२८ ख
आसनं मुत्सृज्य	आसनमुत्सृज्य	२९ क
दाक्षिणां दत्त्वा	दक्षिणां दत्त्वा	३० क
शेषाप्रतिपत्त्यादिकं	शेषप्रतिपत्त्यादिकं	३० क
शातातापो	शातातपो	३० क
पितुरभावेऽपि स्वविवाहस्यापि	पितुरभावे स्वविवाहस्यापि	३० क
स्थितायां तु सोसोदरादेरनधिकारो	स्थितायां तु सोदरादेरनधिकारो	३० ख

न्यूनता

अथव	अथवा	१ ख
लेपेदिति	लेपयेदिति	२ ख
वैश्वदेविब्राह्मण	वैश्वदेविकब्राह्मण	३ ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
क्रतुदक्षभ्यः	क्रतुदक्षेभ्यः	४ ख
देतात्वावगमात्	देवतात्वावगमात्	५ क
अस्मदेव वाक्याद् वा	अस्मादेव वाक्याद् वा	६ क
नन्वेवं चनमनर्थकम्	नन्वेवं वचनमनर्थकम्	७ ख
मातामहाद।वाहनादिमन्त्रँ	मातामहादावावाहनादिमन्त्रँ	८ क
द्वौ देवौ ब्राणौ	द्वौ देवौ ब्राह्मणौ	८ क
धूपदीताम्बूलं	धूपदीपताम्बूलं	१० क
जोवजं च जँ	जीवजं च वर्जं	१० ख
प्रथमस्तृतं	प्रथमास्तृतं	१२ ख
लक्ष्मीर्वसे	लक्ष्मीर्वसेत्	१३ ख
उक्ता	उक्त्वा	१३ ख
विषत्वात्	विषयत्वात्	१४ क
अभिवर्धतम्	अभिवर्धताम्	१४ ख
दक्षिणां द्यात्	दक्षिणां दद्यात्	१४ ख
दानप्रतिग्रहोमं	दानप्रतिग्रहहोमं	१५ क
पिण्डाहार्यकं श्राद्धं	पिण्डान्वाहार्यकं श्राद्धं	१५ ख
परदिन ए श्राद्धम्	परदिन एव श्राद्धम्	१६ क
इति देववचनात्	इति देवलवचनात्	१६ ख
कामस्याकारः	कामस्याधिकारः	१८ ख
दर्शयापत्यप्रक्रमात्	दर्शनीयापत्यप्रक्रमात्	१८ ख
तस्मात् वलयोः	तस्मात् केवलयोः	१९ क
शस्त्राद्यभिघातस्य	शस्त्राद्यभिघातमृतस्य	१९ ख
मातृकं श्राद्धं च पराह्णे	मातृकं श्राद्धं चापराह्णे	२१ क
वृद्धिश्राद्धातर्गते	वृद्धिश्राद्धान्तर्गते	२१ क
फलश्रुतिरर्थं	फलश्रुतिरर्थः	२१ ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
वार्द्धीनसं	वार्द्धीनसं	२२ ख
कुलत्थवीजरः	कुलत्थवीजपूरः	२२ ख
तत्प्रक्षलवणं	तत्प्रत्यक्षलवणं	२२ ख
प्रणवमुक्ता विसर्जनम्	प्रणवमुक्त्वा विसर्जनम्	२३ ख
इति याज्ञवल्कीयमपि	इति याज्ञवल्क्यीयमपि	२४ क
याज्ञवल्कीयं च बहुत्वमिति	याज्ञवल्क्यीयं च बहुत्वमिति	२४ ख
गोभूहेमदास्यदिकं	गोभूहेमदास्यादिकम्	२५ ख
नानभरणभूषणैः	नानाभरणभूषणैः	२५ ख
शान्त्युकशिरःप्रणामं	शान्त्युदकशिरःप्रणामं	२६ क
सपिण्डीकणं च	सपिण्डीकरणं च	२६ ख
प्रेतपात्रावशिजलेन	प्रेतपात्रावशिष्टजलेन	२७ क
अंगुष्ठं योजनपूर्वकं	अंगुष्ठं संयोजनपूर्वकं	२७ क
करं प्रोञ्च्छ्यचम्य	करं प्रोञ्च्छ्याचम्य	२७ ख
असनादौ तु	आसनादौ तु	२८ क
सर्वत्र जवो दर्भाः	सर्वत्र ऋजवो दर्भाः	२८ क
तस्य दक्षिकरं	तस्य दक्षिणकरं	२९ क
आचारस्य ततो बलत्वात्	आचारस्य ततो दुर्बलत्वात्	३० ख
मार्कंडेयपुराणे	मार्कण्डेयपुराणे	३१ ख

(ग) बम्बई युनिवर्सिटी, आई० एस० देसाई कलेक्शन इत्यस्य पुस्तिका। एच० डी० वेलणकर, कैटलाग आफ संस्कृत मैनुस्क्रप्ट्स इन दी आई० एस० देसाई कलेकशन इन दी बम्बई युनिवर्सिटी, नं० ४१२५। प्राचीने देशजपत्रे लिखिता। सम्पूर्णा पत्रसंख्या ३५। समयस्य उल्लेखो नास्ति। देवनागरलिपिभिः लिखितेयम्। दैर्घ्येण २७·२ से० मी० प्रस्थेन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

च ११·९ से०मी० इयम् । प्रायशः सर्वपत्रेषु एकादशपङ्क्तयो दशपङ्क्तयो वा; किन्तु ५ ख, १२ क, १५ क ख पत्रेषु नवपङ्क्तयः, २९ ख, ३० क, ३२ क, ३३ क, ३५ क पत्रेषु द्वादशपङ्क्तयः, ३२ ख, ३३ ख, ३४ क पत्रेषु त्रयोदशपङ्क्तयः, तथा २८ ख, ३४ ख पत्रेषु चतुर्दशपङ्क्तयो दृश्यन्ते ।

आरम्भः—

श्रीगणेशाय नमः

स्मृतिगृह्यपुराणादि
भूपगोपालसम्मतम् ।
सतां मतानि चालोक्य
छन्दोगश्राद्धमुच्यते ॥

अन्तिमोंऽशः—

इति महामहोपाध्यायश्रीदत्तविरचितः श्राद्धकल्पः समाप्तः ।

श्रीदत्तरचितः स्वल्पो
मीमांसान्यायनिर्मलः ।
आकल्पं श्राद्धकल्पोऽयं
सच्चित्तमनुवर्तताम् ॥

अस्यां पुस्तिकायां केचन प्रमादा दृश्यन्ते—अशुद्धिः, वर्णानां शब्दानां द्विरुक्तिराधिक्यं वा, वर्णानां शब्दानां न्यूनता । क्रमेण कानिचन उदाहरणानि प्रदर्श्यन्ते ।

अशुद्धयः

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
भुञ्जीज	भुञ्जीत	१ ख
कुलशीलमौचं	कुलशीलशौचं	१ ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
गम्यमाणं	गम्यमानं	५ क
वैदिकमाचरेदित्यणेणोक्तं	वैदिकमाचरेदित्यनेनोक्तं	५ ख
शपत्नीकस्य	सपत्नीकस्य	७ क
बौधामननाम्ना	बौधायननाम्ना	८ ख
अग्रौकरणात्	अग्नौकरणात्	९ क
परिकल्प्येत्यन्वयः	परिकल्प्येत्यन्वयः	१० ख
मित्रादिषट्पात्रेषु	पित्रादिषट्पात्रेषु	१२ ख
अग्नौकरनशेषं	अग्नौकरणशेषं	१४ क
नाक्रपातयेत्	नाश्रु पातयेत्	१४ ख
कुर्वेतः	कुर्वीत	१६ क
अवणेजनं	अवनेजनं	१७ क
ददन्	ददत्	१८ क
अधोमुखाणां	अधोमुखानां	१९ ख
न भुञ्जित	न भुञ्जीत	२० क
कर्तृभीक्तारौ	कर्तृभोक्तारौ	२० क
प्रौष्ठपद्या°	प्रौष्ठपद्युं	२० क
लौकिकाग्नौ विधीयते	लौकिकेऽग्नौ विधीयते	२० क
माशानुमासिकम्	मासानुमासिकम्	२० ख
नैमित्तिकं वा जत्र	नैमित्तिकं वा यत्र	२१ क
नात्रकामो वा	नाशकामो वा	२२ ख
स्यौसुकामः	सौभाग्यकामः	२३ क
दर्शनीयापत्यकामी	दर्शनीयापत्यकामो	२३ क
प्रमानस्य	प्रमाणस्य	२३ ख
विषशस्त्रश्वापदाद्दितियंक्	विषशस्त्रश्वापदादितियंक्°	२४ क
वैपरित्यस्याप्यसंभवात्	वैपरीत्यस्याप्यसम्भवात्	२४ ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
तावच्छ्राद्रस्य कालः स्यात्	तावच्छ्राद्धस्य कालः स्यात्	२५ ख
गन्यागते श्राद्धं स्यात्	कन्यागते श्राद्धं स्यात्	२५ ख
तदा शुन्धपक्षे	तदा शुक्लपक्षे	२६ क
पूर्वाह्ले मासिकं श्राद्धं	पूर्वाह्ले मातृकं श्राद्धं	२६ क
श्रीद्धीयमुक्तं	श्राद्धीयमुक्तं	२७ क
पंगुमांसं	पशुमांसम्	२८ क
कुंष्माण्डं	कूंष्माण्डं	२८ क
दाक्षणं दद्यात्	दक्षिणां दद्यात्	२९ क
आत्मानभभ्युक्ष्य	आत्मानमभ्युक्ष्य	२९ ख
ततो निर्वीं	ततो नीवीं	३० क
वारां ददत्	धारां ददत्	३० ख
आधारत्वेनैवाश्वयप्रतीतेः	आधारत्वेनैवान्वयप्रतीतेः	३१ क
दंानणन्त्यूदकशिरः	दंानशान्त्यूदकशिरः॰	३१ क
कल्यताम्	कल्पताम्	३२ ख
मरिर्चिं	मरीर्चिं	३३ क
कुंशत्रयोत्मकं	कुंशत्रयात्मकं	३३ ख
स्वासनियमादिकं च कृत्वा	श्वासनियमादिकं च कृत्वा	३४ ख
मातामहादिप्रत्यैकं	मातामहादिप्रत्येकं	३४ ख
सुश्रुम	शुश्रुमो	३५ क

आधिक्यम्

परकीकायां च भूमिं	परकोयां च भूमिं	१ ख
नुदङ्मुखो	उदङ्मुखो	२ क
पित्र्याद्यर्थं मिति	पित्र्याद्यर्थंमिति	४ ख
वैजवापां	वैजवापं	६ ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
स्वभर्तृपिण्डमात्राभ्यं स्तृप्तिरासां	स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां	७ क
पृथक्पदा अवैयर्थ्याय कल्पते	पृथक्पदा वैयर्थ्याय कल्पते	७ क
र्किन्तु	किन्तु	७ ख
तस्मादामुक	तस्मादमुक	८ ४
निमन्त्रणमुप्यक्रम्यैव कथनात्	निमन्त्रणमुपक्रम्यैव कथनात्	८ ख
वैकल्पिकल्पिकत्वात्	वैकल्पिकत्वात्	८ ख
नान्वविशेषितविष्णुवचनादेव	नन्वविशेषितविष्णुवचनादेव	९ ख
न्यायादेव प्राप्तत्वात् न न्यायमूलानामपि	न्यायादेव प्राप्तत्वात् न्यायमूलानामपि	९ ख
प्राप्तं वाक्यां कृत्वा	प्राप्तं वाक्यं कृत्वा	११ ख
मादाय	आदाय	११ ख
कंर्प्यूरं	कंर्पूरं	१३ ख
तदुयुक्तं	तदुक्तं	१४ क
नि:क्षिपेत्	निक्षिपेत्	१४ ख
करव्य	कव्य	१५ ख
उच्छिष्टसंन्निधौ	उच्छिष्टसंनिधौ	१६ ख
तः तः	ततः	२० क
प्रतिग्रहाहोमं	प्रतिग्रहहोमं	२० क
अमावास्यायायां	अमावास्यायां	२१ क
निमित्तत्वं मुक्तं	निमित्तत्वमुक्तं	२१ ख
प्रंधानकर्तव्यातावाधापत्तेः	प्रधानकर्तव्यतावाधापत्तेः	२२ ख
अंङ्गावच्छेदेन निषेषेधोपपत्तेः	अंङ्गावच्छेदेन निषेधोपपत्तेः	२२ ख
पूर्वोक्त प श्राद्धनिषेधप्राप्तेः	पूर्वोक्तश्राद्धनिषेधप्राप्तेः	२२ ख
अथवा का काम्यविषयोऽयं निषेधः	अथवा काम्यविषयोऽयं निषेधः	२२ ख
क्षुद्रपश्रुकामः	क्षुद्रपशुकामः	२३ क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
पौर्णमासावितिवेदिति	पौर्णमासावितिवदिति	२३ ख
युवानस्तुत्र	युवानस्तत्र	२३ ख
°विशेषणत्वबोधकतया	°विशेषबोधकतया	२३ ख
उल्लेखेन पि पिण्डदानस्य	उल्लेखेन पिण्डदानस्य	२४ क
सापेक्षत्वयोर्निमित्तत्वम्	सापेक्षयोर्निमित्तत्वम्	२५ ख
कन्यांगतं	कन्यागतं	२५ ख
शास्त्रार्थी सिद्धौ	शास्त्रासिद्धौ	२६ क
विशेषतो स्वानब्राह्मणपरीक्षा	विशेषतोब्राह्मणपरीक्षा	२७ ख
सर्वमेतददिति मनुवचनात्	सर्वमेतदिति मनुवचनात्	२८ ख
प्रेक्कष्टधनम्	प्रक्कष्टधनम्	२९ क
इति विष्णुवचनाच्चवनाच्च	इति विष्णुवचनाच्च	२९ ख
ब्राह्मणं मुपवेशयेत्	ब्राह्मणमुपवेशयेत्	२९ ख
देवराजासनेभ्यनुज्ञातो	देवराजाभ्यनुज्ञातो	२९ ख
पुष्पाणि वनस्पतिरसानिस्पतिरसानि	पुष्पाणि वनस्पतिरसानि	३० क
तदुपरि प्रेतावनेणजनं	तदुपरि प्रेतावनेजनं	३० क
स स्वधा नमो	स्वधा नमो	३२ ख
संसम्पन्नम्	सम्पन्नम्	३४ क

न्यूनता

निमन्त्रपक्षे	निमन्त्रणपक्षे	२ क
मत्स्यपुराणसतात्	मत्स्यपुराणसहितात्	२ ख
उभयत्रकालिनेन्वेति	उभयत्रकालिनेऽप्यन्वेति	३ क
बद्धमुष्टिमितान्	बद्धमुष्टिहस्तमितान्	३ क
नूतनपात्रे	नूतनपात्रेषु	३ क
दानतिकरं	दानातिकरं	४ क

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
देवीतीर्थेनमोविश्वेभ्योदेवेभ्यः	देवीतीर्थेन नमो विश्वेभ्यो देवेभ्यः	४ ख
यो सौ गणं	योऽसौ गणं	५ क
विश्वेवेत्यनेन	विश्वेदेवेत्यनेन	५ ख
बलाच्च तुर्थीद्वयं	बलाच्च चतुर्थीद्वयं	६ क
संबोधेन च	संबोधनेन च	६ ख
ब्राह्मणापक्षे	ब्राह्मणादिपक्षे	७ ख
नन्वाहनं	नन्वावाहनं	९ क
निरवकाशमापद्येत	निरवकाशतामापद्येत	९ ख
मातामहादावाहनादिमन्त्रपाठः	मातामहादावावाहनादिमन्त्रपाठः	१०क
अतोस्मौकरणशेषं	अतोऽग्नौकरणशेषं	१४ क
यजमाग्रै°	यजमानाग्रै°	१६ क
अवनेजनं दमध्याग्र°	अवनेजनं दर्भमध्याग्रं	१७ क
पित्राभ्यः कृत्वा	पित्रादिभ्यः कृत्वा	१७ क
मातामहाभ्यः	मातामहादिभ्यः	१७ ख
पित्रादिब्राह्मंस्पृष्ट्वा	पित्रादिब्राह्मणं स्पृष्ट्वा	१८ क
पिञ्जुद्यभिसंगृह्य	पिञ्जुल्याद्यभिसंगृह्य	१८ ख
सोन्वष्टकां	सोऽन्वष्टका°	२० क
पिडानाहार्यकं	पिण्डानाहार्यकं	२० ख
साधारणप्रकरणे	साधारणश्राद्धप्रकरणे	२० ख
चद्रक्षयपर इति	चन्द्रक्षयपर इति	२१ क
भार्याविरहितोप्येतत्	भार्याविरहितोऽप्येतत्	२१ ख
दशम्यादयोत्यन्तप्रशस्ताः	दशम्यादयोऽत्यन्तप्रशस्ताः	२२ क
राजादिभिरनात्	राजादिभिरलिखनात्	२२ क
अश्वादिकामः	अश्वादिपशुकामः	२३ क
प्रायोनशन°	प्रायोऽनशन°	२४ ख

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अशुद्धम्	शुद्धम्	पृष्ठाङ्कः
तर्हिं पुंसोपि न स्यात्	तर्हि पुंसोऽपि न स्यात्	२४ ख
वाकान्तरेषु	वाक्यान्तरेषु	२४ ख
कृतपत्यमरणायाः	कृतपत्यनुमरणायाः	२५ क
कलदेशीयमहाजनानुरोधात्	सकलदेशीयमहाजनानुरोधात्	२५ क
इति ब्रह्मपुराणवाक्यात्	इति ब्रह्मपुराणवाक्यद्वयात्	२५ ख
शुक्लमपि	शुक्लपक्षेऽपि	२५ ख
पिण्डाहार्येतरविषये	पिण्डान्वाहार्येतरविषये	२६ क
कर्तव्यत्वमविवक्षितम्	कर्तव्यत्वमपि विवक्षितम्	२६ क
दश पञ्च सर्वदा	दश पञ्च च सर्वदा	२६ ख
दिवसस्य दत्तं त्रेति शेषः	दिवसस्य दत्तं तत्रेति शेषः	२६ ख
नियमः सोत्र नास्ति	नियमः सोऽत्र नास्ति	२७ ख
योयममावास्यादिकालनियमः	योऽयममावास्यादिकालनियमः	२७ ख
श्राद्धमेव क चन्द्रसूर्यग्रहे	श्राद्धमेव कर्तव्यं चन्द्रसूर्यग्रहे	२७ ख
ततोन्नं	ततोऽन्नं	२८ ख
प्रथमश्राद्धे तयं विशेषः	प्रथमश्राद्धे त्वयं विशेषः	२८ ख
गतोसि	गतोऽसि	२९ क
ब्राह्मनिमन्त्रणीयः	ब्राह्मणो निमन्त्रणीयः	२९ क
याज्ञवल्कीयं	याज्ञवल्क्यीयं	२९ ख
निमन्त्रितोस्मि	निमन्त्रितोऽस्मि	२९ ख
ततोनेकविधानपानव्यञ्जनादिकं	ततोऽनेकविधान्नपानव्यञ्जनादिकं	३० क
अत्र पितर्मायस्व	अत्र पितर्मादयस्व	३० क
गतोसि	गतोऽसि	३० क
नमोस्तु	नमोऽस्तु	३० ख
तद्विषयोयं	तदविषयोऽयं	३१ क
